Shri Raghunath Temple MSS. Library,
JAMMU

No. २०२४ (महाभारते)

Title भगवद्गीता १८ टीका सहिता
१४ज्ञातध्यायः

Author श्री आनन्द तीर्थः

Extent १११ Age ८

Subject वेदान्त शास्त्रं

चतुर्दशाध्याय

शांकरभाष्य
आनंदगिरिकृत टी०
श्रीधरी स्वामिकृत
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
उत्तमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषाअनुवाद ॥

श्रीभगवानुवाच परंभूयःप्रवक्ष्यामिज्ञा
नानांज्ञानमुत्तमं यद्ज्ञात्वामुनयःसर्वे
परांसिद्धिमितोगताः १

शांकरभाष्यं १

सर्वमुत्पद्यमानं क्षेत्रक्षेत्रज्ञसंयोगादुत्पद्यत इति उक्तं तत् कथमिति तत्प्रदर्शनार्थं परं भूय इत्यादिरध्याय आरभ्यते अथवा ईश्वरपरतन्त्रयोः क्षेत्रक्षेत्रज्ञयोर्जगत्कारणत्वं न तु सांख्यानामिव स्वतन्त्रयोरित्येवमर्थं प्रकृतिस्थत्वं गुणेषु च सङ्गः संसारकारणमित्युक्तं कस्मिन् गुणे कथं संगः के वा गुणाः कथं वा बध्नन्तीति गुणेभ्यश्च मोक्षणं कथं स्यात् मुक्तस्य च लक्षणं वक्तव्यमित्येवमर्थं च श्रीभगवानुवाच परमिति परं ज्ञानमिति व्यवहितेन सम्बन्धः भूयः पुनः पूर्वेषु सर्वेषु अध्यायेषु असकृदुक्तमपि प्रवक्ष्यामि तच्च परं परवस्तुविषयत्वात् किं तत् ज्ञानं सर्वेषां ज्ञानानामुत्तमं उत्तमफलत्वात् ज्ञानानामिति नामानित्वादीनां किं तर्हि यज्ञादिज्ञेयवस्तुविषयाणां इति तानि न मोक्षाय इदन्तु मोक्षायेति परोत्तमशब्दाभ्यां स्तौति श्रोतृबुद्धिरुच्युत्पादनार्थं यत्ज्ञात्वा यत् ज्ञानं ज्ञात्वा प्राप्य मुनयः सन्न्यासिनो मननशीलाः सर्वे परां सिद्धिं मोक्षाख्यां इतोऽस्माद्देहबन्धनादूर्ध्वं गताः प्राप्ताः १

आनन्दगिरिकृतटीका २

क्षेत्रक्षेत्रज्ञसंयोगस्य सर्वोत्पत्तिनिमित्तत्वमज्ञानं ज्ञापयितुमध्यायान्तरमवतारयन्नध्याययोरुत्पाद्योत्पादकत्वरूपां संगतिमाह सर्वमिति विधान्तरेणाध्यायारंभं सूचयति अथवेति तदेव वक्तुमुक्तमनुवदति ईश्वरेति प्रकृतिस्थत्वं पुरुषस्य प्रकृत्या सहैकत्वाध्यासः तस्यैव गुणेषु संगोऽभिनिवेशः षड्विधामाकांक्षां निक्षिप्य तदुत्तरत्वे

नाध्यायारंभे पूर्ववदेव पूर्वाध्यायसम्बन्धसिद्धिरित्याह कासिमिति
पूर्वोक्तेनार्थेनास्याध्यायस्य सम्बन्धयार्थप्रकारः परमित्यस्य भाविका
त्तार्थत्वे व्यावर्तयितुं संगतिमाह परमिति भूयःशब्दस्यापिकार्थत
मिह नास्तीत्याह पुनरिति पुनःशब्दार्थमेव विवृणोति पूर्वेष्विति पु
नरुक्तिस्तर्हीत्याशंक्य सूक्ष्मत्वेन दुर्बोधत्वात् पुनर्वचनमर्थवदित्या
ह तच्चेति विशेष्यं प्रश्नद्वारा निर्दिशति किन्तदिति निर्द्धारणार्थां ष
ष्ठीमादाय तस्य प्रकर्षं दर्शयति सर्वेषामिति परमुत्तममिति पुनरुक्ति
माशंक्य विषयफलभेदान्नैवमित्याह उत्तममिति ज्ञाने ज्ञेयमित्यादौ ज्ञा
नशब्देनामानित्वादीनामुक्तत्वात्तन्मध्ये च ज्ञानस्य ज्ञानानामिति साध्य
त्वेनोत्तमत्वात् तस्य वक्तव्यत्वेत्याशंक्याह ज्ञानिनेमिति ज्ञानिनामिति
नामानित्वादीनां ग्रहणमितिशेषः इतिशब्दादूर्ध्वं पूर्ववदेव शेषो द्रष्टव्यः
यथोक्तज्ञानापेक्षया उत्तमत्वं ज्ञानस्य प्रकर्षस्तमाह नानीति स्तुति
फलमाह श्रोतृबुद्धीति ज्ञानं ज्ञात्वा ज्ञानस्य ज्ञेयत्वोपगमादनवस्थे।
त्याशंक्याह प्राप्येति मुनिशब्दस्य चतुर्थाश्रमविषयत्वे तन्मात्रादेव
ज्ञानायोगात् उक्तत्वेषां मुक्तिरित्याशंक्याह मननेति सिद्धेर्ज्ञानत्वे
परामिति विशेषणाद्व्यावर्त्य मुक्तित्वमाह मोक्षाख्यामिति देहाख्यस्य
बन्धनस्याध्यत्वमाह अस्मादिति ।

स्वामिकृतटीका ॥

प्रकृत्योः स्वतंत्रत्वं वारयन् गुणसंगतः प्राह संसारवैचित्र्यं विस्तरेण
चतुर्दशे ॥ यावत्संजायते किंचित्सत्त्वं स्थावरजंगमं क्षेत्रक्षेत्रज्ञसंयोगा
त्तद्विद्धि भरतर्षभेत्युक्तं स च क्षेत्रक्षेत्रज्ञयोः संयोगो निरीश्वरसांख्याना
मिव न स्वातंत्र्येण किंत्वीश्वरेच्छयैवेति कथनपूर्वकं कारणं गुणसंगो
स्य सदसद्योनिजन्मस्वित्यनेनोक्तं सत्त्वादिगुणकृतं संसारवैचित्र्यं प्रपं
चयिष्यन् एवंभूतं वक्ष्यमाणमर्थं स्तौति श्रीभगवानुवाच परमिति द्वा।
भ्यां परं परमार्थनिष्ठं ज्ञायतेनेनेति ज्ञानं ज्ञानोपदेशं भूयोपि पुनरपि
प्रकर्षेण वक्ष्यामि कथंभूतं ज्ञानानां तपःकर्मादिविषयाणां मध्ये उत्तमं

मोक्षहेतुत्वात् तदेवाह यज्ज्ञात्वा प्राप्य मुनयो मननशीलाः सर्वे इतो देह
बंधनात् परां सिद्धिं गता मोक्षं प्राप्ताः १

पैशाचभाष्ये टीका ४

सत्वं रज परं तं त्रयोः क्षेत्रक्षेत्रज्ञयोः जगत्कारणत्वं तत्सांख्यानामिव गुणेभ्यश्च सं॰ १
संगः संसारकारणमित्युक्तं गुणेषु कथं संगः के वा गुणाः कथं च बध्नन्ति गु
णेभ्यश्च मोक्षणं कथं स्यादित्येतत्प्रतिपादनार्थं मुक्तलक्षणं वक्ष्यामि
त्येतमर्थं च श्री परं प्रकृष्टं भूयः पुनरपि ज्ञानानां इतो देहबंधनात् १

रामानुजभाष्यटीका ५

त्रयोदशे प्रकृतिपुरुषयोरन्योन्यसंसृष्टयोः स्वरूपयाथात्म्यं विज्ञाय अमा
नित्वादिभिर्भगवद्भक्त्यनुगृहीतैर्बंधान्मुच्यते इत्युक्तं तत्र बंधहेतुः पूर्वपू
र्वसत्वादिगुणमयसुखादिसंग इति चाभिहितं कारणं गुणसंगोऽस्य
सदसद्योनिजन्मसु इति च अथेदानीं गुणानां बंधहेतुताप्रकारो गुणनिव
र्तनप्रकारश्चोच्यते श्रीभगवानुवाच परं भूय इति परं पूर्वोक्ताद् अन्यत्
प्रकृतिपुरुषांतर्गतमेव सत्वादिगुणविषयं ज्ञानं भूयः प्रवक्ष्यामि तच्च
ज्ञानं सर्वेषां प्रकृतिपुरुषविषयज्ञानानामुत्तमं यत् ज्ञात्वा सर्वे
मुनयः तन्मननशीला इतः संसारात् परां सिद्धिं गताः परां शुद्धात्मस्वरू
पप्राप्तिरूपां सिद्धिं गताः [illegible]

अभिनवगुप्तकृतटीका ६

यदेव पूर्वोक्तं ज्ञानं तदेव पुनः प्रकर्षेण प्रत्येकं गुणस्वरूपनिरूपणया
वेतन्मेन वक्ष्यामि [illegible]

परमार्थप्रपाटीका ७

पूर्वाध्याये महाभूतान्यहंकारस्तथादिवाक्यैः क्षेत्रस्वरूपमेवोक्तं नेत्यादिः
तथा क्षेत्रस्य विकारवत्त्वमेव दर्शितं न तु तद्वैचित्र्यकारणं तथा क्षेत्रज्ञानां
सत्त्वस्थितिरूपेण निरूपणं न समष्टिरूपेण तत्सर्वं वक्तुं उद्देशावकं भ
गवानुपक्रमते परं भूय इति द्वाभ्यां परं परमार्थसाधकं ज्ञायते अनेन
इति ज्ञानम् उपदेशरूपं पूर्वे सत्त्वं प्राग्येनोक्तमपि भूयः प्रवक्ष्यामि किंभूतं

श्री
गीटी
वं.
२

ज्ञानानीतपःकर्मादिविषयाणां मध्ये उत्तममोक्षहेतुत्वात्तदेवाह यदिति
यज्ज्ञात्वा सर्वे मुनयो मननशीला याज्ञवल्क्यवामदेवादयः परामात्यंति
कीं सिद्धिं गताः १

वनमालीटीका ८

यदुक्तं यावत्संजायते किंचित्सत्त्वं स्थावरजंगमं क्षेत्रक्षेत्रज्ञसंयोगात्त
द्विद्धि भरत तत्र निरीश्वरसांख्यनिराकरणेनेश्वराधिष्ठितप्रकृतेरेव वि
श्वसृष्ट्यन्यथा तत्तु निवक्तव्यं एवं कारणं गुणसंगोस्य सदसद्योनिजन्मस्वि
त्युक्तं तत्र कस्मिन्गुणे कथं संगः के वा गुणाः कथं वा निबध्नंतीति व
व क्तव्ये तथाभूतप्रकृतिमोक्षं ये विदुर्यांति ते परमित्युक्तं तत्र भूतप्रकृति
शब्दितेभ्यो गुणेभ्यः कथं मोक्षणं स्यान्मुक्तस्य च किं लक्षणमिति वाच्यं
तदेतत्सर्वं विस्तरेण वक्तुं चतुर्दशोध्याय आरभ्यते तत्र श्रोतृनभिमु
ख्याय वक्ष्यमाणमर्थं स्तौति परमिति द्वाभ्यां ज्ञायतेनेनेति ज्ञानं पर
मात्मज्ञानसाधनं परं श्रेष्ठं श्रेष्ठज्ञेयविषयकत्वात् कीदृशं ज्ञानानां भ
गवदुपदेशसाधनानां यज्ञादीनां मध्ये उत्तमं उत्तमफलकत्वात् न
त्वमानित्वादीनां तेषामंतरंगत्वेनोत्तमफलकत्वात् परमित्यनेना
त्कृष्टविषयकत्वमुक्तं उत्तममित्यनेनोत्कृष्टफलकत्वमिति
भेदः ईदृशं ज्ञानमहं प्रवक्ष्यामि भूयः पुनः पूर्वं मया सकृदुक्तमपि यज्ज्ञा
नं ज्ञात्वानुष्ठाय मुनयो मननशीलाः सर्वे परां मुक्तिरूपां सिद्धिं इतो दे
ता हबंधं हत्वा प्राप्ताः १

इत्थं वैजयंतीटीका ४

सत्त्वादयः प्रकृतिजा गुणास्तु जीवबंधकाः तद्ज्ञानात्तन्निवृत्तिस्तस्या इ
ति प्रोक्तं चतुर्दशे त्रयोदशाध्याये मया संयुक्तानां प्रकृतिपुरुषयोर्गु
णां स्वरूपाणि यान्यत्र विज्ञाय मद्भक्तियुक्तैरमानित्वादिसाधनैर्मुक्तः
सद्रूपः प्रकृतिबंधान्मुच्यते कारणं गुणसंगोस्य सदसद्योनिज
न्मस्विति चैतद्देहे तु गुणसंग एवेति चोक्तं पुरुषस्यानीचयोनीबाधकत्वेन तेगु
तेः णाः के तेषां लक्षणं वा किं कस्मिन्गुणे कथं संगः गुणसंगिनः कस्य
गुणस्य संगात् किं फलं कथं वा गुणेभ्यो मुक्तिरित्यपेक्षायां तेषां गुणा
नां वक्ष्यमाणं स्वरूपादिकं वक्तुमादौ तद्गुणविषयकं ज्ञानं स्तुवन् श्रीभ

पूर्वाध्याये यावत्संजायते किंचित्सत्त्वं स्थावरजंगमं क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धीत्युक्तम् तत्र निरीश्वरसांख्य निराकरणेन
क्षेत्रक्षेत्रज्ञसंयोगस्येश्वराधीनत्वं वक्तव्यं एवं कारणं गुणसंगोस्य सदसद्योनि जन्मस्वित्युक्तं तत्र कस्मिन् गुणे कथं संगः के
वा गुणाः कथं वा ते निबध्नंतीति वक्तव्यं तथा भूतप्रकृति मोक्षंच ये विदुर्यांति ते परमित्युक्तं तत्र भूतप्रकृतिशब्दितेभ्यो
गुणेभ्यः कथं मोक्षणं स्यान्मुक्तस्य च किं लक्षणमिति वक्तव्यं तदेतत्सर्वं विस्तरेण वक्तुं चतुर्दशोध्याय आरभ्यते तत्र
वक्ष्यमाणमर्थं द्वाभ्यां स्तुवन् श्रोतृणां रुच्युत्पत्तये श्रीभगवानुवाच

गवानुवाच द्वाभ्याम् परंभूयइति तज्ज्ञानंभूयः प्रवक्ष्यामियज्ज्ञात्वा ज्ञा
तेऽनेनेतिज्ञानमुपदेशः तच्चप्रागुक्तमपिभूयः पुनरपिप्रकारांतरे
णप्रवक्ष्यामिकीदृशंज्ञानंपरंपूर्वोक्तादन्यत्प्रकृतिपुरुषांतर्गतमे
वगुणविषयंपुनःकीदृशंज्ञानानामुत्तमंज्ञानानांसर्वेषांप्रकृति
पुरुषविषयकानामुत्तमंश्रेष्ठंदध्नोनवनीतवदुद्धृतत्वात् यज्ज्ञाने
ज्ञात्वोपलभ्यसर्वेमुनयस्तन्मननशीलाःइतःसंसारात्परांशुद्धात्मप
रमात्मस्वरूपयाथात्म्योपलब्धिलक्षणांसिद्धिंसिद्धिंगताःप्राप्ताः १॥

मधुसूदनीटीका १

ज्ञायतेऽनेनेतिज्ञानंपरमात्मज्ञानसाधनंपरंश्रेष्ठंपरवस्तुविषय।
ज्ञानकीदृशंतत्ज्ञानानांज्ञानसाधनानांबहिरंगाणांयज्ञादीनांम।
ध्येउत्तममुत्तमफलत्वात् नत्वमानित्वादीनाम ध्येतेषामंतरंगत्वेनो
त्तमफलत्वात् परमित्यनेनोत्कृष्टविषयत्वमुक्तंउत्तममित्यनेनो
त्कृष्टफलत्वमितिभेदःईदृशंज्ञानमहंप्रवक्ष्यामिभूयःपुनःपूर्वे
ष्वध्यायेषुसकृदुक्तमपियत्ज्ञानंज्ञात्वामुनयःमननशीलाः
संन्यासिनःसर्वेपरांसिद्धिंमोक्षाख्यांइतोदेहबंधनात्गताःप्राप्ताः १।

सदानंदी टीका ॥

गुणातीतात्तत्त्वंपरमपदमभ्यापरुचेविविज्ञारंभांतगीतगुणाक
लातत्त्वममतेस्वयंभूःशंभुःश्रीनिधिगुणविलासांकितपदमुकुंदं
वंदेहंप्रकृतिगुणादंभादिहरणं १ पूर्वाध्यायेजगत्सर्वंक्षेत्रज्ञसं देत्र
गतःजायतेतदितिप्रोक्तंतत्कथंचेतिकथ्यते २ क्षेत्रक्षेत्रज्ञसंयोगस्ये
श्वराधीनत्ववर्णनात्सांख्याःनिरीश्वरास्तत्रनिराकार्याश्चतद्देशेकार
णंगुणसंगोस्यसदसद्योनिजन्मसुइत्युक्तंतत्रकस्मिन्वागुणेसंगः
कथंवद्धा ३ केवागुणाःकथंवातेबध्नंतिकिंस्वभावकाःगुणेभ्य।
श्चकथंमोक्षःकिंमुक्तस्यचलक्षणं ४ तदेतद्विस्तरेणैववक्तुमारभ्य
तेधुना परंभूयःप्रवक्ष्यामीत्याद्यध्यायश्चतुर्दशः तत्रद्वाभ्यांस्तुवन्न
र्थंवक्ष्यमाणंजगद्गुरुःश्रोतृणांरोचनार्थंश्रीभगवानाहसर्ववित्

ज्ञायतेनेनतज्ज्ञानंपरात्मज्ञानसाधनं श्रेष्ठंश्रेष्ठास्पदत्वेनयज्ञा
दीनामिदंवरं बहिरंगसाधनानांमध्येश्रेष्ठफलत्वतः अमानित्वा
दिज्ञानानांत्वंतरंगत्वमितीति ९ उत्कृष्टविषयत्वेनपरमित्यमुनेरि
ते उक्तमेवेत्यनेनोत्कृष्टफलत्वात्तथा ९ प्रवक्ष्यामीदृशंज्ञानमु
क्तमप्युत्कृष्टत्वेनः शास्त्रार्थस्यावगतत्वात्परंज्ञानंश्रेष्ठसाधनं ९ सर्वे
प्रकृष्टांमोक्षाख्यांसिद्धिंप्राप्ताइतःपरंदेहबंधपरिमुक्त्यैकेवल्यमेक
पदंगताः १४ १ ।

नीलकंठी टीका १४

पूर्वाध्यायांतेभूतप्रकृतिमोक्षंचयेविदुर्यांतितेपरमित्युक्तंतत्रका
वाभूतप्रकृतिः॥ किमाश्रयेणतस्याभूतजननकर्तृत्वंकथंवाबंधकत्वंक
थंचततोमोक्षःकिंवामुक्तानांलक्षणमित्येतद्दर्शयितुंज्ञातेविवरीतुंचत
र्दशोध्यायआरभ्यते तत्ररुच्युत्पादनार्थंपरंज्ञानंस्तुवन्श्रीभगवा
नुवाच परमिति परंसर्वोत्कृष्टब्रह्मविषयत्वात् ज्ञानंभूयःपुनः
प्रसंगादुक्तमपिप्रवक्ष्यामि किं तत्स्वरूपमाह ज्ञानानाममानि
त्वादीनांज्ञानसाधनानांमध्येयदुत्तमंमोक्षफलत्वादंतरंगंतदेव
तत् अहंब्रह्मज्ञानामीत्यहमर्थस्यघटाकारवृत्तेर्घटस्यचज्ञानम
स्तीतिविषयभेदात्ज्ञानत्रयमस्ति तत्राद्यंद्वयंनांतरीयकंयद्वत
मेवरमेवप्रकाशफलरूपंज्ञानंतदेवपरंश्रेष्ठमित्यर्थः यथोक्तं
वार्तिककारैः परागर्थप्रमेयेषुयाफलत्वेनसंमता संवित्सैवेह
मेयोर्थोवेदांतोक्तिप्रमाणतइति यत् ज्ञानंज्ञात्वावेदांतवाक्यज
न्ययाधीवृत्त्याअपरोक्षीकृत्यपरांसिद्धिंमोक्षमितःसंसारात्संसा
रंविहायगताःप्राप्ताः १

आनंदीटीका १४

एवंक्षेत्रक्षेत्रज्ञयोःलक्षणंपरीक्ष्यप्रकृतिगुणपरीक्षामारभमा
णोभगवानुवाच ज्ञानानांप्रोक्तानांचानंतरात्मज्ञानानांमध्या
दुत्तमंवक्ष्यमाणमिदंज्ञानंविनातेषांप्रतिपत्तिदार्ढ्याभावात् ।

~~इतदेवतोमि~~

त्रयोदशाध्यायपरिसमाप्तौभूतप्रकृतिमोक्षंचयेविदुरितिय
दुक्तंतत्रभूतादिविकारभावमापन्नाप्रकृतिः किलभूतप्रकृ
तिशब्देनोक्ता ततश्चतस्याः कारणभूतंप्रकृत्यात्मकंतत्वम
स्तीत्यभ्युपगतंभवति तदभ्युपगमेचपरंब्रह्माद्वैतसिद्धांत
तायामाहुस्तस्यविरुध्यते इहहिनित्यैकचित्प्रकाशात्मकस्व
भावपरामर्शप्रभवपरानंदलक्षणंसमाहृत्यस्वभावव्यव
स्थितमात्मतत्वंपरब्रह्मशब्दाभिधेयमेकमेवपरमार्थसत्वेना
गमोपपत्त्युपलब्ध्यविसंवादिसिद्धंप्रबंधतः प्रतिपादितम् ॥
यस्मानादिमत्परंब्रह्मेत्यादिनालक्षणंकृतं ततश्चप्रकृतिना
मद्वितीयंतत्वमस्तीत्येतेनकथंसिध्यति किंवातस्यस्वरूपंकी
दृशोवापरंब्रह्मस्वरूपेणतत्वेनतस्यसंबंधइतियेनज्ञायते तथा
भूतप्रकृतिर्हिद्विधोक्ता शरीरात्मनाविषयात्मनाचपरिणामा
त्ततः कथमात्मनोमोक्षः किमत्यंतपरिहारेणान्यथावा तत्राद्यः
परिहारस्तावदिहनाभ्युपगतः तथाचोक्तमनादित्वान्निर्गुणत्वा
त्परमात्मायमव्ययः शरीरस्थोपिकौंतेयनकरोतिनलिप्यते त
था इहैवतैर्जितः सर्गोयेषांसाम्येस्थितंमनः इत्याद्येननशरीरभा
वपरिणतायाः प्रकृतेरत्यंतपरिहारेणमोक्षोनाभ्युपगतस्तथा
विषयभावेनपरिणतायाश्चापिनात्यंतपरिहारोभिमतः तदुक्तं
रागद्वेषवियुक्तैस्तुविषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्मा
प्रसादमधिगच्छति तथा सक्ताः कर्मण्यविद्वांसोयथाकुर्वंति
भारत कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् इत्यादिवि
वेकंचविषयरूपायाः प्रकृतेर्मोक्षइतियेनज्ञायते तदुभयार्थवि
षयज्ञानंसूक्ष्मत्वात्प्रकृष्टंतत्रतत्रउक्तमपिपुनर्वक्तुंप्रतिजानं
स्तत्प्रशंसापूर्वंभगवानुवाच उक्तेनरूपेणपरंप्रकृष्टंभूयः पुनर्व

श्री॰
गी॰टी॰
चं॰

ज्ञानंवाज्ञानानांक्षेत्रज्ञादिविषयाणांमध्येउत्तमंप्रधानंज्ञानंप्र
कर्षेणकथयिष्यामि वक्ष्यमाणज्ञानेनपूर्वोक्तज्ञानानांस
म्यक्प्रतिपत्तिर्भविष्यतीतितेषांमध्येतस्योत्तमत्वमतएवाह
यज्ज्ञात्वापूर्वेमुनयःसंयमिनःपरांसिद्धिंपरसमापत्तिलक्ष
णांप्रकृष्टांफलनिष्पत्तिमितःसंसारान्मामा यतोस्यज्ञानस्या
येप्रभावः १ ॥

नासिकी वन्नुलीटीका १५

अथप्रकृतिपुरुषविवेकार्थंतरदशाभूतांगुणातीतत्वलक्षणां
सिद्धभूमिकांविवक्षुस्तत्त्वयं ज्ञानानांपुरुषस्वरादिविषया
णांमध्यादुत्तमंभोगाभोक्तृत्वपामलसिद्धिप्रदत्वात्प्रकृष्टंपरंस्व
त्मज्ञानंवक्ष्यमाणंगुणातीतत्वरूपंभूयःप्रकृतिपुरुषविवेकेन्त
र्गतस्याप्यस्यज्ञानस्यदुरवगमत्वात्पुनरपिप्रकर्षेणवक्ष्यामि य
ज्ज्ञानंज्ञात्वाप्रतिपद्यसर्वेपिकपिलादयोमुनयःपरांसिद्धिमुत्कृ
ष्टस्वात्मनेत्यासितोस्मादेवदेहाद्गताःप्राप्ताः [illegible]
॥ १ ॥

पंचोलीटीका

ईश्वरेच्छाधीनयोःक्षेत्रक्षेत्रज्ञयोःजगत्कारणत्वंनतत्संयोगमात्रमिव
स्वतंत्रयोःकारणंगुणसंगोस्यगुणसंगस्यसंसारकारणत्वमु
क्तंतत्रकस्मिन्गुणेकथंसंगःकेवागुणाःकथंवावध्नंतिगुणे
भ्यश्चमोक्षणंकथंस्यात्मुक्तस्यकिंलक्षणमित्येवमर्थमध्यायप्रा
रंभेप्राप्तेसतिकर्मसर्ववक्ष्यमाणार्थंस्तौति परंभूयइति द्वाभ्यां
भूयःपुनरपिज्ञानानांयज्ञादिज्ञेयवस्तुविषयाणांपरंवस्तुविषय
त्वात्परमुत्तमफलत्वादुत्तमंज्ञानंप्रवक्ष्यामियज्ज्ञानंज्ञात्वाप्राप्य
सर्वेमुनयइतःस्माद्देहबंधनात्परांसिद्धिंगताः १

वीरस्तसिद्धोधिनी

श्रीकार्तवीर्यार्जुनायनमः श्रीगदाधर मदात्म रसावीरमहीभु
जः राज्येकरोमिव्याख्यानमध्यायेस्मिन्वतर्दशो पूर्वाध्या
येयावत्संजायतेकिंचित्सर्वंस्थावरजंगमं क्षेत्रक्षेत्रज्ञसंयोगा
त्तद्विद्धिभरतर्षभेत्यनेन क्षेत्रक्षेत्रज्ञसंयोगात्सर्वमुत्पद्यमानमु
त्पद्यतेइत्युक्तं तस्यैवोत्पद्यमानस्यगुणत्रयकृतंवैविध्यंस्वध
र्मस्थितिदार्ढ्यायप्रपंचयनेवंभूतमर्थंवक्ष्यमाणंप्रस्तौति स्व
यं भगवान्परंभूयइतिद्वाभ्यां परंपरवस्तुनिष्ठंज्ञायतेनेने॰
ति ज्ञानंस्वधर्मनिश्चयंभूयोपि पूर्वंकथितमपिपुनरपितुभ्यं
प्रवक्ष्यामिप्रकर्षेणस्फुटंयावक्ष्यामि कीदृशंतज्ज्ञानानांतपः
कर्मादिविषयनिश्चयानामुत्तमंश्रेष्ठंप्रीतंत्रसिद्धिदायित्वात्तदेवा
ह यज्ज्ञानंज्ञात्वाप्राप्यमुनयोज्ञानिनोनिश्चितस्वधर्मपोवापर्या
इतोस्माल्लोकात्परांसिद्धिंस्वधर्मोपेयश्रेष्ठलोकप्राप्तिलक्षणां
गताःप्राप्ताइति १॥

मधुभाष्य

साधनंप्राधान्येनोत्तरैरध्यायैर्वक्ति महद्ब्रह्मप्रकृति साचश्री
भूदुर्गेभिन्ना उमासरस्वतीत्याद्यास्तत्तदंशभूतान्यजीवाः त
थाचकार्याण्यस्याःश्रुतिः श्रीभूर्दुर्गामहतीतुमायायासालोकमू
तिर्जगतोवृद्धिकाच उमावागाद्यास्त्वन्यजीवास्तदंशास्तदु
त्मानः सर्ववेदेषुगीताइति ममयोनिरिति गर्भाधानार्थत्वो
क्तिः नतुमातात्वाकस्पोषात् तथाहिसामवेदेभाल्लवेयश्रुतौ
विलोयोनिः गर्भसंधारणार्थीमहन्मायासर्वदुःखैर्विहीना
तथाव्यामानंदुःखिवन्मोहनार्थंप्रदर्शयंतीमहद्विस्तुनासेति
ग्रतःप्रीतादुःखादिकंसर्वंमरषाप्रदर्शनमेव तथाचकूर्मपुराणे
नवेयंभूः तथाचलोकरायणश्रुतिः अन्याभूर्भूतिर्यंतेस्यक्षा

याभूतावमासाद्दिभूतैकयोनिरिति प्रवापस्वेछयाद्दास्यं
जगतांप्रपितामहीत्यायनभिम्लानश्रुतिः मस्यउरगलोक
मपिस्वेछयैव महद्रुसमाहृवाव्यापिप्रकृतिरेव महतीव्र
स्मणीहेत्वप्रकृतिश्वमहेश्वरइति तत्रैव बंधप्रकारंदर्शय
तिसाधनानुष्ठानाय १॥

भाषा अनुवाद

तेरहें अध्यायके छबीसयें श्लोक मे जो कहा कि प्रकृति औ पुरुष के संयोग से संसार की उत्पत्ति होती है ऐसी निरीश्वरवादी सांख्य मत के अवलम्बियों की निश्चय के अनुसार संसार को स्वाधीनता नही है किन्तु ईश्वर की इच्छा के क्रम ही से सो होय है यह कहते हुये भगवान श्रीकृष्ण प्रकृति पुरुष की स्वाधीनता के निवारण पूर्वक सत्व आदि गुणों के संग से संसार की विचित्रता होती है और तेरहें अध्याय के एकईसयें श्लोक मे कहा जो सत्वादि गुण से संसार की चित्रता सो अब चौदहें अध्याय मे विस्तार से भगवान कहते हैं कि और जो कहेंगे उसकी प्रशंसा दो श्लोक से कहते हैं कि परम जो परमार्थनिष्ठ जिसके द्वारा जाना जाय ऐसा जो ज्ञान उपदेश सो फेरि तुम से कहूंगा सो ज्ञान किस प्रकार का है इस अपेक्षा पर कहते है कि यह ज्ञान मोक्ष का हेतु है इससे तप औ कर्म आदि विषयक सकल ज्ञानों के बीच यह उत्तम है जिस को जानि के मुनि लोग स्थूल सूक्ष्म शरीर बन्धन से छूटि श्रेष्ठ सिद्धि रूप मुक्ति को प्राप्त भये हैं इससे ज्ञानीयोंका यह उत्तम ज्ञान है यह जानो । १ ।

दोहा

ज्ञानपरम फिर कहत हों ज्ञानदि मे वर ज्ञान जाने जिहमुनि सर्व हुं करा परम सिद्धि पद यान १ ॥

6

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः सर्गे
पि नोपजायन्ते प्रलये न व्यथन्ति च २ ॥

शाङ्करभाष्ये १

तस्याश्च सिद्धेरैकांतिकत्वं दर्शयति इदमिति इदं ज्ञानं यथोक्तमुपा
श्रित्य ज्ञानसाधनमनुष्ठायेत्येतन्मम परमेश्वरस्य साधर्म्यं मत्स्वरू
पतामागताः प्राप्ता इत्यर्थो न तु समानधर्मता साधर्म्यं क्षेत्रज्ञेश्वरयो
र्भेदानभ्युपगमात् गीताशास्त्रे फलवादश्चायं स्तुत्यर्थमुच्यते सर्गेपि
सृष्टिकालेपि नोपजायन्ते नोत्पद्यन्ते प्रलये ब्रह्मणोपि विनाशकाले
न व्यथन्ति च व्यथां नापद्यन्ते न च्यवन्तीत्यर्थः २

आनन्दगिरिकृतटीका २

ज्ञानफलस्य कर्मफलवैलक्षण्यमाह तस्याश्चेति कथं ज्ञानाश्रयणं
तदेतच्छ्रवणादिसम्पत्तिद्वारेत्याह ज्ञानेति साधर्म्यं [illegible]गवययोरिव विद्व (म)
दीश्वरयोरपि भेदः स्यादित्याशंक्याह मत्स्वरूपतामिति साधर्म्यस्य
मुख्यत्वे भेदधीव्याङ्गीताशास्त्रविरोधः स्यादित्याह न त्विति ज्ञानस्तुतये
तत्फलस्य विवक्षितत्वाच्च नात्र सारूप्यमिष्टमित्याह फलेति सारूप्ये
धीफले हित्वा ध्यानफलमप्रस्तुतं प्रसज्येतेत्यर्थः ईश्वरात्मतां गतानामे
व श्चवान्तरसर्गादौ जन्माद्यभावेपि महासर्गादौ तद्भविष्यतीत्याशंक्याह
सर्गेपीति २

स्वामिकृतटीका ३

किंचेदमिति इदं वक्ष्यमाणं ज्ञानमुपाश्रित्य इदं ज्ञानसाधनमनुष्ठाय म
म साधर्म्यं मद्रूपत्वं प्राप्ताः संतः सर्गे पि ब्रह्मादिषूत्पद्यमानेष्वपि नोत्पद्यं
ते तथा प्रलयेपि न व्यथंति प्रलयदुःखं नानुभवंति न पुनरावर्तंत इत्य
र्थः २

पैशाचभाष्यसटीका ४

इदमिति ममेश्वरस्य साधर्म्यं सधर्मतां न व्यथंति न चलंतीति २

रामानुजभाष्यटीका ५

(पुनरपि ज्ञानं फलेन विशिनष्टि)
इदमिति इदं वक्ष्यमाणं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः मत्साध
र्म्यं प्राप्ताः सर्गेपि नोपजायंते न सृष्टिकर्मतां भजंते प्रलये न व्यथंति च न

श्री
गी टी
चं.

मतिकर्मतो भजन्ते [illegible]
[illegible] २

यज्ज्ञात्वेत्यनेनास्य ज्ञानस्य दृष्टफल
यतोऽप्रसिद्धिं वाह

अभिनवश्रमकृतटीका ६

अयं तीर्थ छन्दसना त्रिष्टप्छयः एवमन्यत्रापि त्रिष्टप्छये वाच्ये २

परमार्थप्रपाटीका ७

ज्ञानफलमाह इदमिति इदं वक्ष्यमाणं ज्ञानमुपाश्रित्य सम्यगनुष्ठाय मम
मम साधर्म्यं सारूप्यं प्राप्ताः सन्तः सर्गेऽप्यादिसर्गे ब्रह्मादिरूपेण प्रथमानेऽ
पि न उपजायन्ते नोत्पद्यंते महाप्रलयेऽपि न व्यथंति प्रतिप्रलयाद्दुः
खानि नानुभवंति [illegible] २ ॥

वनमालीटीका ८

इदं यथोक्तं वक्ष्यमाणं च ज्ञानमुपाश्रित्यानुष्ठाय मम नित्यमुक्त
स्य स्वरूपेण स्वनिर्मुक्तत्वरूपेण दृष्ट्वादिना साधर्म्यं समानधर्मत्व
तद्रूपां मुक्तिं गताः मम समानधर्मत्वमेव सायुज्यरूपां मुक्ति
स्तां गताः यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं तदा विद्वान्
पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीति श्रुतेः भोग
मात्रसाम्यलिंगाच्च जगद्व्यापारवर्जमित्यादिसूत्राच्च सर्गेऽपि च
न मे खाद्युत्पत्तिकाले न जायंते न नवीनदेहान् प्राप्नुवंति प्रल
ये ब्रह्मणो विनाशकाले न व्यथंति न व्यथ्यंते न च देहादिवियो
गद्रूपं प्रलयं प्राप्नुवंतीत्यर्थः २ ॥

ऋसमवैजयंतीटीका ९

अस्य ज्ञानस्य किं फलं भवतीत्यपेक्षायामाह इदमिति मदनुग्रह
सहकृतया गुरूपासनया इदं वक्ष्यमाणं ज्ञानमुपाश्रित्य प्राप्य मद
क्ताः पुरुषाः मम सर्वेश्वरस्य परमप्राप्यस्य सर्वनियंतुः साधर्म्य ९
साम्यं मज्ज्ञावाप्तिमागताः प्राप्ताः सन्तः सर्गेऽपि नोपजायंते स्वजिकर्म

दुःख

तोनाभवंति चपुनःप्रलयेनव्यथंति[illegible]कर्तृत्वंनयांतिये

मज्ज्ञानंप्राप्तास्ते निःसंसारेजन्ममरणभयरहिताभवंतीत्यर्थः

इत्यनेनजीवानांवस्तुत्वमुक्तंतद्विष्णोःपरमंपदंसदापश्यंतिसू

ब रयइत्यादयःश्रुतयश्चैतदेवंवदंतियेकेचिज्जीवानामेकत्वंवदं

तितन्मतंश्रुतिसंमतंभगवद्वचनेनैवनिरस्यतेपूर्वंखंडितंचा

तोत्रविरम्यते २ ॥

मधुसूदनीटीका ९

तस्मात्सिद्धैकांतिकत्वंदर्शयति इदंयथोक्तंज्ञानंज्ञानसाध

नमुपाश्रित्यानुष्ठायममपरमेश्वरस्यसाधर्म्यमद्रूपतामत्य

ताभेदेनागताःप्राप्ताःसंतःसर्गेपिहिरण्यगर्भादिषूत्पद्यमाने

ष्वपिनोपजायंते प्रलयेब्रह्मणोपिविनाशकालेनव्यथंति

चनव्यथंतेनचलीयंतेइत्यर्थः [illegible]

[illegible]

[illegible]

[illegible] २ ॥

सदानंदीटीका ११

ऐकांतिकत्वमेतस्याःसिद्धेर्दर्शयतीश्वरः इदंसम्यगनुष्ठायय

थोक्तंज्ञानसाधनं १ मद्रूपताभभेदेनप्राप्ताःसंतोविपश्चितः

भूतेषूत्पद्यमानेषुनोत्पद्यंतेकदाचन २ ब्रह्मणोनाशकालेपि

नलीयंतेचलंतिन ॥ २ ॥

नीलकंठीटीका १२

इदंज्ञानंविषयविषयिरूपविकल्पविनिर्मुक्तंउपाश्रित्यमम

ईश्वरस्यसाधर्म्यंसर्वात्मत्वंसर्वनियंतृत्वंसर्वभावाधिष्ठातृत्व

मित्यादिधर्मसाम्यंसाधर्म्यंगताः तथाचश्रुतयोयएवंवेदाहं

ब्रह्मास्मीतिसइदंसर्वंभवति सर्वस्यवशीसर्वस्येशानःसर्वस्या

धिपतिः सनसाधुनाकर्मणाभूयान्नोएवासाधुनाकनीयानि

तिज्ञानफलंईश्वरसाधर्म्यप्राप्तिमाहुः किंच भसंशीप्रभृतयो

ज्ञानबलादेवसर्गेपिनजायंतेप्रलयकालेचनमहत्तभावंगच्छं

तोनमलयाग्प्रादिभिर्व्यथंतेव्यथांप्राप्नवंति इदंश्लोकद्वयं भाष्येवक्ष्यमाणज्ञानस्तत्पर्थत्वेनैवव्याख्यातं तज्ज्ञानमुपाश्रित्यज्ञानसाधनमनुष्ठायेतिपदार्थः शेषंस्पष्टं २ ॥

पतदेवस्तौति सद्गुरू

आनंदीटीका ३

इदंवक्ष्यमाणंज्ञानमेवाह २ ॥ ॥

रामकेटीटीका ४ ॥

इदंज्ञानंवक्ष्यमाणमाश्रित्यसुगृहीतंकृत्वान्येपियोगिनोमम साधर्म्यमज्ञावाभेदंप्राप्ताः संतपतज्ज्ञानमुख्यदेहज्ञानरवक्षगप्रलययोरपिनोत्पादविनाशव्यपदेशभाजोभवंति पारमार्थिकनित्यत्वाभिव्यक्तेःश्रेष्ठंतज्ज्ञानं वक्तुमाह २ ॥

लासिकी ...टीका ५

यतोस्यज्ञानस्यायंप्रभावः इदंवक्ष्यमाणंज्ञानंगुणातीतत्वलक्षणमुपाश्रित्यस्वाधीनंकृत्वा कपिलादयोमुनयोममेश्वरस्यसाधर्म्यंप्रकृतिपुरुषयोर्यथेष्ठ विनियोक्तृत्वलक्षणंसमानैश्वर्यमागताः प्राप्ता ततःकिमित्यतआह सर्गेपिसत्कल्पकेब्रह्मादीनांसर्जनकालेपितेपरतन्त्रतयानोपजायन्ते स्वाधीनप्रकृतितयायादृच्छिकजन्मत्वात् तथाप्रलयेतेषांलयकालेनव्यथंतिनबिभ्यतिच उक्तप्रकारेणस्वतंत्रस्मृत्वात्[illegible]मात्

२

पंचोलीटीका

इदमिति ज्ञानसाधनान्तुष्ठानात् इदंयथोक्तज्ञानमुपाश्रित्य प्राप्यममसाधर्म्यमागताः मत्स्वरूपतांप्राप्ताः सर्गेपिसृष्टिकालेपिनोपजायंतेनोपपद्यंते च पुनःप्रलयेब्रह्मणोनाशकालेपिनव्यथंतिनचलंति २

रमावीरसमिद्धोयिनी

नकेवलमुत्तमलोकप्राप्तिरेवास्यज्ञानस्यफलं किंतु मत्साय

र्थमपि सम्यगनुष्ठितेनानेनैवाधिगम्यमित्याह इदमिति इदं
वक्ष्यमाणं ज्ञानमुपाश्रित्य ज्ञानसाधनमनुष्ठाय ममसाधर्म्यं
मद्रूपत्वं ये प्राप्ताः संतस्ते सर्गे सृष्टिकाले ब्रह्मादिषूत्पद्यमाने
ष्वपि नोत्पद्यंते प्रलयकालेपि ब्रह्मणोपि विनाशकालेन व्य
थंति न च लीयंते यद्वा प्रलयदुःखानि नानुभवंतीत्यर्थः २॥

मधुभाष्य

२॥

9

भाषा अनुवाद

और यही ज्ञान अर्थात् ज्ञान का साधन जो अब तुम से कहूंगा जिस का अनुष्ठान करि के कहे आश्रय ले के सारूप्य मुक्ति को प्राप्त सकल मुनिजन सर्ग कहे ब्रह्मादिक की उत्पत्ति होनेसे भी उत्पन्न नहीं होते हैं और प्रलय काल मे भी प्रलय के दुख को नहीं भोगते हैं अर्थात् पुनरागमन से रहित हो जाते हैं। २।

दोहा

आश्रय कर यह ज्ञान हूं मो सादृश्य को पाय जन्म न सृष्टि काल मे प्रलय न हि दुख पाय २॥

10

ममयोनिर्महद्ब्रह्मतस्मिन्गर्भंदधाम्यहं संभ
वःसर्वभूतानांततोभवतिभारत ३

शाङ्करभाष्य १

क्षेत्रक्षेत्रज्ञसंयोगईदृशोभूतकारणमित्याह ममेति मम स्वभूता म
दीया माया त्रिगुणात्मिकाप्रकृतिर्योनिः सर्वभूतानां सर्वकार्येभ्योमह
त्वात् भरणाच्च स्वविकाराणां महद्ब्रह्मेति योनिरेव विशिष्यते तस्मिन्
महति ब्रह्मणि योनौ गर्भं हिरण्यगर्भस्य जन्मनोबीजं जन्मनोबीजं
सर्वभूतजन्मकारणं बीजं दधामि निक्षिपामि क्षेत्रक्षेत्रज्ञप्रकृतिद्व
यशक्तिमानीश्वरोहमविद्याकामकर्म्मोपाधिस्वरूपानुविधायिनं क्षे
त्रज्ञं क्षेत्रेणसंयोजयामीत्यर्थः संभवउत्पत्तिः सर्वभूतानां हिरण्यग
र्भोत्पत्तिद्वारेणततस्तस्मात् योनेर्मूलकारणाद्गर्भाधानात् भवति ३

आनन्दगिरिकृतटीका २

तानन्तर्मा तदभिमुखायाव्यवहितवचनस्य विवक्षितमर्थमाह क्षेत्रेति
स्वरूपत्वेन स्वभूतत्वं वारयति मदीयेति ईश्वरीं शक्तिं आवर्तयति
त्रिगुणात्मिकेति सांख्यीयप्रकृतिरपि मदीयेति आवर्तिता योनिश
ब्देन सर्वाणि भवनयोग्यानि कार्याणि प्रत्युपादानत्वमभिप्रेतमित्या
ह सर्वभूतानामिति प्रकृतेर्महत्त्वं साधयति सर्वेति सर्वकार्यव्याप्ति
मादाय योनावेव ब्रह्मशब्दः न लिङ्गवैषम्यान्महद्ब्रह्मणोरर्थान्तरं कि
चिदित्याशंक्याह योनिरिति तस्मिन्नित्यादि व्याचष्टे तस्मिन्निति ई
दृशस्य क्षेत्रक्षेत्रज्ञसंयोगस्य भूतकारणत्वमिति वक्तुमुपक्रम्य
किमिदमप्रदर्शितमित्याशंक्याह क्षेत्रेति गर्भशब्दो नोक्तसंयोग
स्य फलं दर्शयति संभवइति आदिकर्ता स भूतानां इति स्मृत्वा हि
रण्यगर्भकार्यत्वावगमाद्भूतानां कथं यथोक्तगर्भाधाननिमित्तत्व
मित्याशंक्याह हिरण्यगर्भेति ३

स्वामिकृतटीका १

तदेवंप्रशंसयाश्रोतारमभिमुखीकृत्यपरमेश्वराधीनयोःप्रकृतिपु
रुषयोःसर्वभूतोत्पत्तिंप्रतिहेतुत्वंनतुस्वतंत्रयोरितीमंविवक्षितमर्थं

श्री
गी॰ टी॰
२॰

कथयति ममेति देशतः कालतश्चानवच्छिन्नत्वान्महत् बृंहणत्वाच्च·
स्वकार्याणां वृद्धिहेतुत्वाद्ब्रह्म प्रकृतिरित्यर्थः तत् महद्ब्रह्म मम परमे
श्वरस्य योनिर्गर्भाधानस्थानं तस्मिन् गर्भं जगद्विस्तारहेतुं चिदाभासं
दधामि निःक्षिपामि प्रलये मयि लीनं सन्तमविद्याकामकर्मानुशय
वन्तं क्षेत्रज्ञं सृष्टिसमये भोगयोग्येन क्षेत्रेण योजयामीत्यर्थः ततो ग
र्भाधानात्सर्वभूतानां ब्रह्मादीनां संभव उत्पत्तिर्भवति १

पिशाचभाष्यटीका ४

मम मत्स्वरूपिणी प्रकृतिः सर्वकार्यापेक्षया वर्धमाना च महद्ब्रह्मे
ति योनिरेवं विशिष्यते गर्भं हिरण्यगर्भस्य बीजं वीर्यं चेतनं प्रकृतिद्व
यशक्तिमानीश्वरोऽहं दधामि क्षेत्रज्ञं क्षेत्रेण संयोजयामीत्यर्थः संभ
वस्ततः सर्वभूतानां हिरण्यगर्भोत्पत्तिद्वारेणैवेत्यर्थः २

+अथ प्राकृतानां गुणानां बंधहेतुताप्रकारं वक्तुं स
र्वभूतजातस्य प्रकृतिसंसर्गजत्वं यावत् संजायते
किंचिदित्यनेनोक्तं भगव
ताऽखिलेन वक्तुमित्याह॥

रामानुजभाष्यटीका ५

+ममेति मम महद्ब्रह्म कृत्स्नस्य जगतो योनिभूतं महद्ब्रह्म यत्तस्मिं
गर्भं दधाम्यहं भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च अहंकार इती
यं मे भिन्ना प्रकृतिरष्टधा अपरेयमिति निर्दिष्टाचेतना प्रकृतिर्महदहं
कारादिकारणतया महद्ब्रह्मेत्युच्यते श्रुतावपि क्वचित् प्रकृतिर्ब्रह्मे
ति निर्दिश्यते यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नाम
रूपमन्नं च जायते इति इतस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूतामिति
चेतनपुंजरूपा या प्रकृतिर्निर्दिष्टा सेह सकलप्राणिबीजतया गर्भ
शब्देनोच्यते तस्मिन्नचेतने योनिभूते महति ब्रह्मणि चेतनपुंजरूपं गर्भं
दधामि अचेतनप्रकृत्या भोगक्षेत्रभूतया भोक्तृवर्गपुंजभूतां चेतन
प्रकृतिं संयोजयामीत्यर्थः ततः तस्मात् प्रकृतिद्वयसंयोगात्मत्कृ
तात्सर्वभूतानां ब्रह्मादिस्तम्बपर्यन्तानां संभवो भवति [illegible]

अभिनवगुप्तकृतटीका ६

+शक्तिमालंब्याहमनादी
नामाणूनतु गृह्णार्थं सं
सारयामि । ३॥

तत्रादौ संसृतिक्रममाह ज्ञानशेऽज्ञाने तत्कारणे च स्वकरे हि ज्ञानं मम तावद्व्यपदेश्य
परमानंदरूपस्य महद्ब्रह्म सहेहकात्मीयशक्तिरूपं च स्वात्मीयामवह्निविमर्श+

परमार्थप्रपाटीका ७

तदेवं श्रीतारमभिवल्लीकल्पपरमेश्वराधीनयोः प्रकृतिपुरुषयोः सर्वभूतोत्प
त्तिहेतुत्वेन तत्वं तयोरिति विवक्षितमर्थं कथयति ममेति ॥

मम योनिर्गर्भस्थानं महद्ब्रह्म देशतः कालतश्चापरिच्छिन्नं महा
न्तं बृंहणात्सर्वकार्याणां बृंहितहेतुभूतं ब्रह्म एवंविधं मायाख्यं तस्मि
न्गर्भं हिरण्यगर्भरूपं दधामि ततो गर्भाधानात् सकाशात्सर्वभूता
नां ब्रह्मादीनां संभवो भवति [illegible]
[illegible]

तदेवं श्रोतारमभिमुखीकृत्य परमेश्वराधीनजीवप्रकृतिसंथा वं
न सृष्टिं तन्निरीश्वरसांख्यानामिव स्वतन्त्रप्रकृतिपुरुषयोगा
देवेतीमं विवादितमर्थमाह मम योनिरिति द्वाभ्यां सर्वकार्यापेक्षयाधि
कत्वात्कारणं महत् सर्वकार्याणां बृंहितहेतुत्वाद्वा बृंहणा
द्ब्रह्म प्रधानं तच्च मम मे ईश्वरस्य योनिर्गर्भाधानस्थानं तस्मिन्महद्
ति ब्रह्मणि योनौ गर्भं सर्वभूतजन्मकारणं बहु स्यां प्रजा
येयेतीक्षणरूपं संकल्पं दधामि यथाहं गुरुः स्यामिति संकल्प
शिष्यास्य पापघ्नश्च गुरुर्भवति तथैव तदीयमितयाहं बहु स्यामिति
संकल्पप्रकृतिं क्षोभयित्वा नियम्यानुत्पाद्य बहु भवतीत्यर्थः
ईक्षणाधानं नाम क्षणविषयत्वं यथाहि पिता पुत्रं बीजाधाना
रूपेण स्वस्मिन्नलीनं देहेन योजयितुं रेतःसेकपूर्वकं गर्भ
माधत्ते ततो गर्भाधानात्स्त्रीदेहेन युज्यते तदैव कलला
द्यवस्था भवति तथा प्रलये मयि लीनमविद्याकामकर्माश
यवन्तं जीवं सृष्टिकाले भोग्येन क्षेत्रेण कार्यकारणसंघातेन
योजयितुमीक्षणपूर्वकं गर्भं प्रकृतावादधामि तदैव च महदा
काशवायुतेजःपृथिव्याद्यवस्थाः ततो गर्भाधानात्संभव उत्प
त्तिः सर्वभूतानां हिरण्यगर्भादीनां भवति प्रकृतिं पुरुषं चैव
प्रविश्यात्मेच्छया हरिः क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्य
याविति वैष्णवोक्तेः ॥ ३ ॥

श्री॰
गी॰ टी॰
७॰

हनुमद्वैनयंतीटीका ९

एवंज्ञानफलमुक्त्वेदानीं जीवस्य यः प्रकृतिसंबंधः स किं जीव
कृतः किमीश्वरकृत इत्याशंक्य यावत्संजायते किंचित्सत्त्वमि
त्यादिनोक्तस्तयोः संयोगो मयेश्वरेणैव कृत इत्याह द्वाभ्यां मम
योनिरिति ममानंतकोटिब्रह्मांडस्य सर्वेश्वरस्य महत्सर्व
जगत्कारणत्वादभिव्यक्तगुणत्रयात्मकं प्रधानं तस्मादेतद्ब्रह्मना
मरूपमन्नं च जायत इति श्रुतेः योनिर्गर्भधारणस्थानं भवति
तस्मिंजगतो योनिभूते प्रधानाख्ये महति ब्रह्मणि गर्भं चेतनरा ९
शिरूपमहं दधामि योगेन भूतयावितनप्रकृत्या सह भोक्तृव
र्गपुंजभूतं चेतनं प्रकृतिसंयोजयामीत्यर्थः ततस्तस्मा
त्संयोगात्प्रकृतिद्वयसंयोगरूपाद्गर्भाधानात्सर्वभूतानां ब्र
ह्मादिस्थावरांतानां संभव उत्पत्तिर्भवति यथाहं सर्वेश्वरो जी
वानां संसारनिवृत्तये मत्प्राप्तये चैव प्रकृत्या सह तान्संयोजयामि
ततं वा यथा यथाव भरतोपलक्षिता मदंशकाः प्रियव्रतर्षभभर
तधुवपृथुवरीषलादयो राजानोपि स्वधर्मभूतया सत्त्वस्वभावा
य॰ परपर्यायप्रकृत्या सह स्वप्रजा पुत्रादीनां दायेवमसंयोजयंत
तथा त्वमप्येवं स्वधर्मभूतं युद्धादिकर्म कृत्वा पुत्रादीनुपदिश्य
मत्प्रामयेलं कुर्विति संबोधनाभिप्रायः ३ ॥

+ तदेवं प्रशंसया श्रोतारमभिमुखीकृत्य परमेश्वरा
धीनयोः प्रकृतिपुरुषयोः स
र्वभूतोत्पत्तिं प्रति हेतुत्वं न
तु सांख्यसिद्धांतवत्स्वतं
त्रयोरितीमं विवक्षितम
र्थमाह द्वाभ्यां ॥

मधुसूदनीटीका ९॰

+ सर्वकार्यापेक्षयाधिकत्वात्कारणं महत् सर्वकार्याणां वृद्धिहे
तुत्वरूपाद्बृंहणत्वाद्ब्रह्माव्यक्तं प्रकृतिस्त्रिगुणात्मिका माया
मम ईश्वरस्य तच्च मम परमेश्वरस्य योनिर्गर्भाधानस्थानं तस्मिन्म
हति ब्रह्मणि योनौ गर्भं सर्वभूतजन्मकारणं बहु स्यां प्रजायेये
तीक्षणरूपं संकल्पं दधामि धारयामि तत्संकल्पविषयीकरो
मीत्यर्थः यथा हि कश्चित्पिता पुत्रमनुशायिनं ब्रीह्याद्याहाररूप

ण तस्मिंल्लीनं शरीरेण योजयितं योनौ रेतःप्रसेकपूर्वकं गर्भमाध
त्ते तस्माच्च गर्भधानात् स पुत्रः शरीरेण युज्यते तदर्थं च मध्ये
कललाद्यवस्था भवति तथा प्रलये मयि लीनमविद्याकामक
र्मानुशयवंतं देवत्रं क्षेत्रं सृष्टिसमये भोग्येन देहेन क्षेत्रेण कार्यकारणस
घातेन योजयितं चिदाभासाख्यरेतःसेकपूर्वकं मायाख्ये नित्यू
यं गर्भमादधामि तदर्थं च मध्ये आकाशवायुतेजोजलपृथि
व्याद्युत्पत्त्यवस्था ततो गर्भाधानात् संभव उत्पत्तिः सर्वभूतानां हि
रण्यगर्भादीनां भवति हे भारत न त्वीश्वरगर्भाधानं विनेत्यर्थः
[illegible]
[illegible] ३ ॥

सदानंदीटीका ४

श्रोतारं संमुखीकृत्य तदेवं सप्रशंसया देवक्षेत्रज्ञयोरीशाधी
नयोरेव हेतुता १ ततः स्वतंत्रयोः सर्वभूतोत्पत्तिप्रतिसंचये सा
ख्येनिरीश्वरं चेत्यं परा कर्तुमितीर्यते २ स्वकार्यापेक्षयाधिका
त्कारणं महदुच्यते कार्याणां वृद्धिहेतुत्वाद्बृंहणत्वाच्च कारणं ब्र नु८
ह्मास्त्यव्याकृतं माया प्रकृतिस्त्रिगुणात्मिका मम मेश्वरस्य तच्चोक्तं
योनिर्गर्भाधृतेः स्थलं तस्मिन् महति मायाख्ये सर्वभूतैककारणे
गर्भमीक्षणसंकल्पधारयाम्यहमीश्वरः ५ तदुक्तं स्यां प्रजायेये
तीक्षणरूपमीरितं यथा कश्चित्पिता पुत्रमनुशयिनमान्तरं ६
व्रीह्याद्याहाररूपेण स्वस्मिंल्लीनमलक्षणं योजयितं शरीरेण यो
नौ रेतःप्रसेचनात् ७ तमलक्षणं योजयितं शरीरेण योनौ रेतः।
गर्भमाधत्त पतस्माद्गर्भाधानात्स पुत्रकः युज्यते स्वशरीरेण
तदर्थं मध्यगाश्चापि भवंति कलिलाद्याया अवस्था वक्ष्यथाहिताः
तथा मयि लये लीनमविद्याकामकर्मभिः देवत्रं क्षेत्रं सृष्टिसमये दे
त्रेण तदर्थशालिना कार्यकारणसंघातरूपेण विघ्नकात्मना ८
योजयितुं चिदाभासाख्यरेतःसेकपूर्वकं मायाह्मस्याख्यगर्भं च

धारयाम्यहमीश्वरः तदर्थमथ्याकाशाद्युत्पत्त्यादिद्वाराप्रपिग
र्भाधानाज्जनिस्तस्माद्ब्रह्मादीनांशरीरिणां नत्वीश्वरकृतंचैवंग
र्भाधानमपेक्षते जनिः ३ ॥

नीलकंठीटीका १२

अथेदानींकावाभूतप्रकृतिः किमाश्रयेणतस्याभूतजनकत्वंत
दाह ममेति ममस्वरूपचिन्मात्रस्ययोनिः प्रवेशस्थानं महद्ब्रह्म
महत्तत्वस्यप्रथमकार्यस्यब्रह्मत्वंहेतुकंकारणमव्यक्ताव्याकृता
परपर्यायंत्रिगुणात्मकंमायाख्यंतस्मिन्गर्भंस्वप्रतिबिंबरूपं
दधामिअर्पयामिअहंचिदात्मा ततोमत्प्रतिबिंबगर्भितायाः
मायातः सर्वेषांभूतानांभवनधर्मणांमहदादीनांहिरण्य
गर्भादीनांचसंभवउत्पत्तिर्भवतिहेभारत एतेनचित्प्रतिबिं
बसापेक्षत्वोपपादनेनप्रकृतेः सांख्याभिमतंस्वातंत्र्यंनिरस्तं ३

आनंदीटीका १३

इदंवदन्प्रमाणंज्ञानमेवाह महद्ब्रह्म सूक्ष्मस्यपरब्रह्मणोपे
क्षया महत्तस्थूलंमत्स्वरूपमेवस्वकार्याणां [illegible] कंभूतप्र
कृतिः ममजगतोकर्तुरीश्वरस्यनीरूपस्यसरूपस्यवायोनिः
बीजानामधिकरणंगर्भाधानदेशंभवतितस्मिन्नकृत्याख्ये
महतिब्रह्मणिगर्भंनिजमंशंजीवंधारयामिततः भोक्तृभो
ग्यसंयोगाज्जातानांचराचराणांसंभवोभवति ३ ॥

रामकंठीटीका १४

यदेतज्जगत्प्रकृतिकारणभावेनव्यवस्थितंतत्त्वंपरब्रह्मणोभि
न्नत्वेनाशंकितंतस्मात्परमार्थतोनभिन्नं ब्रह्मैवतत्किंतुमह
त्तदपेक्षयास्थूलंयतोवेदान्तयापरामृश्यमानममपरब्रह्म
स्वरूपस्यजगज्जावक्रीडनकोत्पादनादिकारणत्वाद्योनिस्त
त्तस्मिन्परमार्थतोहियोनिभूतेमहतिब्रह्मण्यहंगर्भंद्रष्टृणामि
संविलद्वक्षणस्ववीर्यसंक्रांतिंकरोमीत्यर्थः किमनेनोक्तंभव

ति यथोक्तलक्षणपरब्रह्मस्वरूपं परामेषप्रकृतिलक्षणं ततमव
भासयामि तस्येदंतायामपि प्रकाशानुप्रवेशं विना प्रकाशमान
त्वाभावात् ब्रह्मस्वरूपत्वेऽप्यवच्छिन्नवेद्यस्वरूपत्वात्तस्य सूत्रत्वमि
ति सकलजगज्जीवभेदैकहेतुभूतेदंतात्मकं महद्ब्रह्ममम जग
त्सिसृक्षारसिकस्य योनिस्थानीयमत एवाह । सर्वभूतानां चरा
चराणां समस्तानां प्राणभृतां ततस्तस्मादिदं तया परामृष्टमाण
स्वभावादेव संभव उत्पत्तिस्तदेतदस्पष्टतत्त्वरूपत्वं पारमेश्वर्याः
मायाशक्तेः स्पष्टत्वावस्थयपरमार्थमनेन प्रतिपादितं यन्मत्ता
गपि स्वरूपप्रच्युत्यभावेऽसतीत्थं नानाभावजगत्प्रपंचरूपतया
वभासमानत्वमेतत्त्वेवंविधमाश्चर्यरूपत्वं गर्भीकृत्य स्वरूपं प्रा
कृ प्रतिपादितं दैवीह्येषा गुणमयी मम माया दुरत्यया मामेव
ये प्रपद्यंते मायामेतां तरंति ते [illegible]
[illegible] ३ ॥

+ तत्रसाधर्म्यमित्युक्तौ साम्यं नईश्वर
रूपस्यधर्ममाह ॥

लासिकी [illegible] टीका ५

+ मम ईश्वरस्य सर्वविधशक्तिरूपं महद्व्यापकं ब्रह्मस्वरूपगोपनरूपा
येश्वरी प्रकृतिर्योनिर्भूतानामुत्पत्तिक्षेत्रम् तस्मिन्नेतस्मिन्नहमीश्व
रो गर्भं चिदंशं दधामि निक्षिपामि भूतप्रकृतेर्व्याप्त्यर्थं महद्ब्र
ह्मोपादानम् किमुक्तं भवति स्वकीयमेव चिदंशं स्वस्पष्टार्थं स्वरू
पगोपनमवलम्बयामीति ततः स्वस्वभावाच्छादनमुपनामि
तास्चिदंशास्त्वनुषाभिधानास्सर्वेषामुत्पत्तिः भवति [illegible]
[illegible] ॥ ३ ॥

पंचोलीटीका

हे भरतेत्रज्ञसंयोग ईश्वरेच्छाधीन एव जगत्कारणं न तु सांख्याभि
डांतवत्स्वतंत्र इत्याह मम योनिरिति हे भारत महद्ब्रह्म सर्ववि
काराणां धारणात्सर्वकार्येभ्यो महत्वाच्च महद्ब्रह्म सर्वभूतानां यो

नि:त्रिगुणात्मिकामायाममदीयाअहंतस्मिन्महद्ब्रह्मणियो
नौमायायांगर्भंसर्वभूतजन्मकारणंबीजंदधामिधारयामिक्षेत्रे
णसहक्षेत्रज्ञंयोजयामीत्यर्थः सर्वभूतानांततः गर्भाधानात्संभवो
उत्पत्तिर्भवति २

धणवीरससिद्धोधिनी।।

तदेवंप्रपंचंमयाश्रोतारमभिमुखीकृत्यस्वाधीनतयाप्रकृति
पुरुषौभूतोत्पत्तिंप्रतिहेतुत्वंभजतोनस्वतंत्रयेतीममर्थंवि
वक्षितंकथयतिद्वाभ्यांममयोनिरितिदेशतःकालतश्चानव
च्छिन्नत्वान्महद्ब्रह्मणत्वाच्चसर्वकार्याणांहेतुत्वाद्ब्रह्मप्रकृति
रित्यर्थः तन्महद्ब्रह्मपरमेश्वरस्ययोनिर्गर्भाधानस्थानं तस्मिन्
हंगर्भंजगद्विस्तारहेतुबीजंदधामि निक्षिपामि प्रलयकाले
मयिलीनंसंतमविद्याकाम्यकर्मानुशयवंतंक्षेत्रज्ञंसृष्टिकाले
भोग्येनक्षेत्रेणसंयोजयामीत्यर्थः ततोगर्भाधानात्सर्वभूतानां
ब्रह्मादीनांसंभवउत्पत्तिर्भवतीति ३।।

मधुभाष्य

३।।

भाषा अनुवाद

उसी ज्ञानसाधन की प्रशंसा करि श्रोता अर्जुन को श्रवण की
अभिलाष बढ़ाय परमेश्वर के आधीन जो प्रकृति औ पुरुष ये
दोनो सकल भूत मात्र की उत्पत्ति के कारण हैं परंतु स्वाधीन प्र
कृति पुरुष की कारणत्व नहीं है यही तात्पर्य अब कहते हैं
कि प्रकृति देश औ काल से अपरिछिन्न अर्थात् सब से भिन्न
महत कहे अनन्त समस्त कार्य की हेतु रूप ब्रह्म है सो यही म
हत ब्रह्म नाम जो प्रकृति सो परमेश्वर स्वरूप हमारी जोनि है अर्था
त् गर्भधारण का स्थान है सो इसी प्रकृति मे मै गर्भ कहे जगत के
विस्तार का हेतु चिदाभास कहे चेतन अंश बीजरूप को स्थापन
करता हूं और प्रलयकाल मे हमारे ही मे लीन होय है और अ
विद्या से उत्पन्न जो काम्य कर्म्म तिन के संस्कार से युक्त देवन्त ।
आत्मा को सृष्टि काल मे भोग्य जो क्षेत्र कहे नाना प्रकार देह ति
न मे सम्यक् प्रकार देह तिन से योग करता हूं और वही गर्भ
आधान से ब्रह्मा आदि समस्त भूत की उतपति होती है हे भरत
अर्जुन श्रवण करो ।३।

दोहा

मो योनि महा ब्रह्म है गर्भ धर होता मेंह भारत सम्भव जीव को
हो संभवता तेंह ३॥

15

सर्वयोनिषु कौंतेय मूर्तयः संभवंति याः तासां
ब्रह्म महद्योनिरहं बीजप्रदः पिता ४ ॥

शांकरभाष्यं १

सर्वयोनिष्विति देवपितृमनुष्यपशुमृगादिसर्वयोनिषु कौंतेय मूर्तयो देहसंस्थानलक्षणमूर्छितांगावयवा मूर्तयः संभवंति यास्तासां मूर्तीनां ब्रह्म महत् सर्वावस्था योनिः कारणमहमीशो बीजप्रदो गर्भाधानस्य कर्ता पिता ४ ॥

आनंदगिरिटीका २

ननु कथमुक्तकारणानुरोधेन हिरण्यगर्भोद्भवमभ्युपेत्य भूतानामुत्पत्तिरुच्यते देवादिजातिविशेषेषु देहविशेषाणां कारणांतरसंभवान्नेत्याह सर्वयोनिष्विति नयतद्देहंतरप्रतिभाषे अतोस्य हेतुत्व मित्याशंक्य न तद्रूपेणैवावस्थानादित्याह सर्वावस्थमिति ४ ॥

स्वामिकृतटीका ३

न केवलं सृष्टप्रक्रम एवमदंशिष्टिताभ्यां प्रकृतिपुरुषाभ्यामयं भूतोत्पत्तिप्रकारः अपितु सर्वदैवेत्याह सर्वयोनिष्विति सर्वासु योनिषु मनुष्यादियोनिषु या मूर्तयः स्थावरजंगमात्मिका उत्पद्यंते तासां मूर्तीनां महद्ब्रह्म प्रकृतिर्योनिर्मातृस्थानीया अहं च बीजप्रदो गर्भाधानादिकर्ता पिता ४

पिशाचभाष्यटीका ४

सर्वयोनिषु देवाद्यामूर्तयः संस्थानानि विशिष्टानि भूतानि तासां ब्रह्म महद्योनिरहं वासुदेवः ४ ॥

रामानुजभाष्यटीका ५

+कार्यावस्थापि चिदचित्प्रकृतिसंसर्गो मयैव कृत इत्याह ॥

+सर्वेति सर्वासु देवगंधर्वयक्षराक्षसमनुष्यपशुमृगपक्षिसरीसृपादिषु योनिषु तत्तन्मूर्तयो याः संभवंति जायंते तासां ब्रह्म महद्योनिः कारणं मया संयोजितचेतनवर्गा महदादिविशेषांता प्रकृतिः कारणमित्यर्थः अहं बीजप्रदः पिता तत्र तत्र चेतनानां कर्मानुगुण्येन चेतनवर्गस्य संयोजकश्चाहमित्यर्थः [illegible] ४ ॥

अभिनवगुप्तकृतटीका ६ ॥

श्री॰
गी॰ टी॰
चं॰

16

नकेवलंसक्रमम
पिष्टिताभ्यांप्रकृति
पुरुषाभ्यांमयेदृक्तो
त्पत्तिप्रकारः अपितु
सर्वदैवेत्याह +

[illegible] अतएवसर्वासुयोनिषूत्पाद्यकारण
तयाहेहिकाभगवद्भक्तिः सकलसंसारवमनस्वभावामाता पितावरे
शक्तिमानव्यपदेश्यः ४   परमार्थप्रपाटीका ७

सर्वयोनिष्विति सर्वयोनिषुमनुष्यपशुपक्ष्यादिषुयाः स्थावरजंगमात्मिकाः
मूर्तयउत्पद्यंते तासांमहद्ब्रह्मयोनिरुत्पत्तिस्थानंमातृस्थानीयमित्यर्थः अ
हंबीजप्रदोगर्भाधानकर्ताअत एवपितानिषेक्ता श्रुतिरपि सहैतावाना
सीद्यथास्त्रीपुमांसौसंपरिष्वक्तौसइममेवात्मानंद्वेधापातयत्ततःपति
श्चपत्नीचाभवतामित्यादि भाष्यं सृष्टिक्रमेश्रुत्यर्थमहद्वितीयमेवद्वेदिस्मके
सतेनसहद्वितीयतावानेतावानासीत् एतावानकथं यथास्त्रीपुमांसौसं
परिष्वक्तौसंमीलितौअनंतरंसृष्ट्यर्थंसआत्माइममेवमायासव
लितमात्मानंद्वेधाद्विप्रकारमपातयत् अपकृष्टमकरोत् ततःपति
श्चपत्नीचाभवतांमिथुनमभूदित्यर्थः मिथुनंसंभवायप्रजानामिति
ब्राह्मणमपि [illegible] ४

वनमालीटीका ८

१ यो नदेवविहगयोनिदेवमनुष्यादिसर्वनिषुयामूर्तयोजरायुजांडजोद्भि
५ दे ज्जादिभेदेनविलक्षणादेहाः संभवंति तासांमूर्तीनांतत्कारणभावाप
न्नंमहद्ब्रह्मैवयोनिर्मातृस्थानीयं अहंसर्वेश्वरोबीजप्रदःगर्भाधा
नस्यकर्तापिता प्रदृश्यमानानामाब्रह्मादयोमहतोब्रह्मणएवपरिणा
मावस्थाविशेषास्ततद्रूपेणमहद्ब्रह्मैवसर्वमूर्तीनांकारणमिति
भावः ४   ऊसमवैजयंतीटीका ९

एवंकारणावस्थांचिदचिन्मसर्गमुक्ताः पुनःकार्यावस्थोपिविस्तृतकृ
तिसंसर्गमयैवकृतइत्याहसर्वयोनिष्विति हेकौंतेयसर्वयोनिषुसर्वा
सुदेवगंधर्वयक्षराक्षसमनुष्यपशुमृगपक्षिसरीसृपादिस्थावरांता
सुयोनिषुयानिभूतमिश्रयास्ततःसंभवंतिजायंतेतासांमूर्तीनांब्रह्म
प्रधानंमहद्योनिर्महत्पुमादेतन्मयासंयोजितचेतनवर्गामहदादि
विशेषांताप्रकृतिः कारणंमातेत्यर्थः अहंसर्वेश्वरस्तत्वबीजप्रद
स्तत्कर्मानुसारेणचेतनपुंजसंयोजकः पिताभवामि ॥

संवोधनेनयथैकैकस्माद्धर्मादेः पितरेकैकएवंवसुधिष्ठिरादित्वद
त्तः पुत्रैःसमभवत् तथानकिंत्वेकस्मादेवमातुः नन्ताउद्भिज्जा
उजस्वेदजजरायुजामानसाः प्रजापत्यादयश्चैककालावच्छिन्ने
नैवोत्पद्यंतेइतिसूचितम् ४ ॥

मधुसूदनीटीका १०

+ननुकथंसर्वभूतानांततःसंभवोदेवादि
देहविशेषाणांकारणांतरसंभवोदित्या
शंक्याह॥

+देवपितृमनुष्यपशुमृगादिसर्वयोनिषुर्य मूर्तयःज
रायुजांडजस्वेदजोद्भिज्जादिभेदेनविलक्षणा विविधसंस्थानास्त
नवः संभवंति हेकौंतेय तासांमूर्तीनांततत्कारणभावापन्नंम
हद्ब्रह्मैवयोनिर्मातृस्थानीयाअहंपरमेश्वरःबीजप्रदःगर्भाधान
कर्तापिता तेनमहताब्रह्मणएवावस्थाविशेषाकारणांतराणी
तिगुणकमुक्तं संभवःसर्वभूतानांततोभव[illegible]तीति नदेव
निरीश्वरसांख्यनिराकरणेनक्षेत्रक्षेत्रज्ञसंयोगस्येश्वराधीनत्वमु
क्तं इदानींकस्मिन्गुणेकथंसंगःकेवागुणाःकथंवानिबध्नंती
त्युच्यते सत्वमित्यादिनान्यंगुणेभ्यःकर्तारमित्यतःप्राक्चतुर्द
शभिः ४ ॥

सदानंदीटीका ११

कथंसमस्तभूतानांततएवास्तिसंभवः देवादिदेवभेदानांकार
णांतरसंभवात् १ सत्यंदेवमनुष्यादिसर्वयोनिषुमूर्तयः ज
रायुजादिभेदेनदेहाःसंस्थानलक्षणाः २ मूर्च्छितांगावयवास्ताः
संभवंतिसहस्रशः कौंतेयतासांमूर्तीनांतत्तत्कारणभावतः ३
महद्ब्रह्मैवतन्मातृस्थानीयायोनिरुच्यते गर्भाधानस्यकर्ताहंज
नकःपरमेश्वरः महतोब्रह्मणस्तेनावस्थाभेदाअनेकधा हे
तंतराणितस्मात्तत्कारणंजगतांमहत् ४ ॥

नीलकंठीटीका १२

किंचसर्वेषुभूतेषुयोनिषुउपादानभूतेषुप्रकृतिस्थामोषधयर
वयाःमूर्तयःशरीराणिसुरनरतिर्यक्स्थावरात्मकानिचत

श्री·
गी·टी·
चे

रात्मकानि च तत्र विधानि संभवंति तासां मूर्तीनां ब्रह्म महत्सर्वोत्कृ
ष्टं महतो ब्रह्म ब्रह्म महत् राजदंतादित्वादुपसर्जनस्य परनिपातः
मायैव योनिरित्यर्थः अहं तु तासां बीजप्रदः पिता तास्वपि स्व
प्रतिबिंबसमर्पयिता यथा पुरुषो भार्यायामनुशायिसंसर्के रेतो नि
षिंचति ततो भार्यातः पिंडोत्पत्तिः रेतोंशानस्तत्रैव तन्मात्रान्वितिरिति वै
तन्यविशिष्टस्य पिंडस्य पिता ऽहं माता च मायेत्यर्थः ॥ ४ ॥

आनंदीटीका ५

एतदेव लक्षयति सर्वयोनिषु ब्रह्मादिस्थावरांतेषु देवमनुष्यति
र्यगादिषु मूर्तयः शरीरेंद्रियादिसंघाताः यथा हि स्त्रीषु देहेषु
पुरुषैः सन्तानैव बीजं दधत्स्वरूपान्न च्यवन्ते तथाहं महद्ब्रह्मणि
दददपि स्वरूपादप्रच्युत एवेत्यर्थः [illegible] ५ ॥

+ इत्यलौकिकार्थरूपेण गर्भीकारेण योन्यादिशब्दप्रयोगोत्रयः कृतस्तमेव स्फुटीकर्तुमाह ॥

रामकंठीटीका ४

+ सर्वयोनिषु समस्तेषु भावाभिव्यक्त्याधिकरणेषु भूतेषु देहेषु स्था
ग्याश्रितेषु या मूर्तयो जरायुजत्वादि चतुरस्त्वातिप्रकारैर्बहुविध
संस्थानभेदेनाकृतयो भूतानां संभवन्त्युत्पद्यंते तासां सर्वासां
यथा प्रतिपादितस्वरूपं महद्ब्रह्मेदं तासामान्यलक्षणं प्रकृ
त्यात्मकं योनिर्मातृत्वमभिव्यक्त्याधिकरणं न सा च योनौ संवि
ल्लक्षणस्य बीजस्य स्ववीर्यस्य प्रदानादहं पिता यथा कश्चिद्ब्रा
ह्मणादिः पुरुषो भार्यात्वेन परिगृहीते वनितादेहे संतानोत्पा
दनाय वीर्यमवसृजन् गर्भमाधत्ते न च स्वरूपान्तरमासादयत्येवमहं
स्वरूपादप्रच्युत एव यथोक्ते महति ब्रह्मणि जगद्भावहेतुं सं
विल्लक्षणं बीजमवसृजामीति स्वरूपात् स्थितिमात्रे पितृत्वेना
त्मनोधिकरणमात्रत्वेन योनित्वेन स्थूलस्य ब्रह्मणो रूपणं
नानाभावहेतुत्वे बीजे न विदंशस्य निरूपणमिति यथाह

धिकरणभूतं योनिमंतरेण संतानाभिव्यक्त्यभावः पुरुषवीर्यस्य
एवमिदमिति परामृश्यमानं स्वरूपमेव प्रकृतिर्न वस्त्वंतरं किंचि
त्स्यापरस्य ब्रह्मणः प्रकाश्यप्रकाशभावलक्षणः संबंधः स
च प्रकाश्याधारं विना न घटते प्रकाशस्य प्रकाश्यरूपतामंतरेण
तथा स्वरूपलाभाभावात् इति प्रकृतिविषयं तावत् ज्ञानमुक्त
मिदानीमेवं चलत्वमन्तस्तस्याः शरीरादिभावेन व्यवस्थित
भूतादिविकाररूपायाः कथं निर्मोक्ष इत्यभेदार्थविषयं ज्ञानं
निर्णीयते यत्र येषां प्रतिपादितस्वरूपा प्रकृतिः सा शरीरवि
षयभावेनाभासमानैः स्वविकारैः प्रकृत्यादिभिः स्वदेहि न वभ्रा
तिये न तत्परिहारादेव ततो निर्मोक्षः स्यात् किंत्वयैः प्रकारैस्तैः सं
वेद्यतामापद्यते ते प्रकारा देहिनमहंकारममकाराभ्यां निव
ध्नंति न तेभ्यो निर्मोक्षो भूत प्रकृतिनिर्मोक्षो भवतीति क्र
मेण प्रतिपादयितुमाह ४ ॥

+ अथ महद्ब्रह्माभिधेयत्वं तस्याः कस्याः एवं प्रकृते योनिमाह॥

लासिकी [illegible]टीका १५

+ सर्वासु चतुर्दशविधासु योनिषु भूतजातिषु या नानाविधा मूर्तयः
संस्थानविशेषाः संभवंति तासामनंतानामेकं महद्ब्रह्मरूपेश्व
री प्रकृतिर्योनिरुत्पत्तिदेशम् मातृस्थानीयम् अहं चेश्वरस्ता
सां बीजप्रदः स्वांशसमर्पकः पितृस्थानीयः [illegible] दा
[illegible] ४ ॥

पंचोलीटीका

नकेवलं सृष्ट्युपक्रम एव मदधिष्ठितो प्रकृतिपुरुषाभ्यां भूतोत्पत्ति
हेतुः अपितु सर्वदैवेत्याह सर्वयोनिष्विति हे कौंतेय सर्वयोनि
षु देवपितृमनुष्यपशुमृगादियोनिषु या मूर्तयः देहाकाराः
विशेषाः संभवंति तासां मूर्तीनां महद्ब्रह्ममाया त्रिगुणात्मिका
माया योनिः कारणं अहं बीजप्रदः गर्भाधानकर्ता अत एव पिता ४

स्तवीरसमिद्धोधिनी॥

देहादिविशेषाणांपरिदृश्यमानानांकारणांतरमस्तु वा कथ
मेककारणत्वं सर्वभूतानामित्याशंक्याह सर्वेति सर्वयोनिषु
देवपितृमनुष्यपशुपक्षिमृगसरीसृपादिषु या मूर्तयो जरा
युजांडजस्वेदजोद्भिज्जादिभेदेन विलक्षणा नानाविधशरीर
संस्थानाः संभवंति तासां मूर्तीनां महद्ब्रह्मैव तत्कारणभावा
पन्नं योनिर्मातृस्थानीयमहं परमेश्वरो बीजप्रदो गर्भाधानादि
कर्तापितेति महतो ब्रह्मण एवावस्थाविशेषाः कारणांतराणी
ति युक्तमुक्तं संभवः सर्वभूतानामिति ४॥

मधुभाष्य

४॥

भाषा अनुवाद

केवल सृष्टि काल ही मे प्रकृति पुरुष के द्वारा भूतों का ज
न्म होता है ऐसा न जानो परंतु सदा सर्वदा प्रकृति पुरुष से
प्राणी प्रगट हुआ करते हैं यही कहते हैं कि हे कौंतेय अ
र्जुन जितने मनुष्य आदि योनि स्थावर जंगम रूप स्वरूप
उत्पन्न होते रहते हैं उन की निरंतर वढावने वाली प्रकृति
योनि है अर्थात् माता रूप है औ बीज प्रदाता पिता रूप ग
र्भाधान कर्ता पुरुष स्वरूप मै ही हों ४ ।

४

दोहा

कुंतिसुत सभयोनि में हिं देह होत हे जोहि तेहि ब्रह्म महा
योनि है बीजदायक पिता होंहि ४ ॥

19

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः नि
बध्नन्ति महाबाहो देहे देहिनमव्ययम् ५

शाङ्करभाष्यं १

के गुणाः कथं बध्नन्तीत्युच्यते सत्त्वमिति सत्त्वं रजस्तम इत्येवंनामा
नो गुणा इति पारिभाषिकः शब्दो न रूपादिवत् द्रव्याश्रिताः न च गुण
गुणिनोरन्यत्वमत्र विवक्षितं तस्माद्गुणा इव नित्यपरतन्त्राः क्षेत्रज्ञं प्रत्य
विद्यात्मकत्वात् क्षेत्रज्ञं निबध्नन्तीव तमास्पदीकृत्यात्मानं प्रतिलभ
न्त इति निबध्नन्तीत्युच्यते ते च प्रकृतिसंभवा भगवन्मायासंभवा नि
बध्नन्तीव हे महाबाहो महान्तौ समर्थतरावाजानुप्रलम्बौ बाहू
यस्य स महाबाहुः हे महाबाहो देहे शरीरे देहिनं देहवन्तं अव्यय
मव्ययत्वञ्चोक्तमनादित्वादिश्लोके ५

आनन्दगिरिकृतटीका २

एवं क्षेत्रक्षेत्रज्ञसंयोगाज्जगदुत्पत्तिं दर्शयता असङ्गस्याविद्यया संसर
१ गी तीत्युक्तं इदानीमध्यायादावुक्तमाकाङ्क्षाद्वयं पूर्वमनूद्यानन्तरश्लोकेनो
त्तरमाह के गुणा इति सत्त्वादिषु कथं गुणशब्दप्रवृत्तिरित्याशंक्य पर
तन्त्रत्वादित्याह गुणा इति रूपादिष्विव गुणशब्दः सत्त्वादिषु द्रव्याश्रि
तत्वं निमित्तीकृत्य किं न स्यादित्याशंक्याह पारिभाषिक इति प्रकृत्या
त्मकानां तेषां सर्वाश्रयत्वात्तेनैवमित्याह न रूपादिवदिति गुणानां प्रकृ
तेश्च पृथगुक्तेरन्यत्वे कुतस्तेषां प्रकृत्यात्मत्वमित्याशंक्याह न च गुणे
ति अत्यन्तभेदे गवाश्ववत्तद्भावासंभवादित्यर्थः भेदाभेदे च तद्भावासं
भवाविशेषात् कुतस्तेषु गुणपरिभाषेत्याशंक्याह तस्मादिति क्षेत्रज्ञं प्र
ति नित्यपारतन्त्र्ये हेतुमाह अविद्येति के गुणा इत्यस्योत्तरमुक्तं कथं बध
न्तीत्यस्योत्तरमाह क्षेत्रज्ञमिति तदेवोपपादयति तमास्पदीकृत्येति सं
भवत्यस्मादिति संभवः प्रकृतिः संभवो येषां ते तथेति प्राकृतानां गुणा
नां प्रकृत्यात्मकत्वमाह ते चेति सांख्यीयाम्प्रकृतिं प्रधानाख्यां व्यावर्तयति
भगवदिति इवकारानुबन्धेन नितरां बध्नन्ति स्वविकारवत्तयोपदर्शय।

श्री
गी॰ टी॰
५॰

त्वीति क्रियापदं व्याख्याय महाबाहुशब्दं व्याचष्टे महात्माविति देहवत्त्वे
देहमात्मानं मन्यमानं देहस्वामिनमित्यर्थः कूटस्थस्य कथं बध्यमानत
मित्याशंक्याऽऽह अर्चाज्ञेयावरणमित्यमिति व्यायेन मायाहात्म्यमिदमित्याह मा
अव्ययमिति स्वतो धर्मितो वा व्ययोराहित्यापेक्षायामाह अव्ययत्वेति ५

स्वामिकृतटीका ५

तदेवं परमेश्वराधीनाभ्यां प्रकृतिपुरुषाभ्यां सर्वभूतोत्पत्तिं निरूप्येदानीं
प्रकृतिसंयोगेन पुरुषस्य संसारं प्रपंचयति सत्वमित्यादि चतुर्दशभिः
सत्वं रजस्तम इत्येवं संज्ञका त्रयो गुणाः प्रकृतिसंभवाः प्रकृतितः सं
भवं उद्भवो येषां ते तथोक्ताः गुणसाम्यं प्रकृतिः तस्याः सकाशात्पृथ
क्त्वेनाभिव्यक्ताः संतः प्रकृतिकार्ये देहे तदात्म्येन स्थितं देहिनं चिदंश
वस्तुतः अव्ययं निर्विकारमेव संतं निबध्नंति स्वकार्यैः सुखदुःखमोहा
दिभिः संयोजयंतीत्यर्थः ५ पिशाचभाष्यटीका ५

के गुणाः कथं वा बध्नंतीत्यपेक्ष्यते सत्वमिति प्रकृतिसंभवाः त्रिविधा
संभवाः निबध्नंति नियच्छंति अव्ययमविनाशिनं ५

रामानुजभाष्यटीका ५

+ एवं सर्गादौ प्राचीनकर्मवशादचित्संसर्गेण देवादिषु योनिषु पुनः पुनः देवादिभावेन जन्महेतुमाह ॥

+ सत्वमिति सत्वरजस्तमांसि त्रयो गुणाः प्रकृतेः स्वरूपानुबंधिनः स्व
भावविशेषाः प्रकाशादिकार्यैकनिरूपणीयाः प्रकृत्यवस्थायाम
नुद्भूताः तद्विकारेषु उद्भूताः महदादिविशेषांतेषु उद्भूताः देवमनुष्या
दि देहसंबंधिनं देहिनमव्ययमेतो गुणाः संबध्नंति देहे वर्तमानं निब
ध्नंति देहे वर्तमानत्वोपाधिना निबध्नंतीत्यर्थः [illegible]
[illegible] नपर्वतेत्याह [illegible]

अभिनवगुप्तकृतटीका ९

देहीवाय मात्मतया सत्वरजस्तमोभिर्धर्मैरपवर्गपर्यंताय भोगाय
निबध्यते ५ परमार्थप्रपाटीका ७

सर्वयोनिषु [illegible] विशेषाः स्थावरजंगमात्मिकाः [illegible]
संयते तासां [illegible] योनिसंयोगनिस्थानमात्र [illegible] अर्थाः त्रयं
[illegible] संस्कारा [illegible]
इदानीं प्रकृतिसंगेन पुरुषस्य संसारं प्रपंचयति सत्वमित्यादि चतुर्दशभिः ॥

सत्वंरजस्तमइतित्रयोगुणाः प्रकृतिसंभवाः गुणानांसाम्यावस्थाप्र
कृतिस्तस्याः सकाशात्संभूताः नगुणानामुत्पत्तिरेवसंभवशब्दार्थः
एवंतेप्रकृतिकार्यदेहेतादात्म्येनस्थितंदेहिनंचिदंशंवस्तुतोव्यय
निर्विकारमप्यहंकाराभिकाराभिमानान्निबध्नंति स्वकार्यसुखदुः
खादिभिःसहयोजयंति अत्रप्रकृतिरपितैत्तिरीयके अजामेकां लोहि
त्तौ तशुक्लकृष्णांबह्वीःप्रजाःसृजमानांसरूपां अजोह्येकोजुषमाणो
नुशेतेजहात्येनांभुक्तभोगामजोन्यइति भाष्यंतन्वेकस्माज्जगदुपा
दानतः कथंकार्यवैचित्र्यमित्याशंक्यकारणमपितथैवास्तीत्याह
अजामिति अजामनादिमेवगुणत्रयरूपिणीं यतोलोहितशुक्लकृ
ष्णांरजःसत्वतमोमयीं अतोविचित्रत्वाद्बह्वीःपृथग्नामरूपकर्माणि
कांप्रजाजनयंतीं सरूपांयथाकर्मसमानरूपां अथतत्कूलत्वशुद्ध
त्वभावेनदेवतत्परमात्मनोःस्वरूपमाह अजइति एवंविधांताम
धी^ नुलक्ष्मीकृत्यतत्कान्विषयान्जुषमाणोभुंजानोअजोजीवःशेते
निद्रयतइवव्यामूढःसंसारंप्राप्नोति अथान्यस्तद्विलक्षणोऽजःप
नामफलत्वलक्षणभुक्ताभोगायस्यासाभुक्तभोगातामजोजहातित्यज
ति यथाकश्चिद्द्विजःस्वप्नेशूद्रत्वंप्राप्तःपुनर्जाग्रद्दशायांस्वकी
यंशुद्धस्वरूपंप्राप्नोतितद्वदित्यर्थः ॥५॥

वनमालीटीका ८

तदेवंनिरीश्वरसांख्यनिराकृतेश्वराधीनप्रकृतिहेतुकाभूतोत्पत्तिस्त
स्याकस्मिन्गुणेकथंसंगः केवागुणाः कथंवाबध्नंतीत्यपेक्ष्यतेसत्व
मित्यादिनात्वमित्यतःप्राक्चतुर्दशभिः सत्वंरजस्तमइत्येवंनामानो
गुणानित्यपरतंत्राः अचेतनानांतेषांचेतनार्थत्वात् नचगुणगु
णिनोरन्यत्वमत्रविवक्षितं गुणत्रयात्मकत्वात्प्रकृतेः तर्हिकथंप्रकृ
तिसंभवाइति उच्यते त्रयाणांसाम्यावस्थाप्रकृतिर्भगवतःतस्याः
सकाशात्परस्परांगांगिभावेनवैषम्येणपरिणताःप्रकृतिसंभवाइ
त्युच्यंते तेचदेहेप्रकृतिकार्येदेहेंद्रियसंघातेदेहिनंदेहममेत्यभि

मानितम् जीवं स्वभावतोऽव्ययं निर्विकारं संतं निबध्नंति स्वकार्यभूतैः
सुखादिभिः संयोजयंति यद्यप्यसंगत्वादिगुणाः स्वतोऽव्ययं जीवं देहि
नं तथापि स्थूलदेहिनं कृत्वा तत्रापि देहस्य कार्यैर्निबध्नंतीत्यर्थः ५

हनुमद्वैजयंती ९

एवमचिंत्यसर्गेण प्राचीनकर्मवशाद्वियोनिषु पुनः पुनर्जीवाः संभ
वंतीत्युक्तम् इदानीं के ते गुणास्तेषु पुरुषस्य कथं संसर्गस्ते तं वा कथं निब
ध्नंतीत्यपेक्षायामाह चतुर्भिः सत्त्वरजस्तमोभिधेयास्त्रयो गुणाः प्रकृ
तिसंभवाः प्रकृतेः स्वरूपानुबाधिनः स्वभावविशेषाः वक्ष्यमाणप्र
काशादिकार्यैकनिरूपणीयाः प्रकृत्यवस्थायामनभिव्यक्तास्तत्कार्ये
षु महदादिषु व्यक्ता भवंतीति हे महाबाहो ते गुणाः महदादिविशेषांते
ष्वारब्धे स्वकार्ये देवमनुष्याद्याकारे देहे स्थितं देहिनं देवोऽहं मनुष्योऽह
मिति देहतादात्म्यसंबंधवंतमव्ययं देहे वर्तमानमपि स्वतो देहगु
णसंबंधानर्हं निर्विकारं पुरुषं निबध्नंति सुखदुःखमोहरूपैरवि
वेकगृहीतैः स्वधर्मैः सह संयोजयंति संबोधनेन यतस्त्वं महाबाहुस्त
त्त्वज्जितेन मदनुग्रहसहकृतमद्भक्तिसाहित्येन प्रकृतिवियुक्त
याथात्म्यस्वस्वरूपज्ञानेन निरस्तदेहादिमोहान्निरस्यतः तव
ते गुणाः किं करिष्यंति मा भैषीरिति सूचितम् ५ ॥

मधुसूदनीटीका ९

सत्त्वं रजस्तम इत्येवं नामानो गुणा नित्यपरतंत्राः पुरुषं प्रति सर्वे
षामचेतनानां चेतनार्थत्वात् न तु वैशेषिकाणां रूपादिवद्द्रव्याश्रिताः
न च गुणगुणिनोरन्यत्वमत्र विवक्षितं गुणत्रयात्मकत्वात्प्रकृतेस्त
र्हि कथं प्रकृतिसंभवा इत्युच्यते त्रयाणां गुणानां साम्यावस्था प्र
कृतिर्माया भगवतः तस्याः सकाशात्परस्परांगांगिभावेन वैष
म्येण परिणताः प्रकृतिसंभवा इत्युच्यंते ते च देहे प्रकृतिकार्ये श
रीरेंद्रियसंघाते देहिनं देहितादात्म्याध्यासापन्नं जीवं परमार्थतः
सर्वप्रकारव्ययशून्यत्वेनाव्ययं निबध्नंति निर्विकारमेव संतं सविकारव

त्रयोपदर्शयंतीवभ्रांत्याजलपात्राणीवदिविस्थितमादित्यंप्रतिविंबा
ध्यासेनस्वकंपादिमत्तया यथाचपारमार्थिकोबंधोनास्तितथा ९
व्याख्यातंप्राक्शरीरस्थोपिकौंतेयनकरोतिनलिप्यतइति ॥
कोगुणाःकेनसंगेनबध्नंतीत्युच्यते ५ ॥

सदानंदीटीका ११

एवंनिरीश्वराःसांख्याहरिणैवनिराकृताः क्षेत्रक्षेत्रज्ञसंयोगईश्व
राधीनइत्यतः १ कस्मिन्गुणेकथंसंगोगुणाःकेवाकथंचते बध्नं
तीत्युच्यतेश्लोकैस्त्वत्रदशभिरेवच २ सत्वंरजस्तमइतिनामानो
हिगुणात्रयः अरूपप्रतितेनित्यंपरतंत्राभवंत्यमी ३ अचेतनानां
सर्वेषांचेतनार्थत्वहेतुना नतद्द्रव्याश्रितास्तेयावैशेषिकसंमता
गुणाः ४ गुणागुणवतोरत्रनैवान्यत्वंविवक्षितं गुणत्रयात्मि
कामायाविद्याप्रकृतिरुच्यते ५ कथंप्रोक्तंतदात्रैतेगुणाःप्रकृ
तिसंभवाः शृणूच्यतेत्रयाणांयागुणानांसमतादशा ६ माया
प्रकृतिरित्युक्ताशक्तिर्भगवतोहरेः तस्यावैषम्यपरिणामं
गताःप्रकृतिसंभवाः शरीरेंद्रियसंघातेतदध्यासेनदेहिनं ७
बध्नंतीनिर्विकारंतंबध्नंतीवगुणाइमे यथाकाशस्यमादि
त्यंप्रतिविंबेसवेनहि कंपादिमत्तयावारिदर्शयत्यचलंचलं
तथैवंनिर्विकारंतेसविकारैकवत्तया ८ दर्शयंतीवबद्धंभ्रां
त्यातादात्म्याध्यासरूपया ११ ५ ॥

नीलकंठीटीका १२

एवंईश्वराश्रयेणप्रकृतिर्भूतानिसृजतीत्युक्तं इदानींसाकथं
भूतानिबध्नातीतितदुच्यते सत्वमिति प्रकृतिःसत्वरजस्तम
सांसाम्यावस्था ततःसकाशात्परस्परांगांगीभावेनवैषम्येणउ
द्भिद्यमानाःप्रकृतिसंभवाइत्युच्यंतेनतुप्रकृतितोवैशेषिका
णामिवद्रव्यात्गुणाअन्येपतेहेमहाबाहो देहेअव्ययमविका

+ इदानीं गुणानां बंधमोक्षहेतूनां लक्षणपरीक्षामाह ॥

श्री·
गी·टी·
चं

२२

रिणमपि देहिनं स्फटिकमणायां वक्रमिव रशनाभूता गुणा निबध्नंति ५

आनंदीटीका १२

+ सत्वादयो गुणाः शरीराकारेण परिणतायाः प्रकृतेः प्रादुर्भूताः देहिनं गर्भरूपेणानुप्रविष्टं जीवमव्ययमविनाशिनं निबध्नंति वक्ष्यमाणेन प्रकारेण स्वरूपावरणात्स्वरवशीकुर्वंति प्रीत्याप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः इत्येवं हेतुना गुणानां बंधकत्वमाह ५ ॥

रामकवीटीका १४

परमार्थतो नित्यत्वादव्ययं विनाशरहितमनत्यजन्मरहितमपि देहिनमात्मानं यथोक्तप्रकृतिसंभवाः गुणाः सत्वाद्यभिधाना वक्ष्यमाणप्रकारेण निबध्नंति विनाशोत्पादकदेहाहंकाराद्यारोपणेन तद्धर्मानुविधायित्वात् स्वतंत्रीकुर्वंति कथमिति तेषां बंधकत्वेन विभागमाह ५ ॥

+ नन्वसंगस्येश्वरांशरूपस्य कथं जीवत्वप्राप्तिरिति तत्प्रकारमाह ॥

लाल्सिंकी [illegible]टीका १५

+ सत्वरजस्तम इति गुणाः सुखदुःखमोहात्मकाः प्रकाशप्रवृत्तिनियमनशीलास्त्रिगुणसाम्यात्मिकायाः प्रकृतेः संभवाः ॥ कार्यकारणाभिव्यक्ताः संतः अव्ययं वस्तुनः स्वस्वभावप्रच्युतिरहितमेव देहिनमात्मानं देहे प्रकृतिकार्ये निबध्नंति तादात्म्यालंबनेनास्वतंत्रीकुर्वंतीत्यर्थः अनेनैव गुणानां स्वरूपं बंधकत्वमाह । ५ ॥

पंचोलीटीका

तदेवं परमेश्वराधीनाभ्यां प्रकृतिपुरुषाभ्यां सर्वभूतोत्पत्तिं निरूप्य इदानीं के गुणाः कथं वध्नंतीत्येवमर्थं निरूपयन् गुणसंगेन पुरुषस्य संसारं प्रपंचयति सत्वमित्यादि चतुर्दशभिः हे महाबाहो सत्वं रजस्तम इति गुणाः प्रकृतिसंभवाः भगवन्मायासंभूताः अव्ययं व्ययरहितं देहिनं आत्मानं देहे शरीरे निबध्नंति स्वाधीनमिव कुर्वंति ५

गुणानां बंधकत्वं विस्तरेण दर्शयति सत्वमिति सत्वं रजस्तम इत्ये
वं संज्ञकास्त्रयो गुणाः प्रकृतिसंभवाः प्रकृतितः संभवो येषां ते तथो
क्ता गुणत्रयसाम्यावस्थारूपायाः प्रकृतेः सकाशात्परस्परं गांगि
भावेन वैषम्येन परिणतत्वात्प्रकृतिसंभवत्वं गुणानामिति न गु
णा गुणिनो भिन्नत्वमत्र विवक्षितं ते गुणा देहे प्रकृतिजन्ये तादा
त्म्याध्यासेन स्थितं देहिनं जीवं वस्तुतोऽव्ययं निर्विकारमेव संतं नि
बध्नंति स्वकार्यैः सुखदुःखमोहादिभिर्योजयंतीत्यर्थः ५॥

मधुभाष्य

सत्वमित्यादिना तस्मात्संगयोः सम्बन्धं तयोः कारणं अज्ञानं
जायते यतः तदज्ञानजं तदज्ञानजं प्रमादमोहौ तमसो भवत इति
वाक्यशेषात् रजसस्तु फलं दुःखमित्यस्य सुखं दुःखं तथा
हि प्राकृतव्याख्यायां रजसो लोभ एव जायते मात्रया सुखं दुःखं
तु स्मात्तात्सुखिनो दुःखिन इत्यावक्तत इति अन्यथा दुःखस्या
तिकष्टत्वात् तमो प्राधिकत्व रजसो न स्यात् परिणामिकत्वोर्गुणे
भ्यो अन्यं च न पश्यति अन्यथा यदा पश्यः पश्यते रुक्मवर्णं क
र्तारमीशं पुरुषं ब्रह्मयोनिमिति श्रुतिविरोधः नाहं कर्ता न क
र्तात्वं कर्ता यस्तु सदा प्रभुरिति मोक्षधर्मे प्रायोन्नेऽष्टिन का वृत्ति
तथा हि सामवेदे माहलेयव्याख्यायां रजस्तमः सत्त्वगुणाश्च रह
ता न्यायो न वृद्धेष्टिन व्यापिकां चेत् तथापि सूक्ष्मं सत्त्वगुणं च का
र्ये यदि प्रविष्टसत्तमस्य मनुष्यादि न हि देवानुषयः सत्त्वस्यात्र
यस्तम हीनाः सत्वेन सूक्ष्मेण न तो वैकारिकाः स्मृताः कथं
वैकारिको गच्छेत् पुरुषोत्तममिति मोक्षधर्मे सात्विकः पु
रुषः व्याप्त्रभवेन्मोक्षार्थनिश्चित इति च तत्पदाद्युदाहृतः

उपस्तात् ब्रह्मवस्त्वस्फुरतिवद्गगवास्मियत्वं ननुतावास्मियत्वं किं
त्वप्रियत्वमात्रं बहुोवापिमूर्कोवानरमावास्मियोहरेरितिपा
त्रे भूपायभावायब्रह्मणः मायायाः ५॥

भाषा अनुवाद

परमेश्वराधीन प्रकृति पुरुष के द्वारा प्राणियों की उत्पत्ति निरूपणकरि कै अब प्रकृति के संयोग से पुरुष की संसार अवस्था इस श्लोके से लेकर चारि श्लोक पर्यंत क्रमसे विस्तारकरि कहते है कि हे महाबाहो अर्जुन सत्व रज औ तम ये तीन गुणो की समान अवस्थारखनेवाली जो प्रकृति तिस से जिसकी उत्पत्ति है उस मे गुणो के धर्म्म आव हींगे देखो प्रकृति से गुणो के अनुसार भिन्नभिन्न प्रगट होय प्रकृति के कार्यरूप शरीर मे अहंबुद्धि युक्त स्थित देही स्वरूप चिदंश आत्मा जो सच मुच अव्यय निर्विकार रूपहै उसकी भी गुण अच्छी तरह बद्ध करते हैं अर्थात् अपने कार्य सुख दुख मोह आदि से युक्त कर देते हैं।५।

दोहा

सत रज तम इति तीनगुण माया संभवसोय बांधे अर्जुन देह
मे देही अव्ययकोय ५

94

तत्र सत्वं निर्म्मलत्वात्प्रकाशकमनामयं सु
खसंगेन बध्नाति ज्ञानसंगेन चानघ ६

शाङ्करभाष्यं १

ननु न देही लिप्यते इत्युक्तं तत् कथमिह निबध्नातीत्यपेक्षया उच्यते प
रिहृतं अस्माभिरिवशब्देन निबध्नातीवेति तत्र सत्वमिति तत्र सत्वादीनां
सत्वस्यैव तावल्लक्षणमुच्यते निर्म्मलत्वात् स्फटिकइव मणिः प्रकाशकम
नामयं निरुपद्रवं सत्वं तन्निबध्नाति कथं सुखसङ्गेन सुखीहमिति वि
षयभूतस्य सुखस्य विषयिण्यात्मनि संश्लेषापादनं मृषैव सुखेन संज
ननमिति सैषा अविद्या न हि विषयधर्म्मो विषयिणो भवति इच्छादि च धृ
त्यन्तं क्षेत्रस्यैव विषयस्य धर्म्म इत्युक्तं भगवता अतोविद्ययैव स्वकीयध
र्म्मभूतया विषयविषय्यविवेकलक्षणयास्वात्मभूते सुखे संजयतीवा
सक्तमिव करोत्यसुखिनं सुखिनमिव तथा ज्ञानसंगेन च देहिनं ज्ञान
मिति सुखसाहचर्यात् क्षेत्रस्यैवान्तःकरणस्य धर्म्मो नात्मनः आत्म
धर्म्मत्वे सङ्गानुपपत्तेर्बन्धानुपपत्तेश्च सुखइव ज्ञानादौ सङ्गो मन्तव्यः अ
नघ अव्यसन ६

आनन्दगिरिकृतटीका १

लिप्यते न सर्वापेतेत्यनेन विरुद्धमिदं निबध्नातीति वचनमिति शङ्कि
ते तत्रेति इवकारानुबन्धेन क्रियापदं व्याचक्षाणैरस्माभिरस्य चोद्य
स्य परिहृतत्वान्नैवमित्याह परिहृतमिति किंलक्षणो गुणः केनव
भातीत्यपेक्षायामाह तत्रेति निर्द्धारणार्थतया सप्तमीं व्याचष्टे तत्र
सत्वादीनामिति पूर्वस्मिन्नित्यनुवादमात्रं निर्म्मलत्वं स्वच्छत्वमावरणा
रणत्वमत्वं तस्मात् प्रकाशकत्वं तत्राभिव्यञ्जकं निरुपद्रवमिति
निर्म्मलत्वात् सुखस्याभिव्यञ्जकमित्यर्थः केन द्वारेण तदात्मानं निब
ध्नातीति पृच्छति कथमिति सुखसंगेन बध्नातीत्युत्तरन्तदेव विवृ
णोति सुखीहमित्यादिना सुखस्य स्वाभिव्यञ्जकसत्वपरिणाममात्र वि
षयभूतं सुखस्युच्यते संश्लेषापादनमेव विशदयति मृषैवेति किमिति

श्रीटी॰
गी॰
वे॰
25

सुखेनेति विशेषणं सङ्गस्य वस्तुतस्तत्त्ववादित्याशंक्याह सैषेति न
त्विच्छासङ्गोऽभिनिवेशश्च स्वेकोऽर्थस्तत्रेच्छादेरात्मधर्मत्वात् किमवि
द्ययेत्याशंक्य मनोधर्मत्वादिच्छादेर्नात्मधर्मत्वमाह नहीति इच्छा
देरनात्मधर्मत्वे किं प्रमाणमित्याशंक्याह इच्छादिवेति तस्यात्म
धर्मत्वासम्भवे फलितमाह अतइति संजयतीव सक्तमिति शेषः
इवकारप्रयोगे हेतुमाह अविद्ययेति तस्यावस्तुनोनात्मसम्बन्ध
स्तथापि सम्बन्धान्तराभावादस्वातन्त्र्याच्च आत्मधर्मत्वमापाद्य
ह्मात्वेषस्वकीयेति कृतिमद्ध्नः करणस्य विषयत्वादात्मनः साध
कत्वेन तद्विषयत्वेपि तदविवेकरूपाविद्येति तत्स्वरूपमाह वि
षयेति यथोक्तविद्यामाहात्म्यमिदं यदस्वरूपे तद्धर्मेव शक्तिसमा
दनमित्याह असेति तदेव स्फुटयति असक्तमिवेति प्रकाशत्वरूपेण
सत्वस्य निबन्धनमाह तथेति ज्ञायतेऽनेनेति सत्वपरिणामो ज्ञानं
तेन ज्ञात्वहमिति विपरीताभिमानेन सत्वमात्मानं निबध्नातीत्याह
ज्ञानमित्यादिना विपक्षे दोषमाह आत्मेति स्वाभाविकत्वेन शमस्ता
तत्र स्वतः संयोगात्तस्मात् बन्धेव तन्निवृत्त्यनुपपत्तेर्नात्मधर्मत्वमित्य
र्थः ज्ञानैश्वर्यादावपि तत्तद्धर्मे सङ्गस्य पूर्ववदाविद्यकत्वं सूचय
ति सुखइवेति पापादिदोषहीनस्येवात्र शास्त्रे पिकारइति द्योतयति
अनघेति ६

स्वामिकृतटीका ६

तत्र सत्वस्य लक्षणं बन्धकत्वप्रकारं चाह तत्रेति तत्र तेषां गुणानां म
ध्ये सत्वं निर्मलत्वात् स्वच्छत्वात् स्फटिकमणिरिव प्रकाशकं भास्वर
मनामयं निरुपद्रवं शांतमित्यर्थः अतः शांतत्वात् स्वकार्येण सुखेन
यः संगस्तेन बध्नाति प्रकाशकत्वाच्च स्वकार्येण ज्ञानेन यः संगस्तेन
च बध्नाति हे अनघ निष्पाप अहं सुखी ज्ञानी चेति मनोधर्मेष्वदभि
मानिनि निबद्धते संयोजयतीत्यर्थः ६

पैशाचभाष्यटीका ६

तत्रैतेषु सत्वादिगुणेषु सत्वस्य लक्षणमुच्यते तत्रेति निर्मलत्वा।

स्फटिकमणिरिव प्रकाशकमनामयं निरुपद्रवमित्यर्थः सुख
संगेन सुखेच्छया ६ ॥ रामानुजभाष्यटीका ५

सत्वरजस्तमसां माकारं बंधनप्रकारं चाह तत्रेति तत्र सत्वरजस्तमःसु सत्वस्य स्वरूपमीदृशं निर्मलतया प्रकाशकं सुखावरणस्वभावरहितं निर्मलत्वं प्रकाशसुखे जननैकान्तस्वभावतया प्रकाशसुखहेतुभूतमित्यर्थः प्रकाशो वस्तुयाथात्म्यावबोधः अनामयं आमयाख्यं कार्यं न विद्यत इत्यनामयं अरोगताहेतुरित्यर्थः एष सत्वाख्यो गुणो देहिनमेनं सुखसंगेन ज्ञानसंगेन च बध्नाति पुरुषस्य सुखसंगं ज्ञानसंगं च जनयतीत्यर्थः ज्ञानसुखयोः संगे जाते तत्साधनेषु लौकिकवैदिकेषु प्रवर्तते ततस्तत्फलानुभवसाधनभूतासु योनिषु जायत इति सत्वं सुखज्ञानसंगद्वारेण पुरुषं [illegible] ६ बध्नाति ज्ञानसुखजननं पुनरपि तयोः संगजननं च सत्वमित्युक्तं भवति ६ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थ ६ ॥

परमार्थप्रपाटीका ७

अथ सत्वस्य लक्षणं बंधकत्वं प्रकाशकत्वं चाह तत्रेति तत्र तेषां गुणानां मध्ये सत्वं स्फटिकशिलावन्निर्मलत्वात्प्रकाशकं अनामयं शान्तोपद्रवं अतएव स्वकार्येण सुखेन यः संगस्तेन प्रकाशकत्वाज्ज्ञानसंगस्तेन च देहिनं बध्नाति हं सुखी ज्ञानी चेत्यभिमानिनं करोति ६ ॥

वनमालीटीका ८

तत्र तेषु गुणेषु मध्ये सत्वं प्रकाशकं स्फटिकमणिरिव भास्वरं निर्मलत्वात्स्वच्छत्वात् अनामयं आमयो दुःखं तद्विरोधि सुखैकहेतुरित्यर्थः शान्तत्वात् स्वकार्येण सुखेन मनोवृत्तिरूपेण तथा प्रकाशकत्वात्स्वकार्येण तादृशेन च ज्ञानेन यो जीवस्य संगस्तेन बध्नंति ज्ञानसुखादीन्मनोधर्मान्सत्वगुणोऽहं ज्ञानी सु ६

श्री·
गी·टी·
चं

स्वीत्याद्यभिमानोत्पादनाद्वाराजीवंसंयोजयंतीत्यर्थः ६ ॥

उत्तमवैजयंतीटीका ९

अथसत्वादिगुणत्रयाणांस्वरूपलक्षणानितद्बंधनप्रकारांश्चाह
त्रिभिः तत्रसत्वमितितत्रतेषुत्रिषुलोकेषुगुणेषुमध्येसत्वस्य
निर्मलत्वात्स्फाटिकमणिरिवस्वच्छत्वात्स्वतत्वप्रकाशकंवस्तुयाथा
त्म्यज्ञानवर्धकम् अनामयंनविद्यतेआमयोरोगोयस्मात्तदनाम
यंदुःखविरोधिसुखव्यंजकमित्यर्थः हेऽनघनिष्पापेत्यनेनार्जु
नस्यसात्विकत्वंदर्शितंतत्सत्वंसुखसंगेनसुखंदेहेंद्रियादिप्र
सादरूपंतस्मिन्सुखकार्येसुखेयःसंगःसंयोगोऽहंसुखीत्यभिमा
नस्तेनचपुनःज्ञानसंगेनज्ञानमत्रलौकिकवस्तुयाथात्म्यविष
यंनत्वात्मपरात्मविषयकंतस्यमोक्षफलत्वात् तस्मिन्सुखकार्येज्ञाने
यःसंगोहंज्ञानीत्यभिमानस्तेनपुरुषंबध्नातिपुरुषस्यसुखसंग
ज्ञानसंगंचजनयतीत्यर्थः तत्रतत्संगेसतितदुपायेषुकर्मसुप्र
वृत्तिस्ततःफलानुभवोपायेषुदेहेषुसमुत्पत्तिः पुनस्तत्रतत्रसंग
इतिनसत्वाद्विमुक्तिरितिभावः ६ ॥

मधुसूदनीटीका ९

^तत्रकोगुणःकेनसंगेनबध्नातीत्युच्यते॥

^तत्रतेषुगुणेषुमध्येसत्वंप्रकाशकंचैतन्यस्यतमोगुणकृताव
रणतिरोधायकंनिर्मलत्वात्स्वच्छत्वात् चिद्बिंबग्रहणयोग्य
त्वादितियावत् नकेवलंचैतन्याभिव्यंजकंकिंत्वनामयंआ
मयोदुःखंतद्विरोधिसुखस्यापिव्यंजकमित्यर्थः तद्बध्नाति
सुखसंगेनज्ञानसंगेनचदेहिनं हेऽनघ हेऽव्यसनसर्वत्र
संबोधनानामभिप्रायःप्रागुक्तःस्मर्तव्यः अत्रसुखज्ञानशब्दा
भ्यामंतःकरणपरिणामौतद्व्यंजकावुच्येते इच्छाद्वेषःसुखंदुःखं
संघातश्चेतनाधृतिरितिसुखचेतनयोरपीच्छादिवत्क्षेत्रध
र्मत्वेनपाठात् तत्रांतःकरणधर्मस्यसुखस्यज्ञानस्यचात्मन्यध्या
सःसंगःअहंसुखीअहंज्ञानीतिच नहिविषयधर्मोविषयिणो

भवतितस्मादविद्यामात्रमेतदितिश्रुतशाउकंथाक ९ ॥

सदानंदीटीका ११

कोगुणःकेनसंगेनबध्नातीत्यपेक्षायांतेषुनागुणेषुतेषुमध्येयत्सत्वंतत्स्व
च्छतयामलं १ चिच्छायायाग्रहयोग्यत्वान्निरोधायकमाहेतेः चितो
भिव्यंजकं२ःस्वविरोधित्वात्सुखस्यच सुखज्ञानेनमनोहृत्तीस्तत्रथ
मेतयेरिते तयोरात्मनिनिःसंगेध्यासःसंगइतीरितः३ सुखेहं
ज्ञान्यहंचेतिहृश्यधर्मोप्यविद्यया चिद्रूपरियतोध्यस्तोभातिभ्रा
न्तानवस्तुतः ६ ॥

नीलकंठीटीका १२

तत्रकःकेनसंगेनबध्नातीत्यपेक्षायां तत्रेति तत्रतेषुगुणेषुसत्वंनि
र्मलत्वात्सुखमोहाख्यमलराहित्यात्प्रकाशकंप्रालोकवत्स्वी
यावबोधकं यतोनामयंरजस्तमोभ्यामनभिभूतं तत्सुखसंगे
नज्ञानसंगेनचनरंप्रविद्ययातिरोहितस्वरूपंज्ञानानंदरूपंअहंसु
खीअहंज्ञानीत्यभिमानेनअंतःकरणवृत्तिधर्मयोःसुखज्ञान
योरात्मनिआरोपेणबध्नाति हेअनघअव्यसनिन् ॥६॥

आनंदीटीका १३

^इत्युक्तेनहेतेनगुणानांबंधकत्वमाह॥ अनामयसुखात्मकम् प्रकाशकत्वादहंज्ञानामीत्यहंकारोज्ञा
नसंगः अनामयत्वात्सुखितोहमित्यहंकारःसुखसंगःसत्व
ताभ्यांबध्नातीत्यन्वयः ६ ॥

रामकंठीटीका १४

तत्रतेषांमध्ये(सत्वं^)नामगुणोज्ञानसंगेनबध्नातिनियतविषयंनियत
करणाधीनंयज्ज्ञानंतत्रयःसंगइदमहंजानामीत्यभिमानेना
सक्तिस्तल्लीनत्वंतेनपरतंत्रीकरोति तथासुखसंगेनबध्नाति सु
खेनतदभीष्टविषयप्राप्त्याविषयांतराकांक्षानिवृत्तिपर्यवसा
यिनीनिवृत्तिस्तत्रसंगःसुखितोहंसुखंममास्तीतिवाहंकारमम
काभावष्टंभेनतल्लीनत्वंतेनपरतंत्रीकरोति अनेनायतनपंवस्वभावं

श्री·
गी·टी·
चं

27

सत्वं तत्र निर्मलत्वादावरकतमो[illegible]लक्षणमलविविक्तस्वरूपत्वात्
प्रकाशकं विषयप्रख्याकारणम् अतोज्ञानसंगेन बध्नाति अनामयं
रजोविविक्तत्वात्सहनिद्रः स्वात्मकेनामयेन रहितमतः सुख
संगेन बध्नाति सूक्ष्मत्वाज्ज्ञानसंगः पूर्वं व्याख्यातः ६ ॥

+तत्रतेषांगुणानांलक्षणंबंधकत्वंचाह॥

लासिकी [illegible]टीका ५

+तत्रतेषुसत्वादिषुमध्येसत्वंनिर्मलत्वादावरकतमोलक्षणमलवि
विक्तत्वात्प्रकाशकमिंद्रियद्वाराविषयप्रख्याकारणम् अज्ञानसंगो
नेदमहंजानामीत्येवंविधेनपुरुषंबध्नाति तदभिमानेनपरतंत्री
करोति तथानामयंदुःखरूपरजोगुणमहंनसत्वसुखसंगेनसु
खवहमित्येवंरूपेणाभिमानेनतादात्म्यंप्रापयति [illegible]
[illegible] ६ ॥

पंचोलीटीका

तत्रसत्वस्यलक्षणंबंधकत्वप्रकारमाह तत्रसत्वमिति हेअनघअ
ध्यात्मना तत्रतेषांसत्वादीनांत्रयाणांमध्येसत्वंस्फटिकइवनिर्मल
त्वात्प्रकाशकंअनामयंनिरुपद्रवंसुखसंगेनज्ञानसंगेनचसुखम
हंज्ञानीअहमितिविषयभूतस्यसुखस्यज्ञानस्यचविषयिणात्मनिब
ध्नातिमृषासंश्लेषंकरोति ६

रणवीरसमिद्धोधिनी॥

तत्रेति तत्र त्रयाणांगुणानांमध्येसत्वंसत्वाख्योगुणोनिर्मलत्वात्स्व
च्छत्वात्प्रकाशकंतमोगुणतिरोधायकं तथानामयमामयोदुःखंदुः
खंतद्विरोधिसुखाभिव्यंजकमित्यर्थः अतोनामयत्वात्स्वकार्येण
सुखेनयःसंगस्तेनबध्नाति तथाप्रकाशत्वात्स्वकार्येणज्ञानेनयः
संगस्तेनबध्नाति अहंसुखी अहंज्ञानीत्यंतःकरणधर्मस्यसुखस्य
ज्ञानस्यचात्मन्यध्यारोपः नहिविषयधर्मोविषयिणोभवति तस्माद
विद्यामात्रमेतदिति नेतेनसुखज्ञानानुषङ्गेनस्वधर्मस्थितिर्यतस्तया
प्रतीतधर्माविषयकत्वेनविनाशिनोस्वधर्मेलेपत्रीयायादित्यर्थः ६॥

सुपमाख

६॥

28

५, और प्रकाशकहै इस हेतुसे अपने कार्यरूप ज्ञानमे जो आशक्ति उससे भी बद्ध करता है

भाषा अनुवाद ॥

तिन गुणो के बीच मे सतो गुण का स्वरूप और उसके बंधकत्व की प्रकार कहते हैं कि सतोगुण निर्म्मलता के हेतु से फटिक के समान प्रकाशक कहे दीप्तियुक्त और अनामय अर्थात् निरुपद्रव शांतस्वरूप है इसी से हे अनघ निःपाप अर्जुन शान्त स्वरूप सतोगुण अपने कार्यरूप सुख मे जो आशक्ति के द्वारा बंध करता है, अर्थात् हम सुखी हम ज्ञानी इत्यादि मन के सकल कर्म्म को तिस के अभिमानी देवस्वरूप आत्मा मे सम्पूर्णरूप से योग कर देता है अनघपदसे जानाया कि गीताका अधिकारी पुण्यात्मा है ६।

दोहा

तामे सत्वप्रकाशक बिनउपद्रव स्वच्छतासेंद सुखसंयोगसें
बांधहि अनघ ज्ञानसेंतेह ६॥

२९

रजोरागात्मकंविद्धितृष्णासंगसमुद्भवं तन्नि
बध्नातिकौंतेयकर्मसंगेनदेहिनं ७

शांकरभाष्यं १

रजोरागात्मकं इति रजोरागात्मकं रंजनाद्रागोगैरिकादिवद्रागा
त्मकं विद्धि जानीहि तृष्णासंगसमुद्भवं तृष्णाप्राप्ताभिलाषः आसंगः
प्राप्ते विषये मनसः प्रीतिलक्षणं संश्लेषः तृष्णासंगसमुद्भवं तृष्णा
संगयोः समुद्भवं तृष्णासंगसमुद्भवं तन्निबध्नाति तद्रजः कौंतेय
कर्मसंगेन दृष्टादृष्टार्थेषु कर्मसु संजनने तत्परता कर्मसंगस्ते
न निबध्नाति रजोदेहिनं ७

आनंदगिरिकृतटीका २

रजस्तर्हि किंलक्षणं कथं वा पुरुषं निबध्नातीत्याशंक्याह रजइति
रज्यते संसज्यतेऽनेन पुरुषो दृश्येष्विति रागोभावाभ्यासःस्योति रागा
त्मकंरजोजानीहीत्याह रंजनादिति समुद्भवत्यस्मादिति समुद्भवः
तृष्णाचसङ्गश्च तृष्णासङ्गौ तयोः समुद्भवस्तमिति विग्रहं गृहीत्वा
कार्यद्वारा रजोविवृणोतितृष्णासङ्गयोरर्थभेदमाहतृष्णेत्यादिना रज
सोलक्षणमुक्त्वानिबंधनप्रकारमाह तदजइति कर्मसंगं विभजते
दृष्टेति प्रकर्ताऽहमेव पुरुषं करोमि इत्यभिमानेन प्रवर्तयतीत्यर्थः ७

स्वामिकृतटीका ३

रजसोलक्षणंबंधकत्वंचाहरजोरागेति रजःसंज्ञकंगुणंरागात्मकं
अनुरंजनरूपंविद्धि अतएवतृष्णासंगसमुद्भवं तृष्णाप्राप्तेर्थेऽभिला
षः संगः प्राप्तेर्थेप्रीतिविशेषेणासक्तिः तयोः तृष्णासंगयोः समुद्भवो
यस्मात्तद्रजोदेहिनं दृष्टादृष्टार्थेषुकर्मसुसंगेनआसक्त्यानितरां
बध्नाति तृष्णासंगाभ्यांहिकर्मस्वासक्तिर्भवति ७

पैशाचभाष्यटीका ४

रजः रागात्मकमिच्छात्मकंतृष्णाप्राप्ताभिलाषं संगःप्राप्तविषये
मनसः प्रीतिः तृष्णासंगसमुद्भवंतृष्णासंगकारणं कर्मसंगेनकर्मप

श्री
गी॰टी॰
चं॰

रनया ७

रामानुजभाष्यटीका ५

रज इति रजो रागात्मकं रागहेतुभूतं रागो योषित्पुरुषयोरन्योन्यस्पृ
हा तृष्णासंगसमुद्भवं तृष्णासंगयोरुद्भवस्थानं तृष्णासंगहेतुमि
त्यर्थः तृष्णा शब्दादिसर्वविषयस्पृहा संगः पुत्रमित्रादिसंबंधस्पृहा
तद्रजो देहिनं कर्मसु क्रियासु स्पृहाजननद्वारेण निबध्नाति क्रियासु
स्पृहया क्रिया आरभते देही ताश्च पुण्यपापरूपा इति तत्फलानुभव
साधनभूतासु योनिषु जन्महेतुर्भवति अतः कर्मसंगद्वारेण र
जो देहिनं निबध्नाति तदेवं रजो रागतृष्णासंगहेतुः कर्मसंगहेतुश्च
त्युक्तं भवति ७

अभिनवगुप्ताचार्यटीका ६

कर्मैरेषां रूपमुच्यते सत्वं निर्मलं तृष्णासंगस्य समुद्भवो यतः ७

परमार्थप्रपाटीका ७

एवमेतेषां गुणानां मध्ये सत्वं स्फटिकशिलावन्निर्मलत्वात्प्रकाशकं ज
नामयं ज्ञानं च एवं भूतमपि सत्वं सुखसंगेन ज्ञानसंगेन च देहिनं
बध्नाति इंद्रियाणां प्रवर्त्तकं रजो
रजसः स्वभावमाह रज इति रजः रागात्मकं रंजनरूपं विद्धि जानीहि
किंभूतं तृष्णासंगसमुद्भवं अप्राप्ताभिलाषस्तृष्णा प्राप्ते प्रीतिः संगस्तयो ष॰
तृष्णासंगयोः समुद्भवो यस्मात्तत् इदं देहिनं दृष्टादृष्टार्थेषु कर्मसु
संगेनासक्त्या नितरां बध्नाति ७

वनमालीटीका ८

रज्यते विषयेषु पुरुषो येनेति रागः कामः स एवात्मा स्वरूपं यस्य धर्म
धर्मिणोरभेदात् तद्रागात्मकं रजो विद्धि अप्राप्ताभिलाषस्तृष्णा प्रा
प्तस्योपस्थितेऽपि विनाशे संरक्षणाभिलाषः आसंगस्तयोः संभवो य
स्मात्तृष्णासंगसमुद्भवं तदिदं निबध्नाति कर्मसंगेन कर्मसु दृष्टादृष्टा
र्थेष्वहमिदं करोम्येतत्फलं भोक्ष्य इत्यभिनिवेशविशेषेण देहिन
मभिनिवेशमनायबध्नातीत्यर्थः ७

क्रसमवेनयनीटीका ९

रजसः स्वरूपमाह रजो रागात्मकमिति रागात्मकं रज्यते विषयेषु
पुरुषोनेनेति रागः स्त्रीपुरुषयोर्मिथः कामाभिलाषः स एवात्मा स्व
रूपं यस्य धर्मधर्मिणोस्तादात्म्यात्तद्रागात्मकं अतएव तृष्णासंगसमु
द्भवं तृष्णाप्राप्तवस्तुस्पृहा ... आसंगः प्राप्तस्य
वस्तुनो विनाशे उपस्थिते सति तस्य संरक्षणाभिलाषस्तयोस्तृष्णासं
गयोः समुद्भवः सम्यगुत्पत्तिर्यस्मात्तद्रजो विद्धि रजोगुणं जानीहि हे
कौंतेय तद्रजः कर्मसंगेन स्त्रीपुत्रादिविषयप्रायकेषु कर्मसु यः संग
स्तत्फलाभिलाषस्तेन देहिनं पुरुषं निबध्नाति स्त्रीपुत्रादिस्पृहया
कर्माणि पुरुषः करोति तानि कर्माणि स्वफलानुभवोपायभूतानि स्त्री
पुत्रादीनुपपादयंति पुनरप्येवमिति रजसो नाविमुक्तिरित्यभिप्रायः सत्व
गुणावलंबिन्या ... धियो रक्षसः क्रमाः पुत्रवतो रजोगुणो वशीकर्तव्यः स
मर्थो न भविष्यतीति संबोधनाशयः ... ७

मधुसूदनीटीका ॥

रज्यते विषयेषु पुरुषोनेनेति रागः कामो गर्द्धः स एवात्मा स्वरूपं यस्य तथा
मेधर्मिणोस्तादात्म्यात्तद्रागात्मकं रजो विद्धि अतएवाप्राप्ताभिला
षस्तृष्णाप्राप्तस्योपस्थितेपि विनाशे संरक्षणाभिलाषश्चासंगः तयोस्तृ
ष्णासंगयोः संभवो यस्मात्तद्रजो निबध्नाति हे कौंतेय कर्मसंगेन क
र्मसु दृष्टादृष्टार्थेषु अहमिदं करोमि एतत्फलं भोक्ष्ये इत्यभिनिवेश
विशेषेण देहिनं वस्तुतः अकर्तारमेव कर्तृत्वाभिमानिनं रजसः प्र
वृत्तिहेतुत्वात् ७

सदानंदीटीका ॥

भोगेषु रज्यतेनेनेति रागः कामसंज्ञकः स आत्मा यस्य रजसस्तादात्म्या
द्धर्मधर्मिणोः १ तृष्णाप्राप्ताभिलाषः प्राप्तस्य ... नाशस्योपस्थि
ते तस्य संरक्षणाभिलाषो यः स आसंगस्तयोर्जनिः २ यस्मात्तद्वि
रजो ज्ञेयं कर्मसंगेन देहिनं करोम्यहमिदं कर्मैतत्फलं भोक्ष्ये इत्य
यं आग्रहः कर्मसंगस्तेन बध्नात्यसंगिनं वस्तुतस्तमक...ती

श्री॰ गी॰टी॰ चै

रंकर्तृत्वाभिनिवेशतः ४ रजःप्रवृत्तिहेतुत्वात्स्ववशे स्थापयत्य
मुम् ८

नीलकंठीटीका १२

रजोगुणो रागो रंजनात्तदात्मकं विद्धि तृष्णाप्राप्यमाणेष्व
प्यर्थेष्वत्यभिः संगः प्राप्ते विषये मनसः प्रीतिलक्षणः संश्लेषस्त
31 योःसमुद्भवं निदानभूतं तद्रजो हे कौंतेय कर्मसंगेन दृष्टादृष्टार्थे
षु कर्मसु संगस्तत्परता तेन निबध्नाति देहिनं देहाभिमानिनं ८

आनंदीटीका १३

रागात्मकं विषयाभिलाषरूपं अप्राप्तप्राप्तीच्छा तृष्णा प्राप्तसंगः प्रा
प्तस्य रक्षणे यत्नः तयोः समुद्भवमुत्पादकं कर्मसंगेन प्रवर्तकत्वात् नि
यतकार्यकर्तृत्वाभिमानेन बध्नाति ८ ॥

रामकंठीटीका १४

रजःसंज्ञं गुणं रागात्मकं सर्वाभिलाषरूपं जानीहि तत एव तृष्णा
संगसमुद्भवमनादिप्रबंधप्रवृत्तत्वात् तृष्णा विषयरसपिपासा तत्र
संगस्तदेकलीनत्वं ततः समुद्भवो जन्म यस्य तत्तादृशं जानीहि तत
देवस्वभावं रजः कर्मसंगेन देहवंतं बध्नाति कर्मरागप्रयुक्तस्येष्ट
विषयाहरणानिष्टविषयपरिहारेण प्रवृत्तिस्तत्र संगस्तत्परत्वं ते
न नियतकार्यकर्तृत्वाभिमानरूपेण परवशीकरोति तथा ८

^ अथ रजसो लक्षणं बंधकत्वं चाह ॥

लाक्षिकी टीका १५

रजःसंज्ञं गुणं रागात्मकमभिलाषात्मकं विद्धि अत एव तृष्णासं
गसमुद्भवं तृष्णा प्राप्तेष्वर्थेषु रतिरासंगः प्राप्तेष्वर्थेषु मनसक्तत्वं तयोः
समुद्भवो यस्मात्तत् तद्रजो देहिनं पुरुषं कर्मसंगे प्रवृत्तितत्परत्वे
न निबध्नाति परवशीकरोति अथ रजसो लक्षणं बंधकत्वं चाह ८ ॥

पंचोलीटीका

रजसो लक्षणं बंधकत्वं चाह रज इति हे कौंतेय तृष्णासंगसमुद्भवं अ
प्राप्तवस्तुन्यभिलाषस्तृष्णा प्राप्ते विषये प्रीतिः संगस्तयोः समुद्भवं र
जः रंजनाद्रागात्मकं विद्धि जानीहि तद्रजो देहिनमात्मानं कर्मसंगेन दृ
ष्टादृष्टार्थेषु कर्मसु संगेन तत्परतया निबध्नाति ७ ॥

रजइति रजःसंज्ञकं गुणं रागात्मकं रज्यतेनेन विषयेष्विति रा
गः सएवात्मा स्वरूपं यस्यतं रागात्मकमनुरंजनरूपं विद्धि जा
नीहि अतएव तृष्णासंगसमुद्भवं प्राप्तेर्थेभिलाषस्तृष्णाप्रा
प्ते प्रीतिविशेषेणासक्तिः संगस्तयोस्तृष्णासंगयोः समुद्भवो
यस्मात्तद्रजो देहिनां दृष्टादृष्टार्थेषु कर्मसु संगेनासक्त्या नित
रां बध्नाति तृष्णासंगाभ्यां हि कर्मसु प्रवृत्तिर्भवति न स्वतंत्र आत्म
नः कर्तृत्वमिति भावः ७ ॥

मधुभाष्य

७ ॥

32

भाषा अनुवाद ॥

अब रजोगुण का स्वरूप और बंधकत्व कहते हैं कि हे कौंते
य अर्जुन रजोगुण को रागात्मक कहे अनुराग स्वरूप जानो
इस से तृस्ना जो अप्राप्त वस्तु मे अभिलाष औ संग कहे प्राप्त
विषय मे जो सम्पूर्ण आशक्ति इन दोनो का रजोगुण से उद्भव हो
य है सोई रजोगुण देही जीव को दृष्ट औ अदृष्ट अर्थ कर्मों की
आशक्ति से निश्चय बंध करै है क्यों कि तृस्ना औ संग के द्वारा
समस्त कर्म्म मे आशक्ति होता है। ७ ॥

दोहा

रागात्मक रज जान हूं संग तृस्ना ते होय कुंतिसुत बंधन क
रैं कर्मसंगते सोय ७॥

33

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां प्रमादा
लस्यनिद्राभिस्तन्निबध्नाति भारत ८

शांकरभाष्यं १

तमस्त्विति तमस्तृतीयो गुणोऽज्ञानजमज्ञानाज्जातं तमस्त्वज्ञानजं विद्धि
मोहनं मोहकरमविवेककरं सर्वदेहिनां सर्वेषां देहवतां प्रमादा
लस्यनिद्राभिः प्रमादश्चालस्यं च निद्रा च प्रमादालस्यनिद्रास्ताभिस्त
मो निबध्नाति भारत ८

आनन्दगिरिकृतटीका २

तमस्तर्हि किं लक्षणं कथं वा पुरुषं निबध्नाति तत्राह तमस्त्विति गु
णानां प्रकृतिसम्भवत्वाविशेषेपि तमसोऽज्ञानजत्वविशेषणं
तद्विपरीतस्वभावानापत्तेरिति मत्वाह अज्ञानादिति शुद्धति हिता
हितेन विविच्यतेऽनेन इति मोहनमविवेकप्रतिबन्धकमिति का
र्यद्वारा तमो निर्दिशति मोहनमित्यादिना लक्षणमुक्त्वा तमसो बन्ध
नकत्वं दर्शयति प्रमादेति कार्यान्तरासक्ततया चिकीर्षितस्य
कर्तव्यस्याकरणं प्रमादः निरीहत्वमालस्यं प्रतिबन्धस्यालसस्य स्वा
पो निद्रा ताभिरात्मानमविकारमेव तमोऽपि विकारयतीत्यर्थः ८

स्वामिकृतटीका ३

तमसो लक्षणं बन्धकत्वं चाह तम इति तमस्त्वज्ञानाज्जातं आवरण
शक्तिप्रधानात् प्रकृत्यंशादुद्भूतं विद्धीत्यर्थः अतः सर्वेषां देहिनां
मोहनं भ्रान्तिजनकं अत एव प्रमादेनालस्येन निद्रया च तत्तमो देहि
नं निबध्नाति तत्र प्रमादोऽनवधानता आलस्यमनुद्यमः निद्रा चित्तस्या
वसादः लयः ८

पैशाचभाष्यटीका ४

अज्ञानजं अज्ञानजातं मोहनं मोहकारणमविवेककारणमित्यर्थः
प्रमादालस्यनिद्राभिर्देहिनं तमो निबध्नाति ८

श्री॰
गी॰टी॰
चं

34

रामानुजभाष्यटीका ५

तमइति ज्ञानादन्यदिहाज्ञानमभिप्रेतं ज्ञानं तु वस्तुयाथात्म्यावबोधः तस्मादन्यदिह विपर्ययज्ञानं तमस्तु याथात्म्यविपरीतविषयज्ञानजं मोहनं सर्वदेहिनां मोहो विपर्ययज्ञानमित्यर्थः तत्तमः प्रमादालस्यनिद्राहेतुतया तैर्द्वारेण तं निबध्नाति प्रमादः कर्तव्यात् कर्मणोऽन्यत्र प्रवृत्तिहेतुभूतमनवधानं आलस्यं कर्मस्वनारंभस्वभावः स्तब्धतेति यावत् पुरुषस्येंद्रियप्रवर्तनश्रान्त्या सर्वेंद्रियप्रवर्तनोपरतिः निद्रा तत्र बाह्येंद्रियप्रवर्तनोपरमः स्वप्नः मनसोऽप्युपरमः सुषुप्तिः [illegible] ८ ॥

अभिनवगुप्तकृतटीका ६

दुर्लभस्यापि चिरतरसंचितपुण्यप्राप्तलब्धस्यापवर्गप्राप्त्येककारणस्य मानुष्यकस्य वृथातिवाहनं प्रमादः तथा चोक्तम् आयुषः क्षण एकोऽपि सर्वरत्नैर्न लभ्यते स वृथा नीयते येन स प्रमादी नराधम इति आलस्यं शुभकरणीयेषु निःशेषेण ज्ञानकुंतितागातिर्निद्रा ८ ॥

[illegible] परमार्थप्रपाटीका ७

तमोलक्षणमाह तमइति तमः अज्ञानाज्जातं आवरकस्य शक्तिप्रधानात्प्रकृत्यंशाज्जातं विद्धि । अतः सर्वेषां देहिनां मोहनं मोहजनकं अत एव प्रमादालस्यनिद्राभिर्बध्नाति तत्र प्रमादोऽनवधानता आलस्यमनुद्यमः निद्रा चित्तस्य अवसादस्तैः ८ ॥

वनमालीटीका ८ ॥

अज्ञानं यथार्थज्ञानविरोधि मिथ्याज्ञानं ज्ञानसामान्यविरोधिजाड्यं वा तज्जायते यस्मात्तदज्ञानजं तमो विद्धि सर्वदेहिनां विपरीतधीजनकं प्रमादालस्यनिद्राभिः स्वकार्यैः स देहिनं नितरां बध्नाति प्रमादोऽनवधानं वस्तुविवेकासामर्थ्यं वा आलस्यमनुद्यमो रजोवृत्तिविरोधी तमोगुणालेवनाहृत्तिर्निद्रा ८ ॥

ज्ञमवैजयंतीटीका ८

तमसः स्वरूपमाह तमस्त्विति तुशब्दः पूर्वोक्तद्वयाद्विशेषद्यो
तकः अज्ञानजं वस्तुयाथात्म्यावगमो ज्ञानं तस्याज्ञानस्य विरो
धज्ञानं ज्ञानावरकस्वभावत्वात् यद्वा ज्ञानादन्यदज्ञानं ज्ञा
नविपर्ययं ज्ञानस्वरूपत्वात् प्रकृते स्वरूपं वस्तुयाथात्म्य
विपरीतज्ञानमज्ञानमित्यर्थः तस्माज्ज्ञानावरणशक्तिरूपा
दज्ञानाज्जातमुद्भूतं भरतपव सर्वदेहिनं सर्वेषां ब्रह्मेशादिपि
पीलिकान्तानां देहिनां देहाभिमानिनां प्राणिनां मोहनं विपर्य
यज्ञानजनकं वस्तुयाथात्म्यज्ञानावरकं च तमोगुणं विद्धि त्वं
जानीहि हे भारत तत्तमः प्रमादालस्यनिद्राभिः प्रमादोनवधा
नमकार्ये कर्मणि प्रवृत्तिरूपं सत्वकार्यप्रयासविरोधी आलस्य
कर्मस्वनारंभस्वभावात् सो रजः कार्यप्रवृत्तिविरोधिनी पुरुष ^१ द्रातदुभयविरोधिनी
स्येंद्रियप्रवर्तनसामर्थ्यनिवृत्त्या सर्वेंद्रियप्रवर्तनोपरम इति न
त्ववाह्येंद्रियप्रवर्तनोपरमः स्वप्नः मनसोप्युपरमस्सुषुप्तिरेतैः
स्वकार्यैः प्रमादादिभिः पुरुषं निवध्नाति यथा राजर्षिर्भरतः
प्राकृतिकेंगुणेन याभिनिवेशं विहाय प्राकृतमृगणाश्रयणे
नमज्ञावेषामस्तथा तद्देशस्त्वमपि कुर्विति संबोधनाभिप्रायः
८ ॥

मधुसदनीटीका ९

तुशब्दः सत्वरजोपेक्षया विशेषद्योतनार्थः अज्ञानादावरणश
क्तिरूपादुद्भूतमज्ञानजं विद्धि तमः अतः सर्वेषां देहिनां मोहनमविवे
करूपत्वेन भ्रांतिजनकं प्रमादेनालस्येन निद्रया च तत्तमो निवध्नाति
देहिनमित्यनुषज्यते हे भारत प्रमादो वस्तुविवेकासामर्थ्यं सत्वका
र्यप्रकाशविरोधी आलस्यं प्रवृत्त्यसामर्थ्यं रजः कार्यप्रवृत्तिविरो
धी उभयविरोधिनी तमोगुणालंबना वृत्तिर्निद्रा इति विवेकः
[illegible] ८ ॥

सदानंदीटीका ११

तमः सत्वरजोभिन्नमज्ञानादावृतेः पदात् उद्भूतं विद्यतः सर्वभूता
नां भ्रांतिकारणं १ अविवेकतयानर्थजाले वध्नाति देहिनं सत्वका
र्यप्रकाशस्य विरोधी तत्त्ववस्तुनः २ विवेकासामर्थ्यरूपः प्रमादो

श्री॰
गी॰ टी॰
चं॰

35

नवधानता रजःकार्यप्रवृत्तेस्तु विरोध्यालस्यमुच्यते १ तमो
गुणाश्रयावृत्तिर्निद्रोभयविरोधिनी त्रिभिर्भावैस्तमोप्येनेस्वव
शेस्थापयत्यदः ८ ॥

नैलकंठीटीका १२

तमोगुणः तु पूर्वाभ्यां विलक्षणः अज्ञानेमायायाआवरणशक्ति
स्ततउद्भूतंअज्ञानजंविद्धि अतःसर्वेषांदेहिनांमोहनंभ्रांतिहेतुः
प्रमादेनवहितत्वंसत्वसत्वकार्यप्रकाशविरोधी आलस्यंजडता
तच्चरजःकार्यप्रवृत्तिविरोधि उभयकार्यनिरोधिनीतमोगुण
लेवनावृत्तिर्निद्रानाभिस्तत्तमोनितरांवध्नाति हेभारत देहिन
मित्यनुवर्तते ८ ॥

आनंदीटीका १३

मोहनंभ्रांतिजनकम् प्रामस्यावश्यकरणीयस्याकरणंप्रमा
दः करणसामर्थ्येप्यनुत्साहआलस्यम् ८

रामकंठीटीका १४

तमोलक्षणंपुनर्गुणमज्ञानजंप्रकाशस्वभावसत्वगुणप्रवि
विक्तत्वाज्ञानाभावप्रभवंयतश्चसर्वशरीरिणांमोहनंज्ञे
यविषयाप्रतिपत्तिजननेजानीहितत्तथाविधंतमः प्रमा
देनोपायोपेयविवेकनिरपेक्षत्वेनतथालस्येनप्रवृत्त्यात्मक
रजोविविक्तरूपत्वात्कार्येष्वुद्योगेन तथानिद्रयामोहनरूपे
णसर्वेंद्रियशक्तिविरमेणदेहिनंबध्नातिनियच्छतीतिगुण
त्रयस्यस्वरूपंबंधप्रकारश्चप्रतिपादितइदानींयस्मिंस्वकार्ये
सतियस्यगुणस्योत्कर्षोभवतितथातत्स्वरूपंप्रतिपादयितु
माह ८ ॥

लासिकी [illegible]टीका १५

तमसोलक्षणंबंधकत्वं चाह ॥

तमोगुणमज्ञानजंसत्वप्रकाशाभावप्रभावमावरणशक्तिरू
पात्मकत्वंशाद्वाज्जातंविद्धि अतएवमोहनंज्ञेयविषयाप्रतिपत्ति
करंसर्वेषांदेहिनां तमः प्रमादेनवधानता आलस्यमनुद्यमः
निद्रेंद्रियशक्तिविरामस्ताभिर्निबध्नातिआत्मा सात्करोति [illegible]
[illegible]
[illegible] ८ ॥

पंचोलीटीका

तमसोलक्षणंबंधकत्वमाह तमस्त्विति हेभारततमस्तुअज्ञा-
ज्ञानजंअज्ञानाज्जातमज्ञानजंसर्वदेहिनांसर्वप्राणिनांमोहनंमोह
करंविद्धि ततमः प्रमादालस्यनिद्राभिर्देहिनंवध्नाति ८

रत्नवीरसमिद्बोधिनी

तमस्त्विति तमः संज्ञकं गुणमज्ञानजमावरणशक्तिप्रधानात्प्र
कृत्यंशादुद्भूतं विद्धि अतः सर्वदेहिनां मोहनं मोहोत्पादकमत
एवप्रमादेनालस्येननिद्रयाच तत्तमो निबध्नाति भारतेति भर
तकुलोत्पन्नत्वात्त्वंहितवप्रमादवशपतनायुक्तात्स्वधर्ममनुतिष्ठे
तिभावः ८॥

मधुभाष्य

८॥

36

भाषा अनुवाद

अब तमोगुण का स्वरूप औ बंधकत्व कहते हैं कि तमोगुण अज्ञान से प्रगट है अर्थात् आवरण शक्ति प्रधान प्रकृति के अंश से प्रगट जानो इससे हे भारत अर्जुन यावत जीव का मोहकारी अर्थात् भ्रम उत्पन्न करै है तो कौन यह तमोगुण प्रमाद आलस्य औ निद्रा आदि दोष जीव को करैगा ८ ॥

दोहा

अज्ञान जन्य तम जानहूं सर्वजीवको मोहिं निद्रा आलस
प्रमादसें मोहें समहि सोहि ८॥

37

सत्वं सुखे सञ्जयति रजः कर्म्मणि भारत ज्ञा
नमावृत्य तु तमः प्रमादे सञ्जयत्युत ९

शांकरभाष्यं १

पुनर्गुणानां व्यापारः संक्षेपत उच्यते सत्वमिति सत्वं सुखे संजयति
संश्लेषयति रजः कर्म्मणि हे भारत संजयतीति वर्त्तते ज्ञानं सत्वकृ
तं विवेकमावृत्याच्छाद्य तु तमः स्वेनावरणात्मना प्रमादे संजयत्यु
त प्रमादो नाम प्राप्तकर्त्तव्याकरणं ९

आनन्दगिरिकृतटीका २

उक्तानां मध्ये कस्मिन् कार्ये कस्य गुणस्योत्कर्षस्तत्राह पुनरिति
स्वस्वसाध्ये [illegible] समुन्नद्धत्वं [illegible] सत्वमिति संजयती
त्यस्यार्थमाह संश्लेषयतीति कर्म्मणि साध्ये रजःसमुन्नद्धत्व इत्या
ह रजइति प्रमादे प्राधान्यस्तमसो दर्शयति ज्ञानमिति ९

स्वामिकृतटीका ३

सत्वादीनामेव स्वस्वकार्यकरणसामर्थ्यातिशयमाह सत्वमिति सत्वं
सुखे संजयति संश्लेषयति दुःखशोकादिकारणे सत्यपि सुखाभि
मुखमेव देहिनं करोतीत्यर्थः एवं सुखादिकारणे सत्यपि रजः क
र्म्मण्येव संजयति तमस्तु महत्संगेनोच्यमानमपि ज्ञानमावृत्या
च्छाद्य प्रमादे संजयति महद्भिरुपदिश्यमानस्यार्थस्यानवधाने योज
यति उत आलस्यादावपि योजयतीत्यर्थः ९

पिशाचभाष्यटीका ४

सत्वं सुखे इति कर्म्मणि क्रियायां ज्ञानमावृत्य ज्ञानमाच्छाद्य तमः प्र
मादे प्राप्तप्रतिपत्तौ ९

सत्वादीनां बंधद्वारभूतेषु प्रधा
नान्याह

रामानुजभाष्यटीका ५

सत्वमिति सत्वं सुखसंगप्रधानं रजः कर्म्मसंगप्रधानं तमस्तु वस्तुया
थात्म्यज्ञानमावृत्य विपरीतज्ञानहेतुतया कर्त्तव्यविपरीतप्रवृत्ति
संगप्रधानं देहाकारपरिणतायाः प्रकृतेः स्वरूपानुबंधिनः सत्वा
दयो गुणाः

श्री॰ [illegible] ॥

श्री॰ टी॰ चं

अभिनवगुप्तकृतटीका ६

संजयति योजयति ९ ॥

38

परमार्थप्रपाटीका ७

अथ सत्त्वादीनां स्वस्वकार्यसामर्थ्यातिशयमाह सत्त्वमिति दुः
खशोकादिकारणे सत्यपि सत्त्वं सुखे संजयति देहिनं सुखाभिमुख
मेव करोति तथैव सुखादिकारणे सत्यपि रजः कर्मण्येव संजय
ति तमस्तु तत्संगेऽपि ज्ञानमावृत्य प्रमादे संजयति एवं वैधानं करो
ति ॥ ९ ॥

वनमालीटीका ८

उक्तानां मध्ये कस्मिन् कार्ये कस्य गुणस्योत्कर्षस्तत्राह सत्त्वमिति स
त्त्वमुत्कृष्टं सत् सुखे संजयति दुःखहेतुमभिभूय सुखे संश्लेषयति
सर्वत्र देहिनमित्यनुषज्यते एवं रज उत्कृष्टं सत् सुखकारणमभिभूय
कर्मणि संजयते इत्यनुषज्यते तमः सत्त्वकार्यं ज्ञानमावृत्याच्छाद्य तदुत्
त्रिपतिवत्प्रमादे वस्तुविवेके ज्ञातव्यवस्तुनोऽज्ञानेन संजयति उत
अवश्यमप्राप्तकर्तव्यताकस्याकरणे आलस्ये निद्रायां च संजयती
त्यर्थः ९ ॥

जसमवेजयंतीटीका ९

सत्त्वादयो गुणाः स्वेतरद्वयोत्कृष्टाः सन्तः स्वकीयमेव कार्यं तन्वन्ती
त्याह द्वाभ्याम् सत्त्वमिति स्वेतराभ्यां रजस्तमोभ्यां स्वयमुत्कृष्टं स
त्स्वकार्ये कर्मणि पुरुषं संजयति तमस्तु स्वेतराभ्यां सत्त्वरजोभ्यां स्व
यमुत्कृष्टं सत् स्वकार्याज्ज्ञानमावृत्याच्छाद्य यथार्थकज्ञानमावृ
त्याच्छाद्य यथार्थकज्ञानमपसार्येत्यर्थः स्वकीये कार्ये प्रमादे पुरुषं सं
जयति उत शब्देन कदाचित्सत्त्वरजोभ्यां ज्ञानकर्मासक्तेहेतु तथा के
नचिन्महज्जनसंगेन संप्राप्तभगवत्संबंधिज्ञानकर्माचरणद्वारा त
पस्य संसारनिवृत्तिः स्यान्न समसात्वादिनैव किंतु नित्यसंसारी भव
तीति द्योतितम् ९ ॥

सुखे पुरुषं संजयत्यासक्तं करोति
रजः स्वेतराभ्यां सत्त्वतमोभ्यां स्वयमु
त्कृष्टं सत् स्वकार्ये ९

मधुसूदनीटीका १०

उक्तानां मध्ये कस्मिन्कार्ये कस्य गुणस्योत्कर्ष
इति तत्राह ॥ सत्त्वमुत्कृष्टं सत्सुखे संजयति दुःखकारणमभिभूय सुखे संश्ले

षयति सर्वत्र देहिनमित्यनुषज्यते एवं रजउत्कृष्टं सत्सुखकारणमभि
भूय कर्मणि संजयतीत्यनुषज्यते तमस्तु प्रमाणवलेनोत्पद्यमानमपि
सत्वकार्यं ज्ञानमावृत्याच्छाद्य प्रमादे प्राप्तज्ञायमानताकस्याप्यज्ञाने सं
जयति उत अपि प्राप्तकर्तव्यताकस्याप्यकरणे आलस्ये तामस्यां च निद्रा
यां संजयतीत्यर्थः ९ ॥

सदानंदीटीका ११

कस्मिन्कार्ये च कस्यास्त्रिगुणस्योत्कर्ष उच्यते उत्कृष्टं सत्वमात्मानं सुखे सं
श्लेषयत्यदः दुःखहेतुं तिरस्कृत्य सुखाभिव्यंजकत्वमत एवं रजः सउ
त्कृष्टं विक्षेपकतयाजनं २ सुखहेतुं तिरस्कृत्य संश्लेषयति कर्मणि
जायमानमपि ज्ञानं सत्वकार्यं प्रमाणतः ३ आच्छाद्याज्ञानसंवद्धे प्रमादे
निद्रिपेतमः प्राप्तकर्तव्यताकस्याप्यालस्ये तद्विपर्यये तामस्यां चैव नि
द्रायां देहिनं संजयत्यपि ९ ॥

नीलकंठीटीका १२

सत्वमुत्कृष्टं सत्सुखेदुःखकारणमभिभूय संजयति संश्लेषं जनयति
एवमुत्तरत्रापि ज्ञानं प्रकाशं आवृत्य प्रमादे अवश्यकर्तव्यस्याकरणे ९

आनंदीटीका १३

एतदेवप्रकटमाह संजयति संगं कारयति प्रमादे आलस्य निद्रयोरप्युपलक्षणम् ए
तेषामन्योन्याभिभवं लक्षयति ९ ॥

रामकंटीटीका १४

सुखलक्षणे सत्वगुणकार्ये सति सत्वं संजयति सम्यगतिशयं भज
ते एवं रजो गुणकार्ये कर्मणि रजः संजयति तथा प्रमादे पूर्वोक्तलक्ष
णे सति तमः संजयति किं च तत् ज्ञानं विषयावगममावृत्य तिरस्कृ
त्य अथैषामन्योन्याभिभवहेतुत्वं प्रतिपादयितुमाह ९ ॥

लासिकी ~~[illegible]~~टीका १५

+ सुखलक्षणे सत्वकार्ये सति सत्वं संजयति अन्योन्याश्रयत्वे सत्यप्युत्क
र्षं लभते एवं कर्मणि ह्यकार्ये सति रजउत्कर्षं लभते सुखादिग्रहणं
ज्ञानादीनामुपलक्षणार्थम [illegible]
[illegible] ९ ॥

+ ननु सत्वादीनामन्योन्याश्रयत्वात्कथं विविक्तस्वकार्यकरणत्वमित्याशंक्याह ॥

बसयुग्म पंचोलीटीका

सत्वादीनामेव स्वस्वकार्यकरणे सामर्थ्यमिति प्रायं संक्षेपत आह सत्वं
सुख इति हे भारत सत्वं सुखे देहिनं संजयति संश्लेषयति रजः देहिनं
कर्मणि संश्लेषयति तमोपि देहिनं ज्ञानमावृत्य प्रमादे संश्लेषयति ९

रणवीरसमिद्धोयिनी

[illegible] गुणानां कार्योत्कर्षमाह सत्वमिति सत्वमुत्कृष्टं सत् सुखे
संजयति संश्लेषयति सत्यपि दुःखशोकादिकारणे सुखोन्मु
खमेव देहिनं करोति एवं सुखादिकारणे सत्यपि कर्मण्येव
रजः संजयति अत्र प्रमादो नवधा नत्ताम्रालस्यमनुद्यमो निद्रावि
तस्या वस्मादस्त्यते भुसंयोजयतीत्यर्थः ९॥

मधुभाष्य

९॥

भाषा अनुवाद

सत्व आदि तीनो गुणों के स्वकार्य करने मे सामर्थ्य की प्राप्ति
को कहते हैं कि हे भारत अर्जुन सतो गुण सुख में युक्त
करताहै अर्थात् यद्यपि विषयसुख ईर्षा असूया जोग से
प्रगट सुखदुख शोक आदि का कारण स्वरूपहै तो भी जीव
को सुख ही की ओर उन्मुख करता है और रजोगुण सुख आ
आदि का कारण हो के भी सर्व कर्मो मे युक्त करता है और
तमो गुण महात्मों के संग से उत्पन्न ज्ञानको आवरण करि
के असावधान कर देय है अर्थात् महात्मों के उत्तम उपदे
को नही समझनेदेय है और आलस्य आदि मे अधीनर यु
क्त कर देता है ९

दोहा

सत्वगुण सुखमें जोडहिं रजकर्महिं भारत तमोगुण
ज्ञानढकायके मदहि में संयुत ९॥

रजस्तमश्चाभिभूय सत्वं भवति भारत रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा ९ ॥

शांकरभाष्यटीका १

उक्तं कार्यं कदा कुर्वंति गुणा इत्युच्यते रजइति रजस्तमश्चोभावप्यभिभूय सत्वं भवत्युद्भवति वर्द्धते यदा तदा लब्धात्मकं सत्वं स्वकार्यं ज्ञानसुखाद्यारभते हे भारत तत् तथा रजोगुणः सत्वं भा तमश्चैवोभावप्यभिभूय वर्द्धते यदा तदा कर्मतृष्णादि स्वकार्यमारभते तमआख्यो गुणः सत्वं रजश्चोभावप्यभिभूय तथैव वर्द्धते यदा तदा ज्ञानावरणादि स्वकार्यमारभते । ९ ॥

आनंदगिरिटीका २

इतरेतराविरोधेन वा सत्वादयो गुणा युगपदुत्कृष्यन्ते विरोधेन वा क्रमेण वेति सन्देहात् पृच्छति उक्तमिति । सत्वोत्कर्षार्थिनामितराभिभवार्थं क्रमपक्षमाश्रित्योत्तरमाह उच्यतेइति सत्वाभिवृद्धिमेव विवृणोति तदेति रजस्तमसोस्तिरोधानदशायामितियावत् रजसो वृद्धिप्रकारन्तत्कार्यंच कथयति तमसोपिवृद्धिन्तत्कार्यंच निर्दिशति तमइति ९ ॥

स्वामिकृतटीका ३

तत्रहेतुमाह रजइति रजस्तमश्चेति गुणद्वयमपिभूयतिरस्कृत्यसत्वं भवति अदृष्टवशादुद्भवति ततः स्वकार्यं सुखज्ञानादौ संजयतीत्यर्थः एवं रजोपि सत्वतमश्चगुणद्वयमभिभूयोद्भवति ततश्च स्वकार्यं तृष्णाकामादौ संजयति एवं तमोपि सत्वरजश्चाभिभूयोद्भवति ततश्च स्वकार्ये प्रमादालस्यादौ संजयतीत्यर्थः ९ ॥

पिशाचभाष्यटीका ४

अभिभूयान्यद्वावृद्धं भवति ९ ॥ ॥

रामानुजभाष्यटीका ५

+रजइति यद्यपि सत्वादयस्त्रयः प्रकृतिसंसर्गात्मस्वरूपानुबंधिनः

+तेसहृपानुबंधित्वेन सर्वदा सर्वे वर्तंते इति परस्पर विरुद्धं कार्यं कथं जनयंतीत्यत्राह ॥

श्री॰ गी॰ टी॰ चं॰

तथापि प्राचीनकर्मवशात् देहाग्रानभूताहारवैषम्याच्च सत्वाद
यः परस्परमुद्भवाभिभवरूपेण वर्तन्ते रजस्तमसी कदाचिदभिभूय
सत्वमुद्रिक्तं वर्तते तथा तमः सत्वे अभिभूय रजः कदाचित् रजः स
त्वे अभिभूय तमः [illegible] १० ॥

अभिनवगुप्तटीका ६

रजस्तमसी अभिभूय सत्वं वर्धते रजस्तु सत्वतमसी तमः सत्वर
जसी उक्तं हि अन्योन्याभिभवेन गुणवृद्धिरिति १० ॥

परमार्थप्रपाटीका ७

अथ द्वयोरुपरमे एकस्योत्कर्षमाह रजस्तम इति रजस्तमश्चाभि
भूय पराभूय सत्वं भवति अदृष्टवशादुद्रिक्तं भवति अतः स्वका
र्यं सुखज्ञानादीन् जनयतीत्यर्थः एवं रजोपि सत्वं तमश्चाभिभूय
ततः स्वकार्यं तृष्णाकर्मादीन् जनयति एवं तमोपि १० ॥

वनमालीटीका ८

रजस्तमश्च युगपदुद्भावपि गुणावभिभूय सत्वं भवत् उद्भवति
वर्धते यदा तदा स्वकार्यं प्रागुक्तमसाधारणेन करोतीति शेषः
एवं रजोपि सत्वं तमश्चेति गुणद्वयमभिभूयोद्भवति यदा तदा
प्रागुक्तं स्व कार्यं करोति तथा तद्वदेव तमोपि सत्वं रजश्चेत्यु
भावपि गुणावभिभूयोद्भवति यदा तदा स्वकार्यं प्रागुक्तं करोति १०

ऊसमवैजयंतीटीका ९

ननु समेषु त्रिषु कथमकस्मादेकस्योत्कर्षः संभवतीत्याशङ्क्य
प्राचीनतादृशकर्मोदयात्तादृशाहाराद्वा घटत एवेत्याह रज
स्तमश्चेति हे भारत सत्वकर्तृ रजश्च तमश्चाभिभूय तिरस्कृ
त्योत्कृष्टं भवति तथा रजः कर्तृ कदाचित् सत्वतमसी अभिभू
योत्कृष्टं भवति तथा तमः कर्तृ कदाचित् सत्वरजसी अभिभूयो
त्कृष्टं भवति तदा बलिन्देहेन्द्रियेषु प्राधान्येन पूर्वोक्तं स्वस्वकार्य
मपि जनयतीत्यर्थः १० ॥

उक्तं कार्यं कदा कुर्वन्ति गुणा इत्युच्यते

मधुसूदनीटीका ९

रजस्तमश्च युगपदुभावपि गुणावभिभूय सत्त्वं भवत्युद्भवति
वर्धते यदा तदा स्वकार्यं प्रागुक्तमसाधारण्येन करोतीति शेषः
एवं रजोपि सत्त्वं तमश्चेति गुणद्वयमभिभूयोद्भवति यदा तदा
प्रागुक्तं स्वकार्यं करोति तथा तद्वदेव तमोपि सत्त्वं रजश्चेत्युभा
वपि गुणावभिभूयोद्भवति यदा तदा प्रागुक्तं स्वकार्यं करोतीत्य
र्थः [illegible] ९ ॥

सदानंदीटीका ११

उक्तकार्यं कदा एते कुर्वंतीत्युच्यतेऽधुना रजस्तमश्च युगपदभि
भूय गुणो यदा । सत्त्वं विवर्द्धते तर्हि स्वीयं कार्यं करोति तत् २
सत्त्वं तमोभिभूयैवं रजः स्वीयं करोति तत् सत्त्वरजस्तिरस्कृत्य
करोत्येवं स्वकं तमः ९ ॥

नीलकंठीटीका १२

सत्त्वादयः कदा स्वस्वकार्ये प्रभवंतीत्याशंक्येतरेतरयोरभिभ
वे सतीत्याह रजइति रजस्तमसी अभिभूय सत्त्वं भवति वर्धते
एवं रजोपि सत्त्वतमसी अभिभूय भवति तथा तमोपि सत्त्वरज
सी अभिभूय भवतीत्यर्थः ॥ ९ ॥

आनंदीटीका १३

स्पष्टोऽर्थः [illegible] ९ ॥

रामकंठीटीका १४

रजस्तमसी अभिभूय न्यक्कृत्य सत्त्वगुणो वर्धते किमुक्तं भव
ति यदा सत्त्वं विरुद्धद्बलवद्भवति न तदा तदितरो गुणः स्वका
र्यमारभते एवं तमः सत्त्वे अभिभूय रजोगुणो वर्धते तथा
रजः सत्त्वे अभिभूय तमोगुणो वर्धते अथैषां गुणानां विरुद्ध
त्वव्यंजनानि लिंगान्याह ॥ ९ ॥

+ ननूत्कर्षलाभायान्योन्याभिभवाभिभवकर्तां विना न विद्यते इत्यत आह ॥

श्री॰ लासिकी [illegible]टीका १५

गी॰ टी॰ + अस्मिन्देहे यस्मिन्क्षणे सर्वेषु श्रोत्रादिषु द्वारेषु विषयसंवेदनरू
चं॰ पो ज्ञानात्मकः प्रकाशो जायते तदा सत्त्वगुणो रजस्तमसी अभिभू
योपचित इति जानीयात् तत्रशब्दात् सुखादिलिंगेनापि किंच
रजस्तमसी अभिभूय यस्मात्कारणात् सत्त्वं भवति उद्भवं लभते ततस्तदा त
दितरो गुणः स्वकार्यमारभते एवं सत्त्वतमसी अभिभूय रजो
गुणो वर्धते सत्त्वरजसी अभिभूय रजो गुणो वर्धते [illegible]
[illegible] १० ॥

पंचोलीटीका

गुणानां स्वस्वकार्यकरणे अवस्थाविशेषहेतुमाह रज इति हे
१ज८ भारत अस्मात् तमः द्वावपि अभिभूय सत्त्वमुद्भवति वर्धते तदा
ज्ञानं सुखादि स्वकार्यं करोति सत्त्वं च अन्यत तमः द्वावप्यभिभूय र
ज उद्भवति तदा कर्मतृष्णादि स्वकार्यमारभते तथा सत्त्वं रज उभा
वपि अभिभूय तम उद्भवति तदा ज्ञानावरणप्रमादादि स्वकार्यं
मारभते १०

रणवीरसमिद्धायिनी ॥

रजस्तमश्चेति गुणद्वयमभिभूय तिरस्कृत्य सत्त्वं भवत्युद्भव
ति वर्धते यदा तदा प्राणुक्तं सुखज्ञानसज्जनं करोतीत्यर्थः
एवं रजोपि सत्त्वं तमश्चेति गुणद्वयं तिरस्कृत्योद्भवति यदा
तदा स्वकार्यं दुःखसंगं करोति तथा तमोपि सत्त्वरजसी ति
रस्कृत्योद्भवति यदा तदा स्वकार्यं प्रमादादिसज्जनं करोतीत्य
र्थः १० ॥

मधुभाष्य

१० ॥

भाषा अनुवाद

अब सत्वादि तीनो गुणों के प्रकट होने की रीति कहते हैं कि रजो गुण तमो गुण को तिरस्कार करे परामव करि के सतो गुण प्रगट होय है अर्थात् जीव के अदृष्टवशते सत्व जन्मै है और अपने कार्य सुख आदि मे जीव को युक्त करै है ऐसे ही सत्व औ तमो गुण का महात्मों के संग से उत्पन्न ज्ञान को अनादर करि के प्रमादवशात नाश देत है अर्थात् महात्मों के उत्तम उपदेश को नहीं परामव करि रजो गुण जन्मै है और अपने कार्य तृष्णा आदि मे युक्त करता है तैसे ही सत्व रज को परामव करिके तमो गुण प्रगट होय है और अपने कार्य प्रमाद आलस्य मे युक्त करि देता है। ९।

दोहा

रज तम करके हरहिं भारत सत्वहुं दोय सत्व तम को दि
रजो गुण त्यों सत्व रज को तम सोय १०॥

43

सर्वद्वारेषुदेहेस्मिन् प्रकाशउपजायते ज्ञानं
यदातदाविद्याद्विवृद्धंसत्त्वमित्युत ११ ॥

शांकरभाष्यटीका १

यदा यो गुणः समुद्भूतोभवति तदा तस्य किं लिंगं उच्यते सर्वद्वा
रेषु इति सर्वद्वारेष्वात्मनउपलब्धिद्वाराणि श्रोत्रादीनि सर्वाणि
करणानि तेषु द्वारेषु अन्तःकरणस्य बुद्धेर्वृत्तिः प्रकाशोदेहेस्मिन्
प्रकाशशब्दवाच्यः सर्वद्वारेषु उपजायते तदेव ज्ञानं यदेवं प्र
काशोज्ञानाख्यउपजायते तदा ज्ञानप्रकाशेन लिंगेन विद्याद्विवृ
द्धं उद्भूतं सत्वमित्युतापि । ११ ॥

आनंदगिरिकृतटीका २ ॥

उक्तश्लोकत्रयस्याकांक्षां दर्शयति यदेति । सत्वोद्भवलिंगदर्श
नार्थमनन्तरं श्लोकमवतारयति उच्यतइति सर्वद्वारेष्वित्यादि
सप्तमी निमित्ते नेतव्या उत शब्दः पिशब्दपर्यायोप्यतिशयार्थः
११

स्वामिकृतटीका ३

इदानीं सत्वादीनां वृद्धानां लिंगान्याह त्रिभिः सर्वद्वारेष्विति अस्मि
न्नात्मनोभोगायतनेदेहेसर्वेष्वपिद्वारेषुश्रोत्रादिषुयदाशब्दादिज्ञा
नात्मकः प्रकाशउत्पद्यते तदानेनप्रकाशलिंगेनसत्वंविवृद्धंवि
द्यात्जानीयात् उतशब्दात्सुखादिलिंगेनापिजानीयादित्युक्तंभ
वति ११ ॥

पिशाचभाष्यटीका ४

सर्वद्वारेषुसर्वेंद्रियेषुप्रकाशोज्ञानंप्रकाशशब्दवाच्यं ११

^तच्चकार्योपलब्ध्यैवावगच्छेदित्याह॥

रामानुजभाष्यटीका ५

^सर्वेति सर्वेषुचक्षुरादिषुज्ञानद्वारेषुयदावस्तुयाथात्म्यप्रकाश
ज्ञानमुपजायतेतदास्मिन्देहेसत्वंप्रवृद्धमितिविद्यात् ११
ना^

अभिनवगुप्तकृतटीका ६

स्पष्टार्थ ११

परमार्थप्रपा टीका ७ ॥

श्री॰ गी॰ टी॰ चं॰

४४

अथ सत्वादीनामुपलब्धिप्रकारमाह सर्वद्वारेष्विति अस्मिन्नात्मनो भो
गायतने शरीरे सर्वद्वारेषु श्रोत्रादिषु शब्दादिप्रकाशे सति यदा ज्ञानं स्वस
मरणं उत्पद्यते तदा सत्वं विवृद्धं वृद्धिं प्राप्तमिति विद्यात् ११ ॥

वनमालीटीका ८

उद्भूतानां तेषां लिंगान्याह त्रिभिः अस्मिन्नात्मनो भोगायतने देहे स
र्वेष्वपि द्वारेषु ज्ञानसाधनेषु श्रोत्रादिषु यदा प्रकाशः शब्दादिज्ञान जन
नात्मकः नैर्मल्यरूपः प्रसादो वा जायते तदा तेन शब्दादिज्ञानाख्य
प्रकाशेन लिंगेन प्रकाशात्मकं सत्वं विवृद्धं समुद्भूतमिति विद्या
त् उत अभिमत्वादिलिंगेनापि जानीयादित्यर्थः ११

जसमवैजयंतीटीका ९

उत्कृष्टास्तु कैर्लिंगैर्ज्ञायंते इत्यपेक्षायामाह त्रिभिः सर्वद्वारेष्विति
यदा यस्मिन्देहे सर्वेषु ज्ञानद्वारेषु श्रोत्रादिज्ञानेंद्रियेषु शब्दादिवस्तुया
थात्म्यप्रकाशरूपं ज्ञानमुपजायते उत्पद्यते अपि शब्दार्थे तेन सुखमप्यु उ
पजायते इति ध्यातिनम् तदास्मिन्देहे तादृशज्ञानलिंगेन सत्वंवि
वृद्धं विद्यादेवं जानीयात् ११ ॥

इदानीमुद्भूतानां तेषां लिंगान्याह त्रिभिः ॥

मधुसूदनीटीका १०

अस्मिन्नात्मनो भोगायतने देहे सर्वेष्वपि द्वारेषु उपलब्धिसाधनेषु
श्रोत्रादिकरणेषु यदा प्रकाशः बुद्धिपरिणामविशेषो विषयाका
रः स्वविषयावरणविरोधी दीपवत् तदेव ज्ञानं शब्दादिविषयमु
पजायते तदा तेन शब्दादिविषयज्ञानाख्यप्रकाशेन लिंगेन प्रका
शात्मकं सत्वं विवृद्धमुद्भूतमिति विद्यात् जानीयात् उत अपि सुखादि
लिंगेनापि जानीयादित्यर्थः ११ ॥

सदानंदीटीका ११

लिंगान्याह महद्भूतानां गुणानां त्रिभिरीश्वरः अस्मिन्भोगालये दे
हे श्रोत्रादिकरणेष्वपि १ यदा प्रकाशो धीवृत्तिविशेषो वस्तुगो
चरः स्वगोचरावृत्तेर्यस्तु विरोधी दीपवदेव तत् ज्ञानं तदेव शब्दादि
विषयं चोपजायते तदा ज्ञानप्रकाशेन लिंगेन तत्प्रकाशकं उद्भू

तेसत्वमित्येवं विद्यात्तदुत्सुखादिना ॥ ॥

नीलकंठीटीका १२ ॥

तत्तद्गुणोद्भवलिंगान्याह त्रिभिः सर्वेति अस्मिन्देहे यदा सर्वेषु द्वा
रेषु बाह्याभ्यंतरविषयोपलब्धिसाधनेषु बाह्याभ्यंतरकरणेषु
प्रकाशः स्वस्वविषयावरणविरोधी परिणामविशेषो जायते ते
न च ज्ञानं शब्दादिविषयस्य याथात्म्येन प्रकाशो यदा जायते तदा
सत्वं विवृद्धमिति विद्याज्जानीयात् उत अपि सुखादिलिंगेना
पि जानीयादित्यर्थः ॥

आनंदीटीका १३

एतेषां वृद्धिलक्षणमाह॥ सर्वेषु द्वारेषु इंद्रियेषु प्रकाशः स्फुटो निस्संदेहो व्यवसाय
एव ज्ञानं शब्दादिसंवेदनम् ॥

रामकंटीका १४

अस्मिंशरीरे यदा यस्मिन्काले सर्वद्वारेषु श्रोत्रादिषु प्रकाशः
स्फुटमसंदिग्धं कृत्वा ज्ञानं शब्दादिविषयसंवेदनमुत्पद्यते
तदा सत्वगुणमभिभूतरजस्तमस्कत्वाद्विवृद्धमुपचितमिति
जानीयात् तथा रजसि प्रवृद्धे अभिभूतसत्वतमस्कत्वादुपचि
ते सति एतानि लिंगान्युत्पद्यंते ॥ ॥

लाक्षिकी [illegible]टीका १५

+अतःसत्वादीन्दृष्टत्वतया कार्यलिंगेनानुमापयति॥

+अस्मिन्देहे यस्मिन्क्षणे सर्वेषु श्रोत्रादिषु द्वारेषु विषयसं
वेदनरूपो ज्ञानात्मकः प्रकाशो जायते तदा सत्वगुणो रजस्त
मसी अभिभूय उपचित इति जानीयात् ततः शब्दात्सुखा
दिलिंगेनापि ॥ ॥ ॥ ॥

पंचोलीटीका

इदानीं सत्वादीनां प्रवृद्धानां लिंगान्युपदिशन् तत्र प्रथमं सत्व प्रवृद्धस्य लिंगमाह सर्वद्वारेष्विति यदा अस्मिन्देहे सर्वद्वारेषु श्रोत्रादिषु बुद्धेर्व्यापारः प्रकाशरूपो ज्ञानाख्यः उपजायते तदा तेन ज्ञानेन प्रकाशलिंगेन सत्वं प्रवृद्धमित्यपि विद्यात् ॥

इतावीरमसिद्धोधिनी॥

अधुना सत्वादीनां प्रवृद्धानां लिंगान्याह सर्वद्वारेष्विति अस्मिन्नात्मनो भोगायतने देहे सर्वेषु द्वारेषु ज्ञानोपलब्धिसाधनेषु श्रोत्रादिषु करणेषु यदा प्रकाशो बुद्धिपरिणामविशेषो विषयाकारस्तदेव ज्ञानं घटाद्याकारात्मकमुपजायते उत्पद्यते तदा तेन प्रकाशलिंगेन प्रकाशात्मकं सत्वं विवृद्धं जानीयादित्यर्थः ॥ ॥

मधुभाष्य

११॥

भाषा अनुवाद

अब विशेष से बढे हुये सत्त्व आदि तीनों गुण के लक्षण कहे चिन्ह तीन श्लोक से कहते है कि इस भोगायतन कहे भोग भाए शरीर मे श्रोत्र आदि समस्त द्वार मे जिस समय शब्द आदि ज्ञानस्वरूप उत्पन्न होता है उस समय प्रकाश रूप चिन्ह के द्वारा सतो गुण को विशेष बढा जानो औ सुख आदि चिन्ह से भी सत्त्व की वृद्धि जानो तात्पर्य्य यह कि इंद्रियों के द्वारा जो ज्ञान होता सो सतोगुणहीं से होय है। ११।

दोहा

सर्वद्वार यह देह में जब प्रकाश दिसोय ज्ञान तबेहि जानिय सत्त्वगुणवृद्धि सोय ११॥

46

लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा
रजस्येतानि जायंते विवृद्धे भरतर्षभ १२ ॥

शांकरभाष्यटीका १

रजसउद्भूतस्येदं चिन्हं लोभइति लोभ परद्रव्यादित्सा प्रवृत्तिः
प्रवर्तनं सामान्यचेष्टा आरंभः उद्यमः कस्य कर्मणामशमः अ
नुपशमः हर्षरागादिप्रवृत्तिः स्पृहा सर्वसामान्यवस्तुविषया तृ
ष्णा रजसि गुणे विवृद्धे एतानि लिंगानि जायंते हे भरतर्षभ १२

आनंदगिरिकृतटीका २

अतिशयेनोद्भूतस्य रजसो लिंगमाह रजसइति । उपक्रमपर्याय
स्यारंभस्य विषयं पृच्छति कस्येति काम्यानि निषिद्धानि च लौकि
कानि कर्माणि विषयत्वेन निर्दिशति कर्मणामिति अनुपशमो
बाह्यान्तःकरणानामिति शेषः । लोभाद्युपलंभाद्रजोवृद्धिर्बोद्ध
व्येति भावः १२ ॥

स्वामिकृतटीका ३

किंच लोभइति लोभो धनागमे बहुधा जायमानेपि पुनः पुनर्वर्धमा
नोभिलाषः प्रवृत्तिर्नित्यं कुर्वद्रूपता कर्मणामारंभो गृहादिषु कर्मो
द्यमः इदं कृत्वेदं करिष्यामीत्यादि संकल्पविकल्पानुपरमः अश
मः स्पृहा उच्चावचेषु दृष्टमात्रेषु वस्तुष्वितस्ततो जिघृक्षा रजसि
प्रवृद्धे एतानि लिंगानि जायंते एतैर्लिंगै रजोगुणस्य वृद्धिं विद्या
दित्यर्थः १२ ॥

पिशाचभाष्यटीका ४

लोभइति शास्त्रेणाप्राप्तत्यागानामत्यागः तथा शास्त्रेण निषिद्ध परिग्रहणं
परिग्रहश्च प्रवृत्तिः प्रकर्षेण वर्जनं चेष्टास्वभावत आरंभः कर्म
णां लौकिकवैदिकानामशमः क्रोधहर्षादि साम्यस्पृहा इच्छा १२

रामानुजभाष्यटीका ५

लोभइति लोभः स्वकीयद्रव्यात्यागशीलता प्रवृत्तिः प्रयोजनमनु

दिशणापिचलस्वभावताआरंभः कर्मणांफलसाधनभूतानांकर्मणां
मारंभः उद्योगः अशमः इंद्रियानुपरतिः स्पृहाविषयेच्छा एतानिरज
सिप्रवृद्धेजायंते यदालोभादयोवर्तंतेतदारजः प्रवृद्धमितिविद्यादि
त्यर्थः १२ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १२ ॥

परमार्थप्रपाटीका ७

अथरजोवृद्धेरुपलब्धिमाह लोभइति बहुधाधनागमेजायमाने
पि [illegible]नः पुनर्वर्द्धमानोभिलाषोलोभः प्रवृत्तिस्तुनित्यंक्रियमा
णेच्छाकर्मणामारंभश्च अशमः इदंकृत्वेदमिदंकरिष्यामीतिसंक
विकल्पानामनुपरमः एते स्पृहाउच्चावचेषुवस्तुषुजिघृक्षास्पृहाएता
निलिंगानि रजसिप्रवृद्धेसतिभवंति १२ ॥

वनमालीटीका ८

महतिधनागमेजायमानेप्यनुक्षणंवर्द्धमानस्तदभिलाषोलोभः स्व
विषयप्राप्तिनिवर्त्यस्पृहाविशेषइतियावत् प्रवृत्तिर्निरंतरंयतमा
नताआरंभः कर्मणांबहुविधव्यापारात्मकानांकाम्यनिषिद्धलौ
किकमहागृहादिविषयाणांव्यापाराणामशमः अशमः इदंकृ
त्वेदंकरिष्यामीतिसंकल्पप्रवाहानुपरमः स्पृहाउच्चावचेषुपरध
नेषुदृष्टमात्रेषुयेनकेनाप्युपायेनादित्सारजसिरागात्मकेविवृद्धे
एतानिरागात्मकानिलिंगानिजायंते एतैर्विवृद्धंरजोजानीयादित्य
र्थः १२

ज्ञसमवैजयंतीटीका ९

किंच लोभइतिलोभः स्वद्रव्यात्यागस्वभावतापरद्रव्यादानोपा
यस्वभावताचप्रवृत्तिस्तुहृदियत्नपरताकर्मणांप्रारंभः फल
साधनभूतानांगृहनिर्माणादीनांकर्मणामुद्योगः अशमोविष
यभोगादिंद्रियाणामनुपरतिः स्पृहाविषयभोगेच्छाहेभरतसिप्र २जा
वृद्धेसमेतानिलोभादीनिजायंतेअयंघेनेयदापुरुषस्यमनसिलोभादय

उत्पद्यंते तदा तैर्लिंगैः रजो वृद्धमिति जानीहीत्यभिप्रायः १२ ॥

मधुसूदनीटीका ९

महति धनागमे जायमानेप्यनुक्षणं वर्धमानस्तदभिलाषो लोभः स्वविषयप्राप्त्यापि निवर्तयितुमशक्य इच्छाविशेष इति यावत् प्रवृत्तिर्निरंतरं प्रयतमानता आरंभः कर्मणां बहुवित्तव्ययायासकराणां काम्यनिषिद्धलौकिकमहागृहादिविषयाणां व्यापाराणामुद्यमः अशमः इदं कृत्वा इदं करिष्यामीति संकल्पप्रवाहानुपरमः स्पृहा उच्चावचेषु परधनेषु दृष्टमात्रेषु येनकेनाप्युपायेनोपादित्सा रजसि रागात्मके विवृद्धे एतानि रागात्मकानि लिंगानि जायंते हे भरतर्षभ एतैर्लिंगैर्विवृद्धं रजो जानीयादित्यर्थः १२ ॥

सदानंदीटीका ११

अनुक्षणं वर्द्धमानोभिलाषो लोभ उच्यते अतीव धनलाभेपि यो न शाम्यति कर्हिचित् । नित्यं प्रयतमानत्वं प्रवृत्ती राजसी कला गृहादिविषयाणां च व्यापाराणां य उद्यमः बहुकायासकराणां स्यादारंभः काम्यकर्मणां इदं कृत्वा करिष्यामीदमित्येवाशमः स्मृतः उच्चावचेषु वित्तेषु परस्यापीक्षितेषु च येनकेनाप्युपायेनोपादित्सा प्रोच्यते स्पृहा ४ रागात्मकानि लिंगानि प्रवृद्धे च रजोगुणे उक्तान्येतानि जायंते विद्याल्लिंगै रजो महत् १२ ॥

नीलकंठीटीका १२ ॥

लोभः प्राप्ताधिके गर्धः प्रवृत्तिः अग्निहोत्रादौ आरंभो गृहादेः कर्मणां अशमः सतामसतां वा कार्याणामनुपरमः स्पृहा दृष्टे परधनादावुपादित्सा रजसि विवृद्धे सति एतानि लिंगानि जायंते हे भरतर्षभ १२ ॥

आनंदीटीका १३

इदं लब्धं इदमिदानीं लप्स्यामीत्यभिलाषातिशयो लोभः १२ ॥

रामकंठीटीका १४

श्री· तद्यथा लोभ इष्टविषये प्राप्तेपि नैव निवृत्तिः तदाहरणार्थं प्रवृत्ति
गी·टी· रुन्मुखीभावः ततस्तदनंतरमारंभः क्रियातदाहरणव्यापार इत्य
चौ· र्थः तथाप्राप्तेपि कस्मिंश्चिद्विषये विषयांतरविषयाणां क्रियाणामप्रश
मः शांतभावस्तथा स्पृहा तत्तदभिलाषो राग इत्यर्थः तथा तमसि वि
48 वृद्धे सत्वरजोभिभवाल्लब्धबले सत्येतानि लिंगानि जायंते १२

लालिकी [illegible]टीका १५

किंच— रजसि प्रवृद्धे सति लोभ इष्टेर्थे प्राप्त्यर्थं मनसश्चांचल्यं प्रवृत्तिस्तदा
हरणायौन्मुख्यम् तदर्थमेव कर्मणामारंभश्च अप्रशमः इष्टेर्थे
सिद्धेसिद्धे वा कर्मतो वा निवृत्त्यभावः स्पृहा तदेकमनस्कता ए
तानि जायंते एतैर्लिंगै रजोगुणवृद्धिं जानीयात् १२

पंचोलीटीका

रजसः प्रवृद्धलिंगमाह लोभ इति हे भरतर्षभ रजसि प्रवृद्धे ए·
तानि लिंगानि जायंते लोभः परद्रव्यादीनामिच्छा बुद्धिपूर्विका चेष्टा
प्रवृत्तिः आरंभः कर्मविशेषाणामुपक्रमः अशमः हर्षरागादिप्रवृ
त्तिः सर्वसामान्यवस्तुविषया तस्यास्पृहा १२

रणवीरसमिद्बोधिनी ॥

लोभ इति लोभोयत्नागमे सद्दति जायमानेप्यनिवृत्ताभिलाष
ता प्रवृत्तिर्निरंतरं प्रयतमानता आरंभो महीगृहादिविषयाणां धन
व्ययायासकराणां कर्मणामुपक्रमो प्रशमः इदं कृत्वेदं कार्यमिति संक
ल्पविकल्पानुपरमः स्पृहा सर्वेषु दृष्टमात्रेषु वस्तुषु येन केना
प्युपायेनोत्पादित्सा रजसि विवृद्धे एतानि रागात्मकानि लिंगानि
जायंते एतैर्लिंगैर्विवृद्धं रजो जानीयादित्यर्थः १२॥

मधुभाष्य

१२॥

भाषा अनुवाद

और हे भरतर्षभ अर्जुन लोभ कहे बहुत धन रहते और पैदा होते भी धन की बार बार वृद्धि करने की लाष लाष अभिलाष और प्रवृत्ति कहे सदा ही व्यापार मे मन दिये रहना और आरम्भ अर्थात् कर्मों का आरम्भ घर बगीचा आभूषणादि बनाने मे उद्यम और अशम कहे मै यह कर्म करि के फेरि वह कर्म करूंगा यह जो संकल्प से मन का असन्तोष और स्पृहा कहे उत्तम अधम वस्तु देखने ही से जिस तरह होय जिस तरह लेने की इच्छा ये सब चिन्ह रजो गुण के बढ़ने से होते हैं अर्थात् इन लक्षणों से रजो गुण की वृद्धि जानो हे अर्जुन यह कृष्णने कहा १२॥

दोहा

लोभ प्रवृत्ति आरंभ हि कर्म हि उद्यम वाद पते रजसें होत है भारत बढ़ हि जाद १२॥

49

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च त
मस्येतानि जायंते विवृद्धे कुरुनंदन १३

शांकरभाष्यटीका १

अप्रकाश इति अप्रकाशोऽविवेकोऽत्यंतमप्रवृत्तिश्च प्रवृत्त्य
भावः तत्कार्यं प्रमादो मोह एव च अविवेको मूढतेत्यर्थः तम
सि गुणे विवृद्धे एतानि लिंगानि जायंते हे कुरुनंदन १३

आनंदगिरिकृतटीका २

उद्भूतस्य तमसो लिंगमाह अप्रकाश इति सर्वथैव ज्ञानक
र्मणोरभावो विशेषणाभ्यामुक्तस्तत्कार्यमिति तत्कार्यं हार्दस्मि
न्नविवेकार्थः प्रमादो व्याख्यातः मोहो वेदितव्यस्यान्यथावे
दनं तस्यैव मोहशब्दार्थान्तरमाह अविवेक इति अविवेकादित्या
यादिना प्रवृद्धं तमो ज्ञेयमिति भावः १३ ।

स्वामिकृतटीका ३ ।

किंचाप्रकाश इति अप्रकाशो विवेकभ्रंशः अप्रवृत्तिरनुद्यमः
प्रमादः कर्तव्यार्थानुसंधानराहित्यं मोहो मिथ्याभिनिवेशः
तमसि प्रवृद्धे एतानि चिह्नानि जायंते एतैः तमसो वृद्धिं जानी
यात् १३ ॥

पिशाचभाष्यटीका ४

अप्रकाशः अज्ञानं अप्रवृत्तिरालस्यं प्रमादः प्राप्तमप्रतिपत्तिः
मोहः अविवेकः १३ ॥

रामानुजभाष्यटीका ५

अप्रकाश इति अप्रकाशः ज्ञानानुदयः अप्रवृत्तिः स्तब्धता
प्रमादः अकार्यवृत्तिफलमनवधानं मोहो विपरीतज्ञानं ए
तानि तमसि प्रवृद्धे जायंते एतैस्तमः प्रवृद्धमिति विद्यात् १३

अभिनवगुप्तकृतटीका ६

सर्वद्वारेषु सर्वेंद्रियेषु लोभादिकाः क्रमेणैव रजस्युद्रिक्तमा
नेजायंते एवम् अप्रकाशादयः क्रमेणैव तमोविवृद्धावाविर्भवं
ति १३

परमार्थप्रपाटीका ७

अथ तमोलिंगमाह अप्रकाश इति अप्रकाशोऽविवेकभ्रा: भ्रं^
अप्रवृत्तिरनुद्यमः प्रमादः कर्तव्यार्थानुसंधानराहित्यं मोहो मिथ्या
भिनिवेशः तमसि विवृद्धे एतानि लिंगानि जायंते १३ ॥

वनमालीटीका ८

अप्रकाशः सत्यप्युपदेशादौ बोधकारणे सर्वबोधायोग्यत्वं अ
प्रवृत्तिश्च सत्यपि गृहादौ जनकृत्यादित्वादौ प्रवृत्तिहेतौ जनितबोधे
पि शास्त्रे सर्वथा तत्प्रवृत्त्ययोग्यत्वं प्रमादस्तत्कालकर्तव्यत्वेन प्रा
प्तस्यार्थस्यानुसंधानाभावः मोहश्चैव च मोहो निद्राविपर्ययो वा तम
स्येव विवृद्धे एतानि जायंते अत एतैर्लिंगैर्विवृद्धं तमो जानीयादित्य
र्थः १३ ॥

असमवैजयंतीटीका ९ ॥

किंच अप्रकाश इति अप्रकाशः ज्ञानोपदेशे सत्यपि सर्वथाज्ञाना
भावः च पुनः अप्रवृत्तिः शास्त्रविहितकर्मविमुखता प्रमादो
हस्तादिस्थितेप्यर्थे नास्तीति प्रत्ययः मोहो विपरीतज्ञानात्मिथ्या
भिनिवेशः एवकारोऽव्यभिचारवारणार्थकः चकारः समुच्च
यार्थकः हे कुरुनंदन तमसि विवृद्धे सत्येतान्यप्रकाशादीनि लिं
गानि जायंते अव्यभिचारिभिरेतैर्लिंगैस्तमो विवृद्धं त्वं जानीहि
कुरुनंदनेति संबोधनेन केषांचिदपि दुर्योधनादीनां कौरवाणां
संतानो राज्याद्धीनो भविष्यति किंतु नैवातस्तमस्त्वं पराजय
भविरोधिपि विज्ञाय तत्यजेति सूचितम् १३ ॥

मधुसूदनीटीका १०

अप्रकाशः सत्यप्युपदेशादौ बोधकारणे सर्वथा बोधायोग्यत्वं

अप्रवृत्तिश्चसत्यपिहेतौस्वकृष्यादित्यादौप्रवृत्तिकारणेजनित
वोधेपिशास्त्रेसर्वथातत्प्रवृत्त्ययोग्यत्वं प्रमादस्तत्कालकर्तव्य
त्वेनप्राप्तस्यार्थस्यानुसंधानाभावः मोहएवच मोहोनिद्रा
विपर्ययोवा शोत्तसमुच्चये एवकारोव्यभिचारवारणार्थः त
मस्येवविवृद्धेएतानिलिंगानिजायंते हेकुरुनंदन अतएतै
र्लिंगैरव्यभिचारिभिर्विवृद्धंतमोजानीयादित्यर्थः १३ ॥

सदानंदीटीका ११

अप्रकाशोत्वयोग्यत्वंवोधेसत्यपिवोधके सतिशास्त्रेतथावो
धेप्रवृत्तेःकारणेपिच १ प्रवृत्त्ययोग्यताधर्मेप्रवृत्तिस्तामसी
कला कर्तव्यत्वेनप्राप्तस्याननुसंधानमेवच २ प्रमादश्चेरि
तोमोहोनिद्रावास्याद्विपर्ययः वृद्धेतमसिजायंतेलिंगान्येता
निसर्वथा एतैर्लिंगैस्तमोवृद्धंविद्याद्व्यभिचारिभिः १३ ॥

नीलकंठीटीका १२

सत्यपिवोधकेगुर्वादौअप्रकाशः सत्वकार्यप्रकाशानुदयः अ
प्रवृत्तिः सत्यपिप्रवृत्तिनिमित्तेरजःकार्यप्रवृत्त्यनुदयः प्रमादः
कार्याकार्यविवेकराहित्यंमोहोनिद्रालस्यादिरूपः १३ ॥

आनंदीटीका १३

सत्यपिवस्तुप्रकाशकेशास्त्रादौतदनालोचनमप्रकाशःमो
होविपरीतज्ञानम् [illegible]

रामकंठीटीका १४

तद्यथा प्रकाशः सत्वगुणाभिभवात्प्रकाशाभावोविषयाःसं
वेदनं तथारजोगुणाभिभवादप्रवृत्तिः क्रियाभावस्तत्रचस्वयं
विवृद्धत्वात्प्रमादमोहावकलतौ [illegible]
[illegible]
[illegible] १३ ॥

किंच

सत्वाभिभवादप्रकाशो विषयानवभासः रजोभिभवाद
प्रवृत्तिः कर्माभावः स्त्वोद्रेकात्प्रमादः कर्तव्यार्थानुसंधा
नराहित्यम् मोहे विवेकभ्रंशः तमसि विवृद्धे एतानि लिंगा
नि जायंते एतैस्तमसो वृद्धिं जानीयात् [illegible]
[illegible] ॥ ॥

पंचोलीटीका

तमसः प्रवृद्धस्य लिंगमाह अप्रकाश इति हे कुरुनंदन त
मसि प्रवृद्धे सति एतानि लिंगानि जायंते अप्रकाशोऽविवेकः
प्रज्ञायाः प्रत्यतिक्रमः अत्यंतमप्रवृत्तिः स्खलनादौ प्रमादः प्रवृ
त्त्यभावः मोहो मूढता अकर्तव्ये कर्तव्यता १३

रामावीरसमिद्बोधिनी ॥

अप्रकाश इति अप्रकाशोऽविवेको प्रवृत्तिः प्रवृत्त्यभावः प्रमादः
कर्तव्यार्थानुसंधानराहित्यं मोहो मूढता तमसि प्रवृद्धे एता
नि लिंगानि जायंते एतैर्लिंगैस्तमो विवृद्धं जानीयादित्यर्थः
१३॥

मधुभाष्य

१३॥

भाषा अनुवाद

और अप्रकाश कहे विचार का नाश और अप्रवृत्ति कहे निरुद्यम और प्रमाद कहे हर काम हर बात मे बेखबर और मोह कहे मिथ्या अभिनिवेश अर्थात् कुवितर्ई या झूटे कारखाने मे मन देना ये सब चिह्न तमोगुण से होते हैं औ इनि लक्षणों से तमोगुण की वृद्धि जानो ।१३।

दोहा

प्रवृति मोह प्रमाद तम अप्रकाश यह जोय एते तमोगुण
वृद्धि मे होय कुरुनंदन सोय ॥१३॥

52

यदा सत्वे प्रवृद्धे तु प्रलयं याति देहभृत् तदो
त्तमविदां लोकानमलान्प्रतिपद्यते १४ ॥

शांकरभाष्यटीका १

मरणद्वारेणापि यत्फलं प्राप्यते तदपि संगरागहेतुकं सर्वं गौ
णमेवेति दर्शयन्नाह यदेति । यदा सत्वे प्रवृद्धे उद्भूते तु प्रलयं
मरणं याति प्रतिपद्यते देहभृदात्मा तदा उत्तमविदाम् महदा
दितत्वविदामित्येतल्लोकानमलान्मलरहितान्प्रतिपद्यते प्रा
प्नोतीत्येतत् १४ ॥

आनंदगिरिकृतटीका २

सात्विकादीनां भावानां पारलौकिकं फलविभागमुदाहरति म
रणेति संगः सक्तिरागः तस्य तद्बलादनुष्ठानद्वारा लभ्यमा
नमित्यर्थः गौणं सत्वादिगुणप्रयुक्तमिति यावत् । तत्र सत्व
गुणवृद्धिकृतफलविशेषमाह यदेति मलरहितान् रजस्तम
सोरन्यतरस्मादुद्भवो मलं तेन रहितानागमसिद्धान् ब्रह्मलोका
दीनित्यर्थः १४ ॥

स्वामिकृतटीका ३

मरणसमयप्रवृद्धानां सत्वादीनां फलविशेषमाह यदेति द्वाभ्यां
सत्वे प्रवृद्धे सति यदा जीवो मृत्युं प्राप्नोति उत्तमान् हिरण्यगर्भादीन् तदा
विदंति उपासत इत्युत्तमविदः तेषां ये अमलाः प्रकाशमया लोकाः
सुखोपभोगस्थानविशेषाः तान्प्रतिपद्यते प्राप्नोति १४ ॥

पिशाचभाष्यटीका ४

यदेति प्रलयं मरणं उत्तमविदां महदादितत्वस्वरूपविदां १४ ॥

रामानुजभाष्यटीका ५

यदेति यदा सत्वं प्रवृद्धं तदा सत्वे प्रवृद्धे देहभृत् प्रलयं मरणं याति
चेत् उत्तमविदां तत्वयाथात्म्यविदां लोकान् समूहान् अमलान्
मलरहितान् अज्ञानरहितान् प्रतिपद्यते प्राप्नोति सत्वे प्रवृद्धे तु मृत

श्री॰ गी॰ टी॰ चं॰

53

आत्मविदां फलेजनित्वात्मयाथात्म्यज्ञानसाधनेषु पुण्यकर्मसु स्वधि
करोतीत्युक्तं भवति १४ ॥

अभिनवगुप्तकृतटीका ६

अग्निमउक्तार्थम्
स्पष्टार्थं १४ ॥

परमार्थप्रपाटीका ७

अथ मरणसमयविहृतानां सत्वादीनां फलविशेषमाह यदेति ॥
सत्वे प्रवृद्धे सति यदा जीवः प्रलयं मृत्युं प्राप्नोति तदा उत्तमविदां उत्त
मं महत्प्राणं हिरण्यगर्भं विदंति उपासते ते उत्तमविदस्तेषां लोकान्
सिद्धाविर्भावसत्वानि प्राप्नुयात् १४ ॥

वनमालीटीका ८

मरणसमये विहृतानां सत्वादीनां फलमाह द्वाभ्यां सत्वे प्रवृद्धे स
ति प्रलयं मृत्युं याति प्राप्नोति देहभृत् देहाभिमानी जीवः उत्तमा
हरिस्तद्विदां हिरण्यगर्भादीनां लोकान् तत्स्वामिकान् अमलान् रजस्त
मोमलरहितान् प्रतिपद्यते प्राप्नोति १४ ॥

कृष्णवैजयंतीटीका ९

इदानीं मरणसमये वि[illegible]हृतानां तेषां सत्वादीनां फलविशेषमा
ह यदेति द्वाभ्यां यदेति सत्वे प्रवृद्धे सति यदा देहभृद्देहाभिमानी
जीवः प्रलयं मृत्युं याति प्राप्नोति तदोत्तमविदां उत्तमा ये हिरण्यगर्भा
दयस्तान् विदंतीत्युत्तमविदस्तेषाममलान् रजस्तमोरूपमलरहि
तान् दिव्यभोगोपतानस्थानविशेषान् प्रतिपद्यते प्राप्नोति १४ ॥

मधुसूदनीटीका १०

इदानीं मरणसमये विहृतानां सत्वादीनां फलविशेषमाह द्वाभ्यां

सत्वे प्रवृद्धे सति यदा प्रलयं मृत्युं याति प्राप्नोति देहभृत् देहाभिमानी
जीवः तदा उत्तमा ये हिरण्यगर्भादयः तद्विदां तदुपासकानां लो
कान् देवसुखोपभोगस्थानविशेषान् अमलान् रजस्तमोमलर
हितान् प्रतिपद्यते प्राप्नोति १४ ॥

सदानंदीटीका ११

सत्वादीनां प्रवृद्धानां मरणकालेधुनाफलं आह द्वाभ्यां विशेषे णभगवान्परमागतिः १ वृद्धेसत्वगुणेजीवो मरणंप्राप्नोतिचेत्त दा हिरण्यगर्भमुख्यायेउपास्यास्तेषां नचोत्तमाः २ तदुपासकप्र लोकान्दिव्यभोगोपबृंहितान् रजस्तमोमलैर्हीनान्प्राप्नोति तदांजसा १४ ॥

नीलकंठीटीका १२

प्रलयंमरणं उत्तमविदांहिरण्यगर्भाद्युपासकानांदेवानांवा लोकान् अमलान्निर्दुःखान् १४ ॥

विवृद्धानामेषांमरणसमयेफलमाह ॥ आनंदीटीका १३

उत्तमविदामुत्तमज्ञानिनांलोकान्सत्यलोकादीन् १४ ॥

रामकंठीटीका १४ +अथैषांवृद्धौसत्यांप्राणप्रयाणेसतिविशिष्ट लोकांतरप्राप्तिनिर्देशेनबंधहेतुत्वमेवप्र तिपादयितुमाह ॥

+यदायस्मिन्कालेसत्वगुणेविवृद्धेबलवतिसतिदेहभृज्जीवःप्र लयंयातिविनाशव्यपदेशंभजते तदोत्तमविदां प्रकृष्टज्ञानि नांदेवादीनांसंबंधिनोलोकान्भुवनानिसत्वगुणमयत्वाद मलान्विशुद्धान्प्राप्नोतितत्रजातव्यपदेशंलभते १४

+अधुनासत्वादीनामनुशील्यमाना नांलोकांतरप्राप्तिरूपंफलमाह ॥ लालिकी ...टीका १५

+यदासमग्रेणैवजन्मनानवरतसात्विकव्यापाराभ्यासात्सत्वे प्रवृद्धेसतिशरीरीमरणंयाति तदाउत्तमविदांप्रकृष्टज्ञानि नांदेवादीनांलोकान्भुवनानि अमलांस्तमसोभावानु स्वप्रकाशमयान् उत्तरोत्तरशानगुणानंदान् सत्वोद्रेकता रतम्यानुसारेणप्राप्नोति तत्रजन्मलभते ॥ १४ ॥

पंचोलीटीका

मरणद्वारेणाद्वारेणापिसत्वादीनांप्रवृद्धानांफलविशेष

माह यदासत्त्वइतिद्वाभ्यांतुपुनःदेहभृत् आत्मासत्त्वेप्रवृ-
द्धेयदाप्रलयंमरणंप्रयाति तदाउत्तमविदांहिरण्यगर्भादी-
नाममलांल्लोकान्प्रतिपद्यतेप्राप्नोति १४

रणावीरसमिद्धोधिनी

प्रयाणकालेविहितानांसत्त्वादीनांफलविशेषमाह यदेति
सत्त्वगुणेप्रवृद्धेसतिदेहभृज्जीवोयदाप्रलयं मरणंप्राप्नोति
तदोत्तमान्हिरण्यगर्भादीन्विदंत्युपासतेत्युत्तमविदस्तेषां
येमलामलरहिताः प्रकाशमयालोकाःसुखोपभोगस्था
नविशेषास्तान्प्रतिपद्यतेप्राप्नोतीत्यर्थः १४॥

मधुभाष्य

१४॥

भाषा अनुवाद

अब मरणकाल मे विशेष से वर्द्धमान सत्त्व आदि गुणो का फल विशेष दो श्लोक से कहते है कि जो सतोगुण की वृद्धि के समय मे देहधारी जीव शरीर छोड़ैं तो हिरण्यगर्भ आदि की उपासना करने वाले मनुष्यों के प्रकाशमय मे [illegible] होने से [illegible] सुख उपभोग करने के जो स्थान हैं उन स्थान विशेष को प्राप्त होय हैं १४ ॥

दोहा

जबहिं सतगुणवृद्धि मे जीव त्यागहिं देह तब उतमविद लोक को स्वच्छहिं प्रापें सेह १४ ॥

रजसिप्रलयंगत्वा कर्मसंगिषुजायते त
थाप्रलीनस्तमसि मूढयोनिषुजायते
१५

शांकरभाष्यटीका १

रजसिगुणेविवृद्धेप्रलयं मरणं गत्वा प्राप्य कर्मसंगिषु स्व
कर्माशक्तियुक्तेषु मनुष्येषु जायते तथा तद्वदेव प्रलीनोमृ
तस्तमसि विवृद्धेमूढयोनिषुपश्वादियोनिषु जायते १५

आनंदगिरिटीका २

रजःसमृद्धे के मृतस्य फलविशेषं दर्शयति रजसीति जाय
ते शरीरं गृह्णातीत्यर्थः यथा सत्वे रजसि च प्रवृद्धे मृतो ब्र
ह्मलोकादिषु मनुष्यलोके च जायते देवादिषु मनुष्येषु च
जायते तथैवेत्याह तद्वदिति १५

स्वामिकृतटीका ३

किंचरजसीति रजसिप्रवृद्धेसतिमृत्युंप्राप्य कर्मासक्तेषुमनु
ष्येषुजायते तथातमसिप्रवृद्धेसतिप्रलीनोमृतोमूढयो
निषुपश्वादिषुजायते १५ ॥

पिशाचभाष्यटी ४

रजसिप्रवृद्धेकर्मसंगिषुजायते प्रलीनोमृतः तमसिप्रवृ
द्धेमूढयोनिषुतिर्यक्षु १५ ॥

रामानुजटीका ५

रजसीति रजसिप्रवृद्धेमरणंप्राप्यफलार्थकर्मकुर्वतांकुलेषु
जायते तत्रजनित्वास्वर्गादिफलसाधनकर्मस्वधिकरोतीत्य
र्थः तथातमसिप्रवृद्धेमृतोमूढयोनिषुश्वसूकरादियोनि
षुसकलपुरुषार्थारंभानर्होजायतेइत्यर्थः १५

अभिनवगुप्तकृतटीका ६

यदासमग्रेणैवजन्मनानवरतसात्विकव्यापाराभ्यासात्सत्वं

श्री॰
गी॰ टी॰
सी

विवृद्धे भवति तदा प्रलयस्य शुभलोकावाप्तिः एवं जन्माभ्यस्त
राजसकर्मणः प्रयाणादि मिश्राय भोगाय मानुष्याप्तिः तथा ते
नैव प्रकारेण यदा समग्रेण जन्मनां नामसमेव कर्माभ्यस्य तेन तदा
नरकतिर्यग्वृक्षादिदेहेषूत्पद्यते येन बाचवृत्ते मरणकाल एव
सत्वादीवृद्धे एतानि फलानीति तेन सम्यक् शरीरेन भवेत् प्रवेशः
यतः सर्वस्यैव सर्वथात्यन्तेण मोह एवोपजायते अस्मदाद्यो
र्यं च संवादीनी मानि श्लोकान्तराणि १५ ॥

परमार्थप्रपाटीका ७

रजसीति रजोगुणे वृद्धे सति प्रलयं मृत्युं प्राप्य कर्मासक्तेषु मनुष्ये
षु जायते तथा तमसि प्रवृद्धे सति प्रलीनो मृतः सन् मूढयोनिषु
पश्वादिषु जायते १५

वनमालीटीका ८

रजसि प्रवृद्धे सति प्रलयं गत्वा मृत्युं प्राप्य कर्मसंगिषु शास्त्रादि
विहितप्रतिषिद्धकर्मफलाधिकारिषु मनुष्येषु जायते तथा त
द्वदेव तमसि प्रवृद्धे प्रलीनो मृतो मूढयोनिषु पश्वादिषु जाय
ते १५ ॥

ज्ञसमवैजयंतीटीका ९

रजसि प्रवृद्धे सदेहस्य प्रलयं गत्वा मरणं प्राप्य यदि याति तर्हि क
र्मसंगिषु स्वर्गादिकाम्यकर्मासक्तेषु मनुष्येषु मध्ये जायते उ
त्पन्नो भवति ततो यत्नो भूत्वा स्वर्गादिसाधनरूपं कर्म करोतीत्य
र्थः तथा तमसि प्रवृद्धे सति प्रलीनो मृतः सन् जनो यदि जायते तर्हि
मूढयोनिषु पशुपक्ष्यादिष्वेव जायते न तु कदापि मनुष्यादि
षूत्पन्नो भवतीत्यर्थः १५ ॥

मधुसूदनीटीका १०

रजसि प्रवृद्धे सति प्रलयं मृत्युं गत्वा प्राप्य कर्मसंगिषु श्रुतिस्मृ
ति विहितप्रतिषिद्धकर्मफलाधिकारिषु मनुष्येषु जायते त
था तद्वदेव तमसि प्रवृद्धे प्रलीनः मृतो मूढयोनिषु पश्वादिषु जाय
ते १५

सदानंदीटीका ११

हृद्धेरजसिसंप्राप्यसत्वंकर्माधिकारिषु जायतेसौमनुष्येषु फलासक्तियुतेषुच । सतःप्रवृद्धेतमसिपश्वादिषुप्रजायते १५

नीलकंठीटीका १२

कर्मसंगिषुश्रौतस्मार्तकर्मानुष्टातृषुमनुष्येषु मूढयोनिषुतिर्यक्स्थावरवांडालादिषु १५ ॥

आनंदीटीका १३

रजसिप्रवृद्धेमृत्वाकर्मसंगिषुमनुष्येषुमूढयोनिषुपशुसरीसृपादिषु [illegible] १५

रामकंटीटीका १४

तथारजसिप्रवृद्धेसतिप्रलीनस्संकर्मसंगिषुरजोगुणप्रधानत्वात्तत्क्रियाविशेषपरेषुमर्त्येषुजायते तथैवतमसिविवृद्धेप्रलीनःसन्मूढयोनिषुतिर्यक्स्थावरादिषुतमःप्रधानेषुजायते इतिप्रयाणसमयेसत्वादिगुणवृद्धौफलनिर्देशार्थमाह १५ ॥

लासिकी[illegible]टीका १५

किंच—एवंसमयेणजन्मनाराजसकर्माभ्यासाद्रजोगुणेविवृद्धेसतिमरणंप्राप्य कर्मसंगिषुमनुष्येषुजायंते एवंजन्माभ्यस्ततामसकर्मातमसिप्रवृद्धे ततोमूढयोनिषुतिर्यग्वृक्षनरकादियोनिषुतमस्तारतम्यानुसारेणजायते यत्तयावत्तेमरणकालएवसत्वादौप्रवृद्धेयत्तानिफलानीति नतेसम्यक्शरीरेनुभवेप्रविष्टाः यतःसर्वस्यैवसर्वथानुस्मरणेमोहएवोपजायते अस्मिन्व्याख्यानेसंवादकान्यधिमाणिपद्यानि [illegible] १५ ॥

पंडोलीटीका

रजसीति रजसिप्रवृद्धेप्रलयंगत्वाकर्मसंगिषुकर्मासक्तियुक्तेषुमनुष्येषुजायते उत्पद्यतेतथातमसिप्रवृद्धेप्रलीनो

म्रतःमूढयोनिषुपश्वादिषुजायतेप्रतिगम्यते १५

१म रणवीरसमिद्धोयिनी॥

57

रजसिरजोगुणेप्रवृद्धेसतिप्रलयंमृत्युंगत्वाप्राप्यप्रवृत्तिस्व
तिचोदितविहितकर्मनिषिद्धकर्मफलाधिकारिषुमनुष्ये
षुजायते तथा तदेवतमसितमोगुणेप्रवृद्धेसति प्रलीनो
मृत्युमापन्नोमूढयोनिषुपश्विसरीसृपमृगादिषूत्पद्यते १५

मधुभाष

१५॥

भाषा अनुवाद

और रजोगुण की वृद्धि समय मे मरण प्राप्त होने से कर्म मे आशक्त मनुष्य लोक मे जन्म होता है और तमो गुण के वृद्धि काल मे देह छूटने से पशु पक्षी आदि मूढ़ जोनि मे जन्म पावे है। १५ ॥

दोहा

मरे जो रजगुण वृद्धि मैं कर्म संगि मे जाय तैसें तमगुण लीन होय मूढ़ योनि को पाय १५॥

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलं
रजसस्तु फलं दुःखमज्ञानं तमसः फलं १६

शांकरभाष्यटीका १

अतीतश्लोकार्थस्यैव संक्षेप उच्यते कर्मणः सुकृतस्य सात्त्विकस्येत्यर्थः आहुः शिष्टाः सात्त्विकमेव निर्मलं फलमिति रजसस्तु फलं दुःखं राजसस्य कर्मण इत्यर्थः कर्माधिकारात् फलमपि दुःखमेव कारणानुरूप्याद्राजसमेव तथा ज्ञानन्तमसस्तामसस्य कर्मणोऽधर्मस्य पूर्ववत् १६ ॥

आनंदगिरिटीका २

भावानां फलमुक्त्वा सात्त्विकादीनां कर्मणां फलमाह अतीतेति सुकृतस्य शोभनस्य कृतस्य पुण्यस्येत्यर्थः सात्त्विकस्याशुद्धिरहितस्येति यावत् सात्त्विकं सत्त्वेन निर्वृत्तं निर्मलं रजस्तमःसमुद्भवमलानभिषक्तमिति रजःशब्दस्य राजसे कर्मणि वृत्तौ हेतुस्तत्राह कर्मेति दुःखमेव दुःखवफलं सुखमेवेत्यर्थः कथमित्थं व्याख्यायते तत्राह कारणेति पापमिश्रस्य पुण्यस्य रजोनिमित्तस्य कारणत्वात् तदनुरोधात् फलमपि रजोनिमित्तं यथोक्तं युक्तमित्यर्थः अज्ञानमविवेकप्रायं दुःखं तामसस्याधर्मफलमित्याह तथेति १६।

स्वामिकृतटीका ३

इदानीं सत्त्वादीनां स्वानुरूपकर्मद्वारेण विचित्रफलहेतुत्वमाह कर्मण इति सुकृतस्य सात्त्विककर्मणः सात्त्विकं सत्त्वप्रधानं निर्मलं प्रकाशबहुलं सुखं फलमाहुः कपिलादयः रजस इति राजसस्य कर्मण इत्यर्थः कर्मफलकथनस्य प्रकृतत्वात् तस्य दुःखं फलमाहुः तमस इति तामसस्य कर्मण इत्यर्थः तस्याज्ञानं मूढत्वं फलमाहुः सात्त्विकादिकर्मलक्षणं च नियतं सङ्गरहितमित्यादिनाष्टादशाध्याये वक्ष्यति १६ ॥

पिशाचभाष्यटीका ४

सुकृतस्य पुण्यस्य फलं सात्त्विकं सत्त्वप्रधानं निर्मलं स्वच्छं सुखस्वरू

पं रजसः राजसस्य कर्मणः अज्ञानं मोहात्मविद्धमित्यर्थः १६

रामानुजभाष्यटीका ५

कर्मण इति एवं सत्त्वादिगुणमरणमुपगम्यात्मविदां कुले जायते तेना
नुष्ठितस्य सुकृतस्य फलाभिसंधिरहितमदाराधनरूपस्य कर्मणः
फलं पुनरपि ततोऽधिकसत्त्वजनितं निर्मलं दुःखगंधरहितं भवती
त्याहुः सत्त्वगुणपरिणाममिदं अनंतकालमहर्षयः रजसस्तु फलं
फलसाधनकर्मसंगिकुले जन्म फलाभिसंधिपूर्वककर्मारंभनत्फला
नुभवफलं पुनर्जन्म रजोवृद्धिः फलाभिसंधिपूर्वककर्मारंभपरंप
राकरूपसंसारिकं दुःखमप्ययमेवाहुः तद्गुणयाथात्म्यविदः [illegible]
[illegible]
दिजनितानिर्मलादिकं किलिष्टमाहुः १६ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः १६ ॥ ॥

परमार्थप्रपाटीका ७

इदानीं सत्त्वादीनां स्वानुरूपकर्मद्वारेण विचित्रफलहेतुत्वमाह
कर्मण इति सुकृतस्य सात्त्विकस्य कर्मणः फलं सात्त्विकं सत्त्वप्र
धानं सुखं तथा निर्मलप्रकाशवत्त्वं फलमाहुः शेषं स्पष्टं १६ ॥

वनमालीटीका ८

इदानीं स्वानुरूपकर्मद्वारा सत्त्वादीनां विचित्रफलत्वं संक्षिप्याह कर्म
ण इति सुकृतस्य सात्त्विकस्य कर्मणो धर्मस्य सात्त्विकं सत्त्वेन निर्वृ
त्तं निर्मलं रजस्तमोमलामिश्रितं सुखं फलमाहुर्महर्षयः रजसो
राजसस्य कर्मणः पापमिश्रस्य पुण्यस्य फलं राजसं दुःखं दुःखबहु
लमल्पसुखं कारणानुरूपत्वात्कार्यस्य अज्ञानमविवेकप्रायं दुः
खं तामसं तमसस्तामसस्य कर्मणोऽधर्मस्य फलमाहुरित्यनुषंगः
सात्त्विकादिकर्मलक्षणमष्टादशे वक्ष्यते अत्र रजस्तमःशब्दौ त
त्कार्ये कर्मणि प्रयुक्तौ कार्यकारणयोरभेदोपचारात् गोभिः श्री
णीत मत्सरमित्यत्र यथा गोशब्दस्तत्प्रभवे पयसि यथा वा धान्यम
सि धिनुहि देवानित्यत्र धान्यशब्दस्तत्प्रभवे तंदुले १६ ॥

तदानीं स्वानुरूपकर्मद्वारा सत्त्वादीनां विचित्रफलतां संक्षिप्याह

हनुमवैजयंती १

अथेदानीं सत्त्वादिगुणानां स्वस्वभावानुरूपकर्मद्वारा विचित्रफल
हेतुत्वमाह कर्मण इति सत्त्वहेतोः सुप्राप्याम्नविदो फले जायते
तेनानुष्ठितस्य सुकृतस्य फलाभिसंधिरहितस्य यद्वाराधनरू
पस्य कर्मणः सात्विकं सत्त्वगुणसंबंधि निर्मलं मलाद्दुःखमोह दु
रूपरजस्तमःफललक्षणान्निर्गतं फलं सुखरूपमाहुः सत्त्वगु
णस्वभावविदो मुनयः रजसो राजसस्य पुण्यपापमिश्रस्य कर्म
णो राजसं दुःखबहुलाल्पसुखरूपं फलं रजोगुणस्वभावविदो
महर्षय आहुः कार्यस्य कारणानुरूपत्वनियमात् तमसस्ताम
सस्य केवलपापस्याधर्मस्य हिंसादेः कर्मणस्तामसमज्ञानपरंप
रारूपं फलमाहुस्तमोगुणस्वभावविदो मुनयस्तमसोऽपि दुःखस्व
रूपत्वात्तत्कार्यमपि तामसादिकं दुःखबहुलमेवेत्यर्थः १६ ॥

मधुसूदनीटीका १

सुकृतस्य सात्विकस्य कर्मणो धर्मस्य सात्विकं सत्वेन निर्वृत्तं निर्मलं र
जस्तमोमलामिश्रितं सुखं फलमाहुः परमर्षयः रजसो राजसस्य
तु कर्मणः पापमिश्रस्य पुण्यस्य फलं राजसं दुःखं बहुलमल्पसुख दुःख
कारणानुरूपात्कार्यस्य अज्ञानमविवेकप्रायं दुःखं तामसं तमस
स्तामसस्य कर्मणः अधर्मस्य फलमाहुरित्यनुषज्यते सात्विका
दिकर्मलक्षणं च नियतं संगरहितमित्यादिना अष्टादशे वक्ष्यति
अत्र रजस्तमःशब्दौ तत्कार्ये कर्मणि प्रयुक्तौ कार्यकारणयोरभे
दोपचारात् गोभिः श्रीणीत मत्सरमित्यत्र यथा गोशब्दः तत्प्र
भवे पयसि यथा वा यथान्नमसि थिन हि देवानित्यत्र यथान्यशब्दस्त
त्प्रभवे तंडुले तत्र पयस्तंडुलयोरिवात्रापि कर्मणः प्रकृतत्वात्
[illegible] १६ ॥

सदानंदीटीका ११

स्वानुरूपक्रियाद्वारा विचित्रफलतां हरिः संक्षिप्याहाधुना तेषां सत्त्वा
दीनां विशेषतः १ सात्विकस्य च धर्मस्य हीनं रजस्तमोमलैः फलं
सत्वेन निर्वृत्तं प्राहुर्वेदविदो वराः २ पापमिश्रस्य पुण्यस्य फलं दुः

श्री· गी·टी· चं 60

रवं हि राजसं तामसस्याप्यधर्मस्य दुःखं मोहयुतं फलं अत्र रजस्त
मःशब्दौ तत्कार्यकर्मणि कार्यहेतोरभेदोपचारादन्नमसी
तिवत् ४ यान्यशब्दो यथा तत्र तद्रूतेस्मिंस्तद्रूले तथा रजस्तमः
शब्दौ तत्कार्यकर्मणीत्यपि ५ गोभिः श्रीणीतेत्यत्र गोशब्दोपि
तद्रूपे पयसि प्रकृतित्वात्स्या यथा तद्वदिहापि च १६ ॥

नीलकंठीटीका १२

सुकृतस्य सात्विकस्य कर्मणः फलं निर्मलं दुःखाज्ञानमलशून्यं सा
त्विकं ज्ञानवैराग्यादिकं रजसो राजसस्य कर्मणः फलं दुःखं तम
सस्तामसस्य कर्मणः फलं अज्ञानं सात्विकादिकर्मलक्षणं च नि
यतं संगरहितमित्यादिनाः ष्टादशे वक्ष्यति ॥ १६ ॥

^सुकर्मीत्रह्रूपं सत्वादिहृद्धेः फलमाह ॥ आनंदीटीका १३

^सुकृतस्य यथाशास्त्रविहितस्य कर्मणः फलं सत्वविहृद्धौ निर्मलं
कैवल्यप्रापकम् तपुनः रजसः हृद्धौ फलकामनया क्रियमाण
स्य कर्मणः फलं दुःखं विनश्वरत्वादायासवाहुल्याद्वा तमसो हृद्धौ
क्रियमाणस्य कर्मणः फलमज्ञानं विपरीतज्ञानं नत्कृतं नरकपा
तादिकमित्यर्थः [illegible] १६ ॥

रामकंठीटीका १४ ॥

सुकृतस्य सत्वप्रहृद्धौ सत्यां यथाशास्त्रं सम्यगनुष्ठितस्य कर्मणो य
ज्ञादेः क्रियाविशेषस्य सात्विकं सत्वगुणादागतं निर्मलं विशुद्धं
विशिष्टज्ञानसुखस्वरूपं फलं भवतीति शेषः रजसस्तु रजोवि
हृद्धौ सत्यां यथाशास्त्रं कर्मणः दुःखं फलं संशयादिदुष्टचित्तत्वा
त् श्रद्धादिगुणविशुद्धाभावे यत्कर्म क्रियते तत्त्वहृनिलक्षणं दुः
खमेव फलमित्यर्थः एवमेव तमसो विहृद्धौ सत्यां कृतस्य क
र्मणो मोहादिदुष्टचित्तत्वाच्छास्त्रविधिवैपरीत्येन प्रयुक्तस्य ज्ञान
मोहएव फलं संग्रहेणैतदेवाह १६ ॥

लासिकी [illegible]टीका १५

अत्रहेतुमाह ॥ सुकृतस्य कृष्टसात्विकतया ज्ञानसुखमध्याहृत्याकृतस्यानुष्ठित

स्यकर्मणो यज्ञादेः सात्विकं सत्वादागतं प्रकाशसुखमयं अम
लं रजस्तमोमलामिश्रणाद्धि मुदं फलमाहुः रजसो ह्यस्मा
त्कृतस्य कर्मणः फलं दुःखमाहुर्महर्षयः सात्विकादिकर्म
लक्षणमष्टादशाध्याये वक्ष्यति॥ [illegible]
[illegible] १६ ॥

पंचोलीटीका

सत्वादीनां स्वरूपकर्मद्वारेण विचित्रफलहेतुत्वमाह कर्म
ण इति सुकृतस्य सात्विकस्य कर्मणः सात्विकं निर्मलं फल
माहुः रजसः राजसस्य कर्मणः दुःखं फलमाहुः तमसस्ताम
सस्य कर्मणः अज्ञानं फलमाहुः १६

श्रणवीरसमिद्धोधिनी॥

इदानीं स्वानुरूपकर्मद्वारा सत्वादीनां विचित्रफलतामाह
कर्मण इति सुकृतस्य कर्मणः सात्विकस्य धर्मस्य सात्विकं
सत्वप्रभवं सात्विकं निर्मलं रजस्तमोभ्याममिश्रितं प्रकाशमयं
फलमाहुः पूर्वे महर्षयः कपिलादयः रजस इति राजसस्य
कर्मण इत्यर्थः कर्मफलकथनस्य प्रक्रांतत्वात्तस्य फलं दुः
खमाहुस्तथा तमसस्तामसस्य कर्मणोऽज्ञानमविवेकं फल
माहुरिति १६॥

मध्वभाष्य

१६॥

61

भाषा अनुवाद

अब सत्व आदि गुणत्रय के अनुरूप कर्मोके द्वारा विचित्र फल प्राप्ति मे गुणों को हेतु कहते हैं कि कपिल आदि ऋषि सुकृत कर्म सात्विक कर्म का फल सत्वप्रधान प्रकाशमय सुखफल कहते हैं और राजस कर्म का फल दुःख कहते है और तामस कर्म का फल अज्ञान अर्थात् मूढ़ता को कहते हैं किंतु सात्विकादि कर्म का स्वरूप भगवान श्रीकृष्ण आठारहें अध्याय के तेईस श्लोक आदि से कहेगे । ९ ॥

दोहा

सुकृत कर्मको फल कहैं सात्विक निर्मल सोय रजगुण कर्म
हि दुःख है तमगुण अज्ञान हि होय १८॥

सत्वात्संजायतेज्ञानंरजसोलोभएवच प्रमा
दमोहौतमसोभवतोऽज्ञानमेवच १७ ॥

शंकरभाष्यटीका १

किंच गुणेभ्योभवति सत्वादिति सत्वात् लब्धात्मकात् संजाय
ते समुत्पद्यते ज्ञानं रजसोलोभएवच प्रमादमोहौ चोभौ तमसो
भवतोऽज्ञानमेव भवति १७

आनंदगिरिटीका २

विहितप्रतिषिद्धज्ञानकर्माणि सत्वादीनां लक्षणानि संक्षिप्य
दर्शयति किंचेति ज्ञानं सर्वकरणद्वारकं अज्ञानं विवेकाभावः १७

स्वामिकृतटीका ३

तत्रैवहेतुमाह सत्वादिति सत्वाज्ज्ञानंसंजायते ततः सात्विकस्यकर्म
णः प्रकाशबहुलंसुखंभवति रजसोलोभोजायतेतस्यचदुःखहे
तुत्वाद्राजसस्यकर्मणोदुःखंफलंभवति तमसस्तुप्रमादमोहा
ज्ञानानिभवंति ततः तामसस्यकर्मणोज्ञानप्रायंफलंभवतीति
युक्तमेवेत्यर्थः १७ ॥

पिशाचभाष्यटीका ४

स्पष्टार्थं १७ ॥

रामानुजभाष्यटीका ५

+ एवमंतकालप्रवृद्धस्यतमसः फलमज्ञान
परंपरारूपेन दाधिकसत्वादिजनितनिर्मलादि
फलंकिमित्य
त्राह ॥ +सत्वादिति एवंपरंपरयाजातादधिकसत्वादात्मयाथात्म्यापरोक्ष
रूपंज्ञानंजायते तथा प्रवृद्धाद्रजसोस्वर्गादिफलेलोभोजायते त
थाप्रवृद्धाच्चतमसः प्रमादोनवधानं तन्निमित्ता सत्कर्मणिप्रव
त्तिस्ततश्चमोहोविपरीतज्ञानं विपरीतज्ञानंचाधिकतरंतमः तत
श्चाज्ञानंज्ञानाभावः १७ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १७ ॥

परमार्थप्रपाटी ७

सत्वादितिस्पष्टं १७ ॥ ॥

वनमालीटीका ८

श्री° गी° टी° चं°

63

सर्वकरणद्वारकं प्रकाशरूपं ज्ञानं सत्त्वात्संजायते अतस्तदनुरूपसा त्विकस्य कर्मणः प्रकाशवत्फलं सुखं फलं भवति रजसो लोभो विषय कोटिप्राप्त्यापि निवर्तयितुमशक्याभिलाषविशेषो जायते तस्य च निरंतरमुपचीयमानस्य पूरयितुमशक्यस्य सर्वदा दुःखहेतुत्वात्सर्व कराजसस्य कर्मणो दुःखं फलं भवति एवं प्रमादमोहौ प्रागव्या ख्यातौ तमसः सकाशाद्भवतो जायेते अतस्तामसस्य कर्मणस्ता मसमज्ञानादिप्रायमेव फलं भवतीत्यर्थः १७ ॥

ऊनमवैजयंतीटीका ९

ननु शुद्धं सत्त्वादिगुणानां प्रकाशप्रवृत्तिप्रमादादीनि फलानि तयोक्तानीदानीं निर्मलत्वादीनि यानि वदसि तानि किं तेभ्योऽधिका न्यभावापर्य्यायभेदेन तान्येव स्मृतिरूपेणैतायामान्येव भवंतीत्याह स त्त्वात्संजायत इति सत्त्वात्सत्वगुणात्मकसत्वनिर्मलत्वादिपर्य्याय रूपं ज्ञानं संजायते अतः सात्विकस्य कर्मणः प्रकाशादिप्रचुरं सुख रूपं फलं भवति तथा रजसो रजोगुणात् लोभस्तस्मा विशेषो योनेक कोटिभिरपि विषयैरपि समेवितैर्दुष्पूरस्तस्य दुःखहेतुत्वात्तत्सर्वक स्य कर्मणो दुःखप्रचुरमल्पसुखं फलं तमसस्तमोगुणात्प्रमादमो हौ भवतस्ततः पुनरज्ञानमेव भवति प्रवृत्तानमसः प्रमादेन वधानंतनि मित्तासत्कर्मणि प्रवृत्तिस्ततस्ततो मोहो विपरीतं ज्ञानं तेन तस्माधिकत रं तमसस्त्वज्ञानं ज्ञानाभावो अतस्तत्सर्वकस्य कर्मणश्चैतन्यप्रचुरं दुः खमेव फलं भवति न किंचिदपि सुखलेशगंध इत्यर्थः १७

एतादृशफलवैचित्र्यं पूर्वोक्तमेव हेतुमाह ॥

मधुसूदनीटीका ९ ॥

सर्वकरणद्वारकं प्रकाशरूपं ज्ञानं सत्त्वात्संजायते अतस्तदनुरूपं सात्विकस्य कर्मणः प्रकाशवत्फलं सुखं फलं भवति रजसो लोभः विषयकोटिप्राप्त्यापि निवर्तयितु [illegible] मशक्यस्य सर्वदा दुःखहेतुत्वात् तत्सर्वकस्य राजसस्य कर्मणो दुःखं फलं भवति एवं प्रमादमोहौ तमसः सकाशाद्भवतः जायेते अज्ञानमेव च भवति एवकारः प्रकाशप्रवृत्तिव्यावृत्त्यर्थः अतस्तामसस्य कर्मणः ता

ममसमज्ञानादिमायमेवफलंभवतीतिशुक्रमेवेत्यर्थः अत्रच अज्ञा
नमप्रकाशः प्रमादोमोहस्थ[illegible]प्रकाशप्रवृत्तिश्चेत्यत्रव्याख्याताः
[illegible] र्थ [illegible]
[illegible]यैवनाह १७

सदानंदीटीका ११

ईदृशेफलवैचित्र्येहेतुमाहगुणेरिति सत्वात्प्रकाशरूपंतज्ज्ञानं
संजायतेस्फुटं १ रजसस्तुकदोलोभोभिलाषाख्योभिजायते
प्रमादमोहौख्याख्यातौजायेतेतमोगुणात् २ प्रमादमोहयोरीद
तज्ज्ञानंहृद्धिमेमतः १७ ॥

नीलकंठीटीका १२

एतादृशफलवैचित्र्येपूर्वोक्तमेवहेतुमाह सत्वादिति ॥ १७ ॥

आनंदीटीका १३॥ एतदेवसिद्धांतोक्त्याह

स्पष्टार्थः १७ ॥ ॥

रामकंठीटीका १४

एतस्यसत्वादीनांगुणानांपृथक्स्वरूपसमुदायाचारफलादिभेद
प्रपंचप्रतिपादनस्यसर्वास्ववस्थासुतेषांवैद्यैकस्वरूपताप्रतिपा
दनतात्पर्यंवेदितव्यमस्यच प्रयोजनमाह १७ ॥

+ अथसत्वादीनांस्त्रोकांतरेपिस [illegible]जननेनियममाह॥

लासिकी[illegible]टीका १५

+स्पष्टार्थः श्लोकः १७ [illegible] । १७

पंचोलीटीका

इदांनीकार्यविशेषमाह सत्वादिति सत्वात्प्रवृद्धात्ज्ञानंसं
जायतेरजसः प्रवृद्धाल्लोभउत्पद्यतेतमसः प्रवृद्धात्प्रमादमो
होभवतः अज्ञानंभवति १७

रणवीभसमिद्धोयिनी॥

सत्वादिति सत्वाज्ज्ञानंसंजायते ततः सात्विककर्मणः प्रकाश
बहुलंसुखंफलंभवति रजसोलोभोजायते तस्यदुःखहेतु
त्वात्तत्सर्वकस्यकर्मणोदुःखंफलंभवति तमसस्तुप्रमादमो
हाज्ञानानिभवंति ततस्तामसस्यकर्मणोज्ञानप्रायंफलंभव
तीतियुक्तमेवेत्यर्थः १७॥

मधुभाष्य

१७॥

भाषा अनुवाद

अब पूर्वोक्त सत्वादि गुण के फलस्वरूप सुख आदिका हेत कहते हैं कि सतो गुण से ज्ञान उत्पन्न होता हैं इस से सात्विक कर्म का प्रकाश जो सुख सोई होता है औ रजो गुण सें लोभ जन्मै है इस से लोभ पूर्वक सर्व कर्म का दुख ही फल होता है औ तमोगुण से प्रमाद मोह तथा अज्ञान प्रगटै है इस अज्ञान जडता यही फल होना उचित है। १७।

दोहा

ज्ञान हि सतसें होतहै रजसें लोभहि होय तमसें मोह प्रमा
दहिं अरु अज्ञानहिं सोय १७॥

65

ऊर्ध्वं गच्छंति सत्वस्था मध्ये तिष्ठंति राजसाः ज
घन्यगुणवृत्तिस्था अधो गच्छंति तामसाः १८

शांकरभाष्यटीका १

किंच ऊर्द्धमिति । ऊर्द्धं गच्छंति देवलोकादिषु उत्पद्यंते सत्वस्थाः
सत्वगुणवृत्तस्था मध्ये तिष्ठंति मनुष्येषु उत्पद्यंते राजसाः जघन्य
गुणवृत्तस्था जघन्यश्चासौ गुणश्च जघन्यगुणस्तमस्तस्य वृत्तं नि
द्रालस्यादि तस्मिन् स्थिता जघन्यगुणवृत्तस्था मूढा अधोगच्छंति
पश्वादिषु उत्पद्यंते तामसाः १८ ॥

आनंदगिरिटीका २

सात्विकादिज्ञानकर्मफलान्युक्तान्यनुक्तसंग्रहार्थं सामान्येनोपसं
हरति किंचेति वक्ष्यमाणफलद्वारापि सत्वादिषु ज्ञानमित्यर्थः
सत्वगुणस्य वृत्ते शोभने ज्ञाने कर्मवा तत्र तिष्ठंतीति तथा राज
सा रजोगुणनिमित्ते ज्ञाने कर्मणि वा निरताः १८ ॥

स्वामिकृतटीका ३

इदानीं सत्वादिवृत्तिशीलानां फलमाह ऊर्ध्वमिति सत्वस्थाः सत्व
वृत्तिस्थाः सत्ववृत्तिप्रधाना ऊर्ध्वं गच्छंति सत्वोत्कर्षतारतम्यात् उत्त
रोत्तरशतगुणानंदान् मनुष्यगंधर्वपितृदेवादिलोकान् सत्यलो
कपर्यंतान् प्राप्नुवंतीत्यर्थः राजसास्तृष्णाद्याकुला मध्ये तिष्ठंति
मनुष्यलोक एवोत्पद्यंते जघन्यो निकृष्टस्तमोगुणस्तस्य वृत्तयः
प्रमादमोहादयस्तत्र स्थिता अधो गच्छंति तमोवृत्तितारतम्यात्ता मि
स्रादिषु निरयेषूत्पद्यंते १८ ॥

पिशाचभाष्यटीका ४

सात्विका देहं त्यक्त्वा स्वकर्मफलभोगार्थमूर्ध्वं देवलोकादीन् गच्छं
ति राजसाः स्वकर्मफलभोगार्थं मनुष्यलोके तिष्ठंति जघन्यगुणस्त
मोगुणः जघन्यगुणप्रवृत्तं जघन्यगुणवृत्तिस्था मसाः पुरुषाः जघन्य ता॰
गुणवृत्तिस्थाः मोहनिष्ठा अधो गच्छंतीत्यर्थः १८ ॥

रामानुजभाष्यटीका ५

ऊर्द्ध्वमिति एवमनेन प्रकारेण सत्वस्था ऊर्द्ध्वं गच्छंति क्रमेण संसारबं
धात् मोक्षं गच्छंति राजसास्तु रागादिलोभकारणत्वाज्ज्ञानस्य फलस्याथ
न भूते कर्मानुष्ठायतत्फलमनुभूय पुनरपि जनित्वा तदेव तदपेक्षितं
कर्मानुतिष्ठंति मध्ये तिष्ठंति पुनरावृत्तिरूपतया दुःखमायमेव तत्र
तामसास्तु जघन्यगुणवृत्तिस्था उत्तरोत्तरनिकृष्टतमोवृत्तिषु स्थिता
अधो गच्छंति अंत्यजत्वं ततस्तिर्यक्त्वं ततः कृमिकीटादिजन्मस्थाव
रत्वं ततोपि गुल्मत्वं ततश्च शिलाकाष्ठलोष्ठत्वं गच्छंतीत्यर्थः
१८ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १८ ॥

परमार्थप्रपाटीका ७

अथ सत्वादिवृत्तिशीलानां फलभेदमाह ऊर्ध्वमिति सत्वे विरतं ति
ष्ठंतीति ते सत्वस्थाः सत्वप्रधाना ऊर्ध्वं गच्छंति ते शांतगुणेनेदान्मनु
ष्यपि स्वदेवलोकान्गच्छंति राजसास्तस्मात्कुलानि मध्ये मनुष्यलोक
एव तिष्ठंति जघन्यो निंद्यो गुणस्तमस्तद्वृत्तिस्थास्तामसा अधः अंध
तामिस्रासु योनिषूत्पद्यंते १८ ॥

वनमालीटीका ८

अत्र तृतीयगुणे वृत्तशब्दप्रयोगादाद्ययोरपि वृत्तमेव विवक्षितं तेन
सत्वस्थाः सत्ववृत्ते शास्त्रीये ज्ञाने कर्मणि च निरता ऊर्द्ध्वं सत्यलोक
पर्यंतं देवलोकं गच्छंति तत्र देवत्वमुत्पद्यंते राजसा रजोगुणे लोभादिप्र
वृत्तिके राजसे कर्मणि निरताः अधो गच्छंति पश्वादिषूत्पद्यंते कदा
चिज्जघन्यगुणवृत्तस्थाः सात्विका राजसाश्च भवंति तत्राह तामसाः
सर्वदा तमःप्रधाना इतरेषां कदाचिद्वृत्तस्थत्वेपि न तत्प्रधानत्वमिति भा
वः १८

ज्ञानकर्मनिरतस्तेन तणमध्ये मनुष्यलोके पुण्यपापमिश्रेति वृत्ति न तूर्ध्वं गच्छंति अधो वा मनुष्येषूत्पद्यन्ते

ऊर्ध्ववैजयंतीटीका ९

अथेदानीं सत्वरजस्तमोवृत्तिस्था जना ऊर्द्ध्वं मध्यमधो गच्छंतीत्याह ऊ
र्द्ध्वं गच्छंतीति अत्र तमोगुणो वृत्तिशब्दप्रयोगात्सत्वरजोगुणयोरपि

वृत्तिरेव विवक्षिता सत्वस्थाः सत्वगुणवृत्तिनिष्ठा जना ऊर्ध्वं गच्छंति
सत्वगुणतारतम्येन सत्यलोकादिप्राप्तिक्रमेण संसारवधान्ता
दं प्राप्नुवंति राजसा रजोगुणवृत्तिनिष्ठा जना रजोगुणतारतम्ये
न मध्ये पुण्यपापमिश्रिते मनुष्यलोके तिष्ठंति स्वर्गादिफलप्रा
ना प्तिसाधनभूतं कर्मानुष्ठाय तत्फलमनुभूय पुनरपि जनित्वा तदपे
क्षितं कर्मानुतिष्ठंति पुनरावृत्तिरूपतया दुःखप्रायमेवैतदित्यर्थः
तामसास्तमोगुणनिष्ठा जनास्तमोगुणतारतम्येनाधो गच्छंति शू
द्रजत्वं ततस्तिर्यक्त्वं ततः कृमिकीटादिजन्म स्थावरत्वं ततोपि गुल्म
त्वं ततः शिलाकाष्ठलोष्टमत्वं प्राप्नुवंति यतो जघन्यगुणवृत्तिस्थाः
जघन्यासु नरोत्तरनिकृष्टप्राधिकासु तमोगुणवृत्तिषु तिष्ठंति
ते तथा सत्वस्था राजसास्तामसाश्च क्रमशस्तेषां सर्वदानंतदुःखोप
वस्थितित्वं व्रजंति १८ ॥ + इदानीं सत्वादिवृत्तस्थानां शास्त्रोक्तं फलमूर्ध्वमधा धोभावेनाह ॥

मधुसूदनीटीका १८

+ अत्र तृतीये गुणे वृत्तशब्दप्रयोगादाद्ययोरपि वृत्तमेव विवक्षितं ते
न सत्वस्थाः सत्वप्रवृत्ते शास्त्रीये ज्ञानकर्मणि च निरताः ऊर्ध्वं सत्य
लोकपर्यंतं देवलोकं गच्छंति ते देवेषूत्पद्यंते ज्ञानकर्मतारतम्येन त
णामध्ये मनुष्यलोके पुण्यपापमिश्रे तिष्ठंति न तूर्ध्वं गच्छंत्यधो वा
मनुष्येषूत्पद्यंते राजसाः रजोगुणवृत्तलोभादिपूर्वके राजसे कर्म
णि निरताः तथा जघन्यगुणवृत्तस्थाः जघन्यगुणवृत्त्यापेक्षपा
पश्चाद्भाविनः निकृष्टस्य तमसो गुणस्य वृत्ते निद्रालस्यादौ स्थिताः
अधो गच्छंति पश्वादिषूत्पद्यंते कदाचिज्जघन्यगुणवृत्तस्थाः सात्वि
कराजसाभ्यां भवंत्यत आह तामस इति तामसाः सर्वदा तमः प्रधा
नाः कदाचिज्जघन्यस्यापि न नरेतरेषां प्रधानत्वेति भावः अविनिर्वाच्येव
वि कार्येन प्रकृत्या मर्त्यत्रये तत्र तेन तेन तत्संयोगसंस्कारप्राधीनत्वं केवलगुणाः
कथं वा बध्नीतामर्थद्वयमुक्तं अधुना तद्गुणेभ्यः कथं मोक्षणमित्यत्र
सच किल लक्षणमिति वक्तव्यमवशिष्यते तत्र मिथ्याज्ञानात्मकत्वाद्गुणा
नां सम्यग्ज्ञानात्तेभ्यो मोक्षणमित्याह १८ ता

सदानंदी टीका १९

श्री· गी·टी· चं

67

शास्त्रीये कर्मणि ज्ञाने रतास्तत्पराः ते सत्यलोकपर्यंतं यांति देवेषु
जन्मना १ लोभादिपूर्वके हृते रता ये राजसास्ते जनाः मध्ये मनुष्यलोके
ते पुण्यपापविमिश्रिते २ तिष्ठंति न तु गच्छंति चोर्द्ध्वं वाप्यथ वाप्यधः
पश्वादिषु प्रजायंते निद्रालस्यादितत्पराः ३ तमःप्रधानास्तद्वृत्ते
निद्रालस्यादिके रताः निकृष्टगुणवृत्तिस्था जायंते तामसास्सदा ४
न जातु सात्त्विकास्स्फारा राजसा वा भवंति ते अतस्तमोरजस्त्यक्त्वा
सुखार्थं सत्त्वमाश्रयेत् १८ ॥

नीलकंठीटीका १८

यतः सत्त्वादिभ्यो ज्ञानादीनि जायंतेऽतः सत्त्वादिवृद्धिकाले प्रलयं
गच्छंतः क्रमेणोत्तममध्यमाधमयोनिषु जायंत इत्याह ऊर्ध्वमिति
ऊर्ध्वे देवभावे मध्ये मानुषभावे अधः नरकतिर्यक्स्थावरभावे
जघन्यनिंद्यगुणवृत्ते निद्रालस्यप्रमादादितत्परास्तामसाः १८

आनंदीटीका १८

अत्र विस्तारो याज्ञवल्क्यः आत्मज्ञः शौचवान् दांतः तपस्वी
विजितेंद्रियः धर्मकृद्वेदविद्यावान् सात्त्विको देवयोनिताम् रजसा त
मसा चैव समाविष्टो भ्रमन्निह भावैरनिष्टैः संयुक्तः संसारं प्रतिप
द्यते तथा च मनुः तत्र यत्प्रीतिसंयुक्तं किंचिदात्मनि लक्षयेत् ॥
प्रभातमिव शुद्धाभं सत्त्वं तदुपधारयेत् तथा वेदाभ्यासस्तपोज्ञानं
शौचमिंद्रियनिग्रहः धर्मक्रियात्मचिंता च सात्त्विकं गुणलक्ष
णम् तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते सत्त्वस्य धर्मः श्रैष्ठ्य
मेतयथोत्तरम् तापसा यतयो विप्रा ये च वैमानिका गणाः नक्ष
त्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः ब्रह्मा विश्वसृजो धर्मो म
हानव्यक्तमेव च उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः अ
सत्कार्यरतोऽधीर आरंभी विषयी च यः स राजसो मनुष्येषु मृतो जन्मा
धिगच्छति झल्ला मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः द्यूतपानप्रसक्ता
श्च प्रथमा राजसी गतिः राजानः क्षत्रियाश्चैव राज्ञां चैव पुरोहिताः
वादयुद्धप्रधानाश्च द्वितीया राजसी गतिः गंधर्वा गुह्यकाश्चैव विवि
धाश्चचराश्च ये तथैवाप्सरसः सर्वा राजसेषूत्तमा गतिः तामसल

त्तणमाह निद्रालुः क्रूरकृल्लुब्धो नास्तिको याचकस्तथा प्र
मादवान्भिन्नवृत्तो भवेत्तिर्यक्तनामसः स्थावराः कृमिकीटा
श्च मत्स्याः सर्पाः सरीसृपाः पशवश्च मृगाश्चैव जघन्याता
मसी गतिः हस्तिनश्च तुरंगाश्च शूद्रा म्लेच्छाश्च गर्हिताः सिंहा
व्याघ्रा वराहाश्च मध्यमा तामसी गतिः चारणाश्च सुपर्णाश्च
पुरुषाश्चैव दांभिकाः रक्षांसि च पिशाचाश्च तामसेषूत्तमा ग
तिः शरीरजैः कर्मदोषैः याति स्थावरतां नरः वाचिकैः पक्षि
मृगतां मानसैरंत्यजातितां परद्रव्येष्वभिध्यानं मनसानि
ष्टचिंतनं वितथाभिनिवेशश्च त्रिविधं कर्ममानसम् वाचि
कमाह पुरुषोऽनृतवादी च पिशुनः पुरुषस्तथा अनिबद्धप्र
लापी च मृगपक्षिषु जायते अनिबद्धप्रलापी पुराणादिविद्या
स्थानविरुद्धाभिधायी मनुः पारुष्यमनृतं चैव पैशुन्यमपि स
र्वतः अनिबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् कायिकमा
ह अदत्तादाननिरतः परदारोपसेवकः हिंसकश्चाविधानेन
स्थावरेषूपजायते अदत्तादानं चौर्यं यस्यां यस्यामवस्थायां य
त्करोति शुभाशुभं तस्यां तस्यामवस्थायां तत्तत्फलमवाप्नु
यात् शारीरेण हि शारीरं वाङ्मयेन हि वाङ्मयं मानसं मनसा चै
व स कर्मफलमश्नुते [illegible]

[illegible] रामकंटीटीका ४

सुष्टार्थ [illegible] १८ ॥

लासिकी [illegible]टीका १५

लोकान्तरप्रापणेपि तेषां नियममाह॥

सत्वहनस्यात्रयेऽपि सत्वोत्कर्षतारतम्यादुत्तमरोत्तमयोगगु
णानां दानात् गन्धर्वपितृदेवादिलोकान् सत्यलोक
पर्यन्तान् प्राप्नुवंति राजसास्तु स्वर्गफलामध्यमनुष्य

68

लोकेउत्पद्यंते जघन्यगुणस्यतमसोहृतेप्रमादमोहादौ स्थिताःप्रयोगच्छंतितेमोहृतिनारतस्मात्तिर्यंनरकादिषु जायंते [illegible] ॥ १८ ॥

पंचोलीटीका

इदानींसत्वादिगुणविशेषशीलानांपारलौकिकंफलविशेषमाह ऊर्द्ध्वमिति सत्वस्थासत्वगुणाहृतिस्थाः ऊर्द्ध्वंदेवलोकादिषुगच्छंतिजायंतेराजसाःरजोगुणहृतिस्थाःमनुष्येषुजायंते जघन्यगुणाहृतिस्थाःतामसाःगुणाहृताःप्रमादालस्यादिस्थिताःमूढास्तामसाःप्रयोगच्छंतिपश्वादिषुजायंते १८

श्रीणावीरमामिश्रोधिनी॥

इदानींसत्वादिहृतिशीलानांफलमाह ऊर्द्ध्वमिति सत्वस्थाःसत्वहृतिस्थाःशास्त्रीयेज्ञानेयथावर्णाश्रमप्रतिपादितेचकर्मणिनिरताः ऊर्द्ध्वंसत्वोत्कर्षतारतम्यादुत्तरोत्तरप्रातगुणानेदगंधर्वपितृदेवादिलोकान्सत्यलोकपर्यंतान्गच्छंतिप्राप्नुवंतीत्यर्थः राजसारजोगुणहृतयस्तस्मायाऊलोमध्येतिष्ठंति मनुष्यलोकेपुण्यपापमिश्रेतिष्ठंतिनतूर्ध्वंगच्छंतिनवाधः किन्तु मनुष्येषूत्पद्यंते तथाजघन्यगुणहृतिस्थाइति जघन्यस्यगुणहृयापेक्षयानिकृष्टस्यगुणस्यतमसोहृतौनिद्रालस्यादौस्थिताः प्रयोगच्छंतिपश्वादियोनिषूत्पद्यंतेइत्यर्थः यस्मात्सत्वस्योर्ध्वंगामिनोराजसामध्यगामिनस्तामसाअधोगामिनस्तस्माद्वान्मनुवै:पितृपितामहादिभिरनदेवाचरितंममाप्यवश्यमनुष्ठेयंपूर्वाचरितस्यहिश्रेयसोवापालनमेवास्माकंपरमोधर्मइत्याधर्मवर्त्मनामा

त्विकनिश्चयमालभ्योत्तमलोकमाप्स्यैस्वधर्माद्विरतोमाभूर्मा
निकृष्टतमेऽस्वकार्येप्रमादवशगोभूरितिभावः १८॥

मधुमाश्च

१८॥

69

भाषा अनुवाद

अब सतो गुण आदि आचरणशीलों के फल भेद कहते हैं किस
तरह कहै सतोगुण प्रधान पुरुषोंको ऊर्द्ध लोक प्राप्त होत अर्था
त् सत्व के प्रताप से पुण्य की आधिक्य होतीहै उत्तरोत्तर सौगुनी
आनंद स्वरूप होते हुये मनुष्य लोक गंधर्वलोक पितृलोक देव
लोक सत्यलोक पर्यन्त प्राप्त होते हैं और रजोगुण प्रधान मनु
ष्य लोभग्रस्त मध्यलोक मे रहते हैं अर्थात् मनुष्य लोक मे ज
न्मे हैं और जघन्य कहै निकृष्ट जो तमोगुणी मनुष्य प्रमाद मोह
से भरे हुये उनकी अधोगती होती है अर्थात् तमोगुण उनको ह
या कर अन्धतम नरकमे पहुचाय दे है । १८ ।

दोहा

ऊर्ध जात है सात्विकी राजसी मध्यस्थित होय तमोगुणप्र
वृत्ति तामसी नीचगति होय सोय १८ ॥

7º

नान्यंगुणेभ्यः कर्तारंयदाद्रष्टानुपश्यति गु
णेभ्यश्चपरंवेत्तिमद्भावंसोधिगच्छति १९

शांकरभाष्यटीका १

पुरुषस्य प्रकृतिस्थत्वस्वरूपेण मिथ्याज्ञानेन युक्तस्य भोग्ये
षु गुणेषु सुखदुःखमोहात्मकेषु सुखी दुःखी मूढोहमस्मी
त्येवं रूपो यः संगस्तत्कारणं पुरुषस्य सदसद्योनिजन्मप्राप्ति
लक्षणस्य संसारस्येति समासेन पूर्वाध्याये यदुक्तं तदिह स
त्वं रजस्तमइतिगुणाः प्रकृतिसंभवा इत्यतआरभ्य गुणस्वरूपं
गुणवृत्तं स्ववृत्तेन च गुणानां बंधकत्वं गुणवृत्तनिबद्धस्य च
पुरुषस्य या गतिरित्येतत् सर्वं मिथ्याज्ञानमज्ञानमूलं च बं
धकारणं विस्तरेणोक्त्वाधुना सम्यक् दर्शनात् मोक्षो वक्त
व्य इत्याह भगवान् नान्यमिति नान्यं कार्यकारणविषयाका
रपरिणतेभ्यो गुणेभ्यः कर्तारमन्यं यदा द्रष्टा विद्वान् सन्ना
नुपश्यति गुणा एव सर्वावस्थाः सर्वकर्मणां कर्तार इत्येवं प
श्यति गुणेभ्यश्च परं गुणव्यापारसाक्षीभूतं वेत्ति मद्भावं म
मभावं वासुदेवत्वं वासुदेवः सर्वमित्येवं पश्यन् स द्रष्टाधिग
च्छति । १९ ॥

आनंदगिरिकृतटीका २

कस्मिन् गुणे कथमित्यादि प्रश्नान् प्रत्याख्याय गुणेभ्यो मोक्षणं
कथमिति प्रत्याख्यानार्थं वृत्तानुवादपूर्वकं मिथ्याज्ञाननिवर्तकं
सम्यग्ज्ञानं प्रस्तौति पुरुषस्येत्यादिना । पुरुषस्य या गतिः
साचेति शेषः मोक्षो गुणेभ्यो विश्लेषपूर्वको ब्रह्मभावः सम्यग्
ज्ञानोक्तिपरं श्लोकं व्याख्यातुं प्रतीकमादत्ते नान्यमिति सत्वादि
कार्यविषयस्य गुणशब्दस्य विवक्षितमर्थमाह कार्येति विद्वान
न्तर्यमनुशब्दार्थः अनंतरार्थमुक्त्वा पूर्वार्द्धस्यार्थिकमर्थमाह गुणा
एवेति । सर्वावस्थाकार्यकरणाकारपरिणता इति यावत् सर्व
कर्मणां पूर्वार्द्धस्यार्थिकमर्थमाह गुणाएवेति । सर्वावस्थास्तत्का

र्यकरणाकारपरिणता इति यावत् सर्वकर्मणां कायिकवाचिक
मानसानां विहितप्रतिषिद्धानामित्यर्थः परं च्यतिरिक्तं व्यतिरेकमे
व स्फोरयति गुणेति निर्गुणं ब्रह्मात्मानमित्यर्थः मद्भावं ब्रह्म
तामसौ प्राप्नोति ब्रह्मभावस्याभिव्यज्यत इत्यर्थः १९ ।

स्वामिकृतटीका ३

तदेवं प्रकृतिगुणसंगकृतं संसारं सप्रपंचमुक्तेदानीं तद्विवेकतो
मोक्षं दर्शयति नान्यमिति यदा तु द्रष्टा विवेकी भूत्वा बुद्ध्याद्याकार
परिणतेभ्यो गुणेभ्योन्यं कर्तारं नानुपश्यति अपि तु गुणा एव कर्म
३ णि कुर्वंतीति पश्यति गुणेभ्यश्च परं व्यतिरिक्तं तत्साक्षिणमात्मा
नं वेत्ति स तु मद्भावं ब्रह्मत्वमधिगच्छति प्राप्नोति १९ ॥

पिशाचभाष्यटीका ४

नान्यमिति द्रष्टा विद्वान् गुणेभ्यः परं गुणव्यापारसाक्षिभूतं मद्भा
वमीश्वरभावं १९ ॥

⁴ आहारविशेषैः फलाभिसंधिरहितसुकृतविशेषै
श्च परंपरया प्रवर्धितसत्वानां
गुणात्यद्वारेण ऊर्ध्वगमनप्र
कारमाह ॥

रामानुजभाष्यटीका ५

नान्यमिति एवं सात्विकाहारसेवया फलाभिसंधिरहितभगवदा
राधनरूपकर्मानुष्ठानेन च रजस्तमसी सर्वात्मनाभिभूय निःकृष्ट
सत्वनिष्ठो यदायं द्रष्टा गुणेभ्योन्यं कर्तारं नानुपश्यति गुणा एव स्वा
नुगुणप्रवृत्तिषु कर्तार इति पश्यति गुणेभ्यश्च परं वेत्ति कर्तृभ्यो गुणे
भ्यश्च परमन्यमात्मानमकर्तारं वेत्ति स मद्भावमधिगच्छति मम
यो भावस्तमधिगच्छति एवमुक्तं भवति आत्मनः स्वतः परिशुद्ध
स्वभावस्य पूर्वकर्ममूलगुणसंगनिमित्तं विविधकर्मसु कर्तृत्वमा
त्मा स्वतस्तु कर्ता अपरिच्छिन्नज्ञानैकाकार इत्येवमात्मानं यदा पश्यति
तदा मद्भावमधिगच्छति कर्तृभ्यो गुणेभ्योन्यमकर्तारमात्मानं प
श्यन् भगवद्भावमधिगच्छतीत्युक्तं [illegible]

१९ सप्तार्थं १९ ॥ अभिनवगुप्तकृतटीका ६ मधुसूदनी टी· ७

गुणेभ्यः कार्यकारणविषयाकारपरिणतेभ्यः अन्यं कर्तारं यदा द्र
ष्टा विवेकज्ञः सन्नानुपश्यति विचारमनेनानुपश्यति गुणा एवांतः
करणबहिःकरणशरीरविषयभावापन्नाः सर्वकर्मणां कर्तार इति

प॰॰ति गुणेभ्यश्च तत्तदवस्थाविशेषेण परिणतेभ्यः परं गुणतत्
कार्यासंस्पृष्टं तत्साक्षकमादित्यमिव जलतत्कंपाद्यसंस्पृष्टं निर्विका
रं सर्वसाक्षिणं सर्वत्र समं देवं तमेकं वेत्ति मद्भावं मद्रूपतां स द्रष्टाधि
गच्छति कथमधिगच्छतीत्युच्यते १९ ॥

परमार्थप्रपादीटीका ८

एवं गुणप्रवाहरूपं संसारं व्याख्यायेदानीं इदं ज्ञानमुपाश्रित्य मम साध
र्म्यमागता इति पूर्वं प्रतिज्ञातमनुस्मरन्मोक्षप्रापकज्ञानोपायमा
ह नान्यमिति द्वाभ्यां यदा द्रष्टा विवेकी भूत्वा बुद्ध्याद्याकारेण परिण
तेभ्यो गुणेभ्यः सकाशादन्यं कर्तारं न पश्यति अपि तु गुणा एव कर्मा
णि कुर्वन्तीति पश्यति तथा गुणेभ्यः परं व्यतिरिक्तं तत्साक्षिणमा
त्मानं वेत्ति स तु मद्भावं ब्रह्माधिगच्छति १९ ॥

वनमालीटीका ९

गुणैरेवं धुनप्रकारमुक्त्वा तेषां मोक्षणप्रकारमाह नान्यमिति यदा द्र
ष्टाविवेकी गुणेभ्यः कार्यकारणविषयाकारपरिणतेभ्योऽन्यं कर्ता
रं कृत्यादिमन्तं न वेत्ति गुणेभ्यः परं गुणतत्कार्यास्पृष्टं गुणनियंता
रं सदनं तं गुणालयं सर्वेश्वरं च शास्त्रात्कदाचिद्गुणास्पृष्टं स्वभावतो
गुणादिविविक्तं चिदानंदस्वरूपं जीवं समद्भावमाविर्भूतज्ञानानंद
त्वनिर्मुक्तत्वादिरूपं साधर्म्याख्यां मुक्तिमधिगच्छति ननु कर्त्रीशा
स्त्रार्थवत्त्वादित्यादिशास्त्रोक्तं जीवस्यापि कर्तृत्वमस्तीति कथमुच्य
ते नान्यं गुणेभ्यः कर्तारमिति चेत् जीवस्य प्रवाहतोऽनादिः कर्मादृष्टा
दौ मदीयमित्यभिनिवेशः स्वस्वामित्वसंबंधेन कर्मादृष्टादिकं जीवे
संबद्धं तादृशस्वजनकादृष्टवत्त्वेन संबंधेनोत्पन्नमपि कृतं सुखदुः
खादिकं वास्तवं जीवे वर्तते कर्मादौ ममेत्यभिमाननिवृत्तौ चांतःक
रणउत्पन्नमपि संबंधाभावाज्जीवे न वर्तते नो भिनिवेशराहित्येन जी
वस्य स्वतोऽकर्तृत्वमित्यभिप्रायेणोक्तं गुणेभ्यः परमित्यादिकं साभिमा ग्य
नस्य वास्तवकर्तृत्वाभिप्रायेण कर्त्रीशास्त्रार्थवत्त्वादित्यादिकमि
तिभावः १९ ॥

ज्ञानमवैजयन्तीटीका ९ ॥

एवं सत्वादिगुणानामविवेकात्पुरुषस्य संसारप्राप्तिर्भवतीत्युक्त्वा
इदानीं तेषां विवेकान्मोक्षो भवतीत्याह द्वाभ्यां नान्यं गुणेभ्य इति
यदा द्रष्टा स्वस्वरूपपर्यवस्थायी जीवात्मा गुणेभ्यः शरीरेंद्रियादि
रूपेण परिणतेभ्यः सत्वादिभ्योऽन्यमिमं कर्तारं नानुपश्यति किं-
तु गुणा एव स्वानुगुणप्रवृत्तिषु कर्तार इति पश्यति च पुनरात्मानं
गुणेभ्यः परमन्यमकर्तारं वेत्ति तदा स मद्भावं मम यो भावस्तमधि
गच्छतीत्ययमभिप्रायः विशुद्धविज्ञानानंदरूपोऽयं जीवात्मा गुण
कृतविविधविचित्रानिष्टः स्वमयप्रयत्नपुष्टादिकर्मणां कर्ता न भव
ति किंतु गुणमयशरीरेंद्रियादिवानेव सन्नेवेति गुणानिष्टंक
र्तृत्वं गुणहेतुकत्वाद्गुणानामेव तच्छुद्धात्मनि हि शुद्धात्मनः कर्तृत्वं
स्वाभाविकं न तु गुणहेतुकमिति पुरायन्तद्भाषि इत्येवं यदा जीवो
नुपश्यति तदा मद्भावमसंसारित्वमक्षरभक्तिं वा लभते इति अस्य
द्वितीयोऽप्यर्थः यदा द्रष्टा नापहृष्टो गुणेभ्योऽन्यं भिन्नमात्मानमनु
पश्यति च पुनः गुणेभ्यः परं विलक्षणं कर्तारं कर्तृत्वोपलक्षिता
नां ज्ञातृत्वभोक्तृत्वादीनां धर्माणामाश्रयं स्वात्मानं वेत्ति तदा स मद्भा
वमधिगच्छति अन्यस्मात्मानं भगवदभिप्रेतोऽर्थः यमेव द्रष्टानुपश्य
तीति मुद्दृष्टस्यैव द्रष्टृत्वधर्माश्रयत्वोक्तेः १९ ॥

मधुसूदनीटीका १०

गुणेभ्यः कार्यकारणविषयाकारपरिणतेभ्यः अन्यं कर्तारं यदा द्र
ष्टा विचारकुशलः सन्नानुपश्यति विचारमनुपश्यति गुणा एव
अंतःकरणबहिःकरणशरीरविषयभावापन्नाः सर्वकर्मणां कर्ता
र इति पश्यति गुणेभ्यश्च तत्तदवस्थाविशेषेण परिणतेभ्यः परं
गुणतत्कार्यासंस्पृष्टं तद्भासकमादित्यमिव जलतत्कंपाद्यसंस्पृष्टं
निर्विकारं सर्वसाक्षिणं सर्वत्र समं देवत्रत्तमेकं वेत्ति मद्भावं मद्रूपतां
स द्रष्टाधिगच्छति [illegible] १९ ॥

सदानंदीटीका ११

अध्यायेस्मिन्नुपक्रांतमर्थत्रयमिति द्वयं विष्णुप्रोक्तं तत्तीयं चावशि
ष्टं वर्णयत्यजः । देवदेवत्वसंयोगाईश्वराधीनत्वमपि केवा गुणाः

कथं वा ते बध्नंतीत्यर्थकं द्वयं २ उक्ताधुना गुणेभ्योस्य मोक्षणं स्या
त्कथं तथा लक्षणं किं विमुक्तस्य वाच्यमित्यवशिष्यते ३ मिथ्या
ज्ञानस्वरूपत्वाद्गुणानां तत्त्वबोधतः तेभ्यो मोक्षणमित्याह भ
गवान्करुणाकरः ४ कार्यकरणविषयाकारेण बहुधा गुणाः
परिणामं गतास्तेभ्यः कर्तारं न विलक्षणं ५ विचारकुशलो द्रष्टा
यदा पश्यति वीक्षणात् देहेंद्रियमनोबुद्धिविषयाकारतां गताः ६
गुणा एव हि कर्तारः सर्वदा सर्वकर्मणां इत्येवं पश्यति द्रष्टा स्वानु
भूत्यागमैर्नयैः ७ ततस्तदवस्थापेक्षेभ्यो गुणेभ्यः परमक्रियं गु
णकार्याद्यसंस्पृष्टं गुणव्यापारसाक्षिणं सर्वत्र सममानंदं देव
त्वे चैकमद्वयं चिद्घनं निष्कलं शुद्धं सर्वहृद्यवभासकं ९ मांस्व
धर्मैरसंस्पृष्टमादित्यमिव वेत्ति यः स द्रष्टा जीवतां हित्वा मद्रूपत्व
च गच्छति १९ ॥

नीलकंठटीका १२ ॥

कथं प्रकृतिः पुरुषं बध्नातीत्यस्योत्तरमुक्तं कथं वा ततोस्य मुक्ति
रित्यस्योत्तरमाह नान्यमिति गुणेभ्यः कार्यकारणविषयाकारप
रिणतेभ्योन्यं दृशिमात्रमात्मानं द्रष्टा जीवः कर्तारं नानुपश्यति
विवेकमंतरेण न पश्यति किंतु गुणा एव कर्तार इत्येव पश्यति न त्व
हं कर्तेति तथा गुणेभ्यः परं गुणव्यापारसाक्षिभूतं मां यदा वेत्ति
तदा स वेदिता मद्भावं ब्रह्मभावं गच्छति अन्यदा तु गुणभावं गतो भ
वति ॥ १९ ॥

गुणबंधान्मोक्षोपायमाह ॥

आनंदटीका १३

…भेदार्थं लक्षयति उक्तप्रकारेण स्वरूपतः स्वमोहजनका गुणा एव संसारे बंधकाः ना
न्यः कश्चिदिति द्रष्टा विचारको यदा पश्यति विचारयति गुणेभ्यश्च
कार्यकारणयोरभेदाद्गुणकार्येभ्यः सत्त्वादिभ्यः परं सत्त्वाद्यना
सक्तमात्मानं वेत्ति स मद्भावं मत्सायुज्यमधिगच्छति गुणातीत
त्वविशेषणतो जितात्मा १९

रामकंठटीका १४

स्पष्टार्थं १९

॥

+एवंप्रसक्तात्प्रसक्त्याद्गुणातीतस्तुक्ता अधुनाप्रकृतं ज्ञानोपदेशं पुनरप्यनुसरति ॥

श्री॰ गी॰टी॰ चं

73

लालिकी [illegible]टीका १९

+अयं द्रष्टा देही जाग्रत्स्वप्नावस्थायां यदा गुणेभ्यो बुद्ध्याकारपरिणतेभ्यो
न्यं कर्तारं नानुपश्यति गुणा एव कर्माणि कुर्वंतीति साक्षात्कु
रुते गुणेभ्यश्च परं वेत्ति विक्रमेव तत्साक्षिणमात्मानं वेत्ति वे
दयते ननु वैश्वानरस्यमलभते समभ्रावं मद्रूपं समानमधिगच्छ
ति मद्देवस्वरूपः प्रकृतेर्येष्वेष विनियोक्ता भवतीत्यर्थः चो
वधारणे [illegible] १९ ॥

पंचोलीटीका

सत्वं रजस्तम इति आरभ्य गुणस्वरूपं गुणवृत्तिस्वस्ववृत्तेन
गुणानां बंधकत्वं गुणवृत्तिनिबद्धस्य पुरुषस्य गतिविशेषः
इत्येतत्सर्वमज्ञानादिमूलं बंधकारणं विस्तरेणोक्त्वा इदानीं
तद्विवेकेन सम्यग्दर्शनान्मोक्षं दर्शयति नान्यमिति यदा द्रष्टा
कर्तारं गुणेभ्यः सत्वादिभ्यो देहेंद्रियविषयाकारपरिणतेभ्यः
अन्यं नानुपश्यति च पुनः गुणेभ्यः सत्वादिभ्यः परं देहेंद्रियादि
व्यापारसाक्षिणं वेत्ति स द्रष्टा मद्भावमधिगच्छति १९

रणवीरसमिद्बोधिनी ॥

नान्यमिति यदा द्रष्टा विचारकुशलो गुणेभ्यः कार्यकारण
विषयाकारेण परिणतेभ्यो व्यतिरिक्तमन्यं कर्तारमनुवि
चारमन्नं नपश्यति अपि तु गुणा एव कर्माणि कुर्वंतीति पश्य
ति गुणेभ्यश्च परं व्यतिरिक्तं देवस्तं निर्विकारमकर्तारं सर्व्वस
मं जानाति तदा स द्रष्टा मद्भावं मद्रूपतामधिगच्छतीत्यर्थः १९

मधुभाष्य

१९ ॥

भाषा अनुवाद

पूर्वोक्त प्रकार प्रकृति के गुण संग मे संसार की वाहुल्य कहि
के अव प्रकृति से पुरुष का विवेक करने ही से मोक्ष होती है
यह देखावते हैं कि जिस काल मे द्रष्टा जीव विवेकी होके
बुद्धि आदि रूपको प्राप्त सत्व आदि गुणों को छोड़ दूसरे कि
सीको कर्त्ता नहीं देखता वल्कि गुण ही सव कर्म्म करते हैं
यही देखता है और सत्व आदि गुणो से पर कहे भिन्न स्वरूप
सोई गुणादिकों का साक्षी आप अपने को जानै तव सो जी
व मद्भाव को प्राप्त होय अर्थात् ब्रह्मपद पावै । १९ ।

दोहा

कर्त्ता गुणसें और नहिं यों द्रष्टा देखहिं जोय गुणसें पर
लखें आत्मको मो को पावहिं सोय १९ ॥

गुणानेतानतीत्यत्रीन्देहीदेहसमुद्भवान् ज
न्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते २०

शांकरभाष्यटीका १

कथमधिगच्छतीत्युच्यते । गुणानेतान् यथोक्तानतीत्य जीवन्ने
वातिक्रम्य मायोपाधिभूतांस्त्रीन्देही देहसमुद्भवान् देहोत्पत्ति
बीजभूतान् जन्ममृत्युजरादुःखैः जन्म च मृत्युश्च जरा च दुःखा
नि चैतैर्जीवन्नेव विमुक्तः सन् विद्वानमृतमश्नुते एवं मद्भावमधि
गच्छतीत्यर्थः । २० ॥

आनंदगिरिकृतटीका २

अनर्थव्रातरूपमपोह्य विद्वान् ब्रह्मैव प्राप्नोतीत्येतत् प्रश्नद्वारा विवृणो
ति कथमित्यादिना । यथोक्तानित्येतदेव व्याचष्टे मायेति । मायैवो
पाधिस्तद्भूतान् तदात्मनः सत्त्वादीननर्थरूपानित्यर्थः समुद्भवं
तीति समुद्भवा देहस्य समुद्भवा देहसमुद्भवाः तानिति व्युत्पत्तिं
गृहीत्वा व्याचष्टे देहोत्पत्तीति । यो विद्वान् अविद्यामयान् गुणान्
जीवन्नेवातिक्रम्य स्थितस्तमेव विशिनष्टि जन्मेति । पुरस्तादिस्त
रेणोक्तस्य प्रसंगादत्र संक्षिप्तस्य सम्यक्ज्ञानस्य फलमुपसंहरति
एवमिति २० ॥

स्वामिकृतटीका ३

ततश्च गुणकृतसर्वानर्थनिवृत्त्या कृतार्थो भवतीत्याह गुणानेतानिति
देहाकारः समुद्भवः परिणामो येषां ते देहसमुद्भवास्तान् एतान्त्रीनपि
गुणानतीत्यातिक्रम्य तत्कृतैर्जन्मादिभिर्विमुक्तः सन् अमृतमश्नु
ते ब्रह्मानंदं प्राप्नोति २० ॥

पैशाचभाष्यटीका ४

देहसमुद्भवान्देहस्य कारणभूतान् २० ॥ ॥

^स भगवद्भावः कीदृशाइत्यत्राह ॥

रामानुजभाष्यटीका ५

गुणानेतान्यो देही देहसमुद्भवान्देहाकारपरिणतप्रकृतिसमुद्भवाने
तान्सत्त्वादींस्त्रीन्गुणानतीत्य तेभ्योऽन्यं ज्ञानैकाकारमात्मानं पश्यन्
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमात्मानमनुभवति एष मद्भावः इत्य

श्री॰ गी॰टी॰ चं [20] र्थः [illegible]

अभिनवगुप्तटीका ६

अत्र केचिदसम्बद्धाः श्लोकाः कल्पिताः पुनरुक्तत्वान्नेत्याज्या एव पुन
र्गुणानतीत इति श्लोको ह्यायैव कल्पने [illegible] २०॥

परमार्थप्रपाटीका ७

ततश्च गुणकृतसर्वानर्थनिवृत्त्या कृतकृत्यो भवतीत्याह गुणानिति
देहाकारः समुद्भवः परिणामो येषां तान् देहसमुद्भवानेतान् त्रीन्
गुणानतीत्यातिक्रम्य जन्ममृत्युजरादुःखैर्विमुक्तः सन्नमृतं मोक्षम
श्नुते २०॥

वनमालीटीका ८

देही देहं ममेत्यभिमानी एतान् सत्त्वादीन् त्रीनतीत्यातिक्रम्य देहस्य सम
द्भवो येभ्यस्तान् देहसमुद्भवान् देहोत्पत्तिबीजभूतान् जीवन्नेव
गुणेभ्यः परं हरिमाराध्य तत्प्रसादात् लब्धविवेकेनातिक्रम्य जन्ममृ गुणान
त्युजराभिर्याध्यात्मिकादीनि दुःखानि तैर्मुक्तो जीवन्नेव तत्संबंधशून्
यः सन्नमृतं मत्सायुज्यमोक्षमश्नुते प्राप्नोति २०॥

उसमवैजयंतीटीका ९

उक्तो यो महाभावः स कीदृशो भवतीत्यपेक्षायामाह गुणानेतानिति यो
देही देहमध्ये स्थितोऽपि जीवात्मा देहसमुद्भवान् देहोत्पादकानेतान्
सत्त्वादीन् त्रीन् गुणानतीत्य प्राकृता गुणा जडरूपाः संसारबंधहेतवः
एतेभ्यः पुरुषोऽभिन्नो ज्ञानरूपो ज्ञाता कर्ता भोक्ता इति गुणपुरुषयोः
स्वरूपयाथात्म्यज्ञानेनैतानुल्लंघ्य जन्ममृत्युजरादुःखैर्जन्मादिजनितै
र्दुःखैर्विमुक्तो ममैतैः सह कालत्रयेऽपि संबंधो नास्तीति विवेकेन गु
णेषु गुणकार्यदेहादिष्वसक्तः संसारस्तत्प्रकृतिवियुक्तः शुद्धा
त्मस्वरूपमश्नुते प्राप्नोति सोऽयमसंसारित्वलक्षणो महाभावो भव
तीत्यर्थः २०॥

मधुसूदनीटीका १०॥

कथमधिगच्छतीत्युच्यते गुणानेतान्मायात्मकांस्त्रीन्सत्त्वरजस्तमोनाम्नः देहसमुद्भवान्देहो

त्पत्तिबीजभूतानतीत्यजीवन्नेवतत्वज्ञानेनबाधित्वाजन्ममृत्युज
राडुःखैर्जन्मनामृत्युजरयाडुःखैश्चाध्यात्मिकादिभिर्मायामयै
र्विमुक्तोजीवन्नेवतत्त्वंपदार्थः सन्विद्वानमृतंमोक्षमश्नुव
मश्नुतेप्राप्नोति [illegible]
[illegible]
[illegible] २० ॥

सदानंदीटीका ११ ॥

त्वज्ञानंसकथंयातीत्यवंचेद्गुणत्वनः मायात्मकान्गुणाने
तान्रजःसत्वतमोभिधान् १ देहोत्पत्तेर्निमित्तत्वाद्बीजभूतानती
त्यचजीवन्नेवात्मबोधेनत्रीनतिक्रम्यबाधितान् २ जन्ममृत्युजरा
दुःखैस्तद्धार्यैनैवबाधितैः जीवन्नेवविमुक्तःसंस्तत्संसर्गविवर्जि
तः विद्वान्कैवल्यमानंदमश्नुवयातिमद्वपुः २० ॥

नीलकंठीटीका १२

कथंतज्ज्ञानंगच्छतीतितत्राह गुणानिति एतान्गुणान्महदादित्रयो
विंशतिविकारात्मनापरिणतान् देहसमुद्भवान्स्थूलदेहस्यसमु
द्भवोयेभ्यस्तान्अतीत्यजीवन्नेवातिक्रम्यनिर्विकल्पकसमाध्य
भ्यासेनबाधित्वामृतंमोक्षमश्नुतेप्राप्नोति एतेनानंदावाप्तिर्गुणा
त्ययप्रयोजनमुक्तं यतोमुक्तःजन्ममृत्युजराडुःखैर्विमुक्तःसन्नि
तितत्प्रानर्थनिहृतिरुक्ता ॥२० ॥

आनंदीटीका १३

स्फुटोर्थः ~~स्पष्टमेवार्थंत्वद्यति~~ २० ॥

रामकंठीटीका १४

शरीरविषयादिभावेनपरिणताः सर्वेप्रकृतिविकाररूपाभा
वादेहसमुद्भवाः सतिदेहेशरीरविषयात्मकत्वेनसमुद्भवंती
तितथात्मनैवोपलभ्यतामभिप्रपद्यंतेतान्नेतान्प्रतिपादितस्व
रूपांस्त्रीन्गुणाननतीत्यवेदकैकस्वभावात्स्वात्मनोव्यतिरेचने
ननिस्तीर्यदेहीतेभ्यस्तद्व्यतिरेचनादेवशरीरादितोनिहता
हंकारममकाराभिमानित्वात् शुद्धस्वभावचिन्मात्रएवप्रति

स्त्रिकाहंकारो गुणमयशरीरादिभावप्रतिबद्धैर्जन्ममृत्युजराद्युः
खैरुत्पादविनाशपरिणामक्लेशैर्विमुक्तः सन्नमृतत्वं परंब्रह्मस्वप
रमात्मानमश्नुते प्राप्नोति तदभेदं गच्छतीत्यर्थः किमनेनो
क्तं भवति गुणेभ्यः प्रतिपादितस्वरूपेभ्य आत्मनः स्वाभा
विकविविक्तत्वभावनाभूतप्रकृतेर्मोक्षः नतु शरीरविष
यादिरूपायास्तस्याः परिहारमात्रं अथ गुणातीतस्वरूपं वि
शेषतो जिज्ञासुरर्जुन उवाच २० ॥

अथ विशेषतो निर्दिशति ॥ लासिकी [illegible]टीका १५

देहस्य समुद्भवो येभ्यस्तादृशानेतानुक्तलक्षणांस्त्रीन्गुणान्
सत्वादीनतीत्य स्वात्मनि तेभ्यो व्यतिरेकेन विश्रांतिमुपलभ्य
जन्मना मृत्युना जरया दुःखैराध्यात्मिकादिभिर्विमुक्तस्तत्स
ंबंधशून्यः सन् देही देहसम्बन्धवानपि जीवन्नेवामृतं मोक्षा
नंदमश्नुते प्राप्नोति [illegible]
[illegible] २० ॥

पंचोलीटीका

ब्रह्मभावाधिगमप्रकारमाह गुणानिति देही विद्वानेता
न्मायोपाधिभूतान्त्रीन्सत्वादीन्गुणान्देहोत्पत्तिबीजभू
तानतीत्य जीवन्नेवातिक्रम्य जन्ममृत्युजरादुःखैः चतुर्भिः
जीवन्नेव मुक्तः सन्नमृतमश्नुते प्राप्नोति २०

रणवीरसमिद्धायिनी ॥

ततश्च कृतार्थो भवतीत्याह गुणानिति गुणानेतान्माया
त्मकांस्त्रीन्सत्वरजस्तमःसंज्ञकान्देहसमुद्भवान्देहोत्पत्तिबी
जभूतानतीत्यातिक्रम्य जन्मनामृत्युयाजरयादुःखैराध्या
त्मिकादिभिर्मायामयैर्विमुक्तस्तत्संबंधशून्यो मृतं मोक्षमक्ष
वमश्नुते प्राप्नोतीत्यर्थः २० ॥

सधुमाध

२०॥

भाषा अनुवाद

तिस के अनंतर सत्व आदि गुण कृत संपूर्ण अनर्थ निवृत्त होने ही से जो कृतार्थ होता है सोई कहते हैं कि सम्यक् प्रकार से जिसका देहादि रूप में उद्भव अर्थात् देहरूप परिणाम को प्राप्त हैं सोई देह समुद्भव कहावै है इस से देही जो जीवात्मा सो देह रूप परिणाम को प्राप्त येई सत्वादि तीन गुणों के अतिक्रमण करने से पर है अर्थात् गुणकृत जन्म मरण जरा दुःख आदि से अच्छी प्रकार मुक्त होय अमृत जो परम आनन्द सो लाभ करता है। २०॥

दोहा

देहसंभव इनतीनगुण जीवलंघहिं जोय जन्ममृत्युजरा
दुखसें मुक्त होत है सोय २०॥

अर्जुनउवाच कैर्लिंगैस्त्रीन्गुणानेतानतीतोभ
वतिप्रभो किमाचारःकथंचैतांस्त्रीन्गुणान
तिवर्तते २१ ॥

शांकरभाष्यटीका १

जीवन्नेव गुणानतीत्यामृतमश्नुतइति प्रश्नबीजं प्रतिलभ्य अर्जुन
उवाच कैरिति । कैर्लिंगैः चिन्हैस्त्रीनेतान् व्याख्यातान् गुणानतीतो
तिक्रांतोभवतिप्रभो किमाचारः कोस्याचारइति किमाचारः कथं
केन च प्रकारेण एतांस्त्रीन् अतिवर्तते २१ ॥

आनंदगिरिटीका २

प्रश्नबीजफलं गुणातिक्रमणपूर्वकममृतत्वमुक्तं श्रुत्वा मुक्तस्य ल
क्षणं वक्तव्यमिति मन्वानोविवदितवान् प्रश्नमुत्थापयति जीवन्नेवेति
ये व्याख्याताः सत्वादयोगुणाः तत्र त्रिगुणमश्नुतानध्यासानतिक्रा
न्तःसन् कैर्लिंगैर्ज्ञातोभवति इति तानि वक्तव्यानि सिद्ध्यर्थं पूर्वम
नुष्ठेयानि पश्चादयत्नलभ्यानि लिंगानि कानि तानीति पृच्छति
कैरिति । यथेष्टचेष्टाव्याहत्यर्थं प्रश्नान्तरं किमाचारइति । ज्ञानस्य
गुणात्ययोपायस्योक्तत्वादुपायप्रकारजिज्ञासया प्रश्नान्तरं कथमि
ति २१ ॥

स्वामिकृतटीका ३

गुणानेतानतीत्यामृतमश्नुते इत्येतच्छ्रुत्वा गुणातीतस्य लक्षणमाचारं
चगुणात्ययोपायंच सम्यग्बुभुत्सुर् अर्जुनउवाच कैरिति हेप्रभोकै
र्लिंगैः कीदृशैरात्मगुणैश्चिन्हैर्गुणातीतोदेहीभवतीतिलक्षण
प्रश्नः कः आचारोस्येतिकिमाचारःकथंवर्ततइत्यर्थः कथंचके
नोपायेनैतांस्त्रीनपिगुणानतीत्यवर्ततेतत्कथयेति २१ ॥

पिशाचभाष्यटीका ४

अर्जुनउवाच लिंगैःचिन्हैःअतीतअतिक्रांतः २१ ॥

रामानुजभाष्यटीका ५

+अर्जुनउवाच कैरितिसत्वादीस्त्रीन्गुणानेतानतीतःकैर्लिंगैःकैर्लक्ष
णैरुपलक्षितोभवति किमाचारःकेनाचारेणयुक्तोसौअस्यस्वरू

+अथगुणातीतस्यस्वरूपसूचनाचारप्रकारगुणत्ययहेतुंचपृच्छन् ॥

श्री॰ गी॰टी॰ चं॰

प्रावगते लिंगप्रभृताचारः कीदृश इत्यर्थः कथं चैतान् केनोपायेन सत्त्वा
दीन्त्रीन् गुणान् अतिवर्त्तते २१ ॥

अभिनवगुप्तटीका ६

अर्जुन उवाच सप्रार्थम् २१

नन्वयं देही कथं गुणातीतो भवति सर्वथैव हि कयाचिद्विभिन्नह्रत्यावर्त्तते सा च त्रैगुण्यादन्यतमा
[...]पं भवति अनेनाभिप्रायेणाह कैर्लिंगैरित्यादि ॥२१॥

परमार्थप्रपाटीका ७

एवमेतदुक्त्वा गुणातीतस्य लक्षणं गुणात्ययोपायं जिज्ञासुरर्जुनः पृच्छ
ति कैरिति भो प्रभो एतान्त्रयप्रकारान्त्रीन् गुणान् कैरात्मप्रत्यक्षैर्लिं
गैश्चिह्नैरतीतो भवति तथाविधः किमाचारः कीदृश आचारो यस्येति कि
माचारः कथं वर्त्तत इत्यर्थः कथं च केनोपायेन तांस्त्रीन् गुणानतीतः
अतीत्य वर्त्तत इति प्रश्नः २१ ॥

वनमालीटीका ८

गुणातीतस्वरूपमत इत्येतदुक्त्वा गुणातीतस्य लक्षणं तदाचारं गु
णात्ययोपायं च सम्यग्बुभुत्सया पृच्छति एतान् गुणानतीतः कैर्लिंगै
र्विशिष्टो भवति यैर्ज्ञातुं शक्यः किमाचारोऽस्य स किमाचारः किं यथे
ष्टः किं वा नियंत्रित इति कथं च केन चोपायेनैतांस्त्रीन् गुणानतिव
र्त्तते तिक्रामति २१ ॥

कुसुमवैजयंतीटीका ९

अथ गुणातीतस्य लक्षणमाचारं गुणात्ययोपायं च ज्ञातुमिच्छन्नर्जुन उवा
च कैर्लिंगैरिति एतान्सत्त्वादीन्त्रीन् गुणान् यः पुरुषः अतीतः उल्लंघित
इति कैर्लिंगैश्चिह्नैर्ज्ञातुं शक्यो भवतीत्यर्थ इत्येकः प्रश्नः किमाचारः सो
ऽकेनाचारेण युक्तो यथेष्टाचारेण नियताचारेण वा स्वस्वरूपज्ञानसमा
चारः कीदृशो भवतीत्यर्थः इति द्वितीयः प्रश्नः च पुनरेतान्सत्त्वान्
गुणान्कथं केन साधनेनातिवर्त्तते उल्लंघ्य स्थितो भवतीति तृतीयः
प्रश्नः इति संबोधनेनैतान्प्रश्नान्वक्तुं त्वमेव समर्थोऽसि नान्योऽतो मा
मोपरि कृपां कृत्वा ब्रूहीति सूचितम् २१ ॥

[...]नेतान्नतीत्य जीवन्नेवा
[...]म इत्युक्ते इत्येतत् श्रुत्वा
[...]तीतस्य लक्षणं चावा
[...]गुणातीतोपायं च सम्य
[...]न्मानः ॥

मधुसूदनीटीका १०

अर्जुन उवाच

+एतान्गुणानतीतो यः स कैर्लिंगैर्विशिष्टो भवति यैर्लिंगैः स ज्ञातुं
शक्यः तानि मे ब्रूहीत्येकः प्रश्नः प्रभुत्वात्त्वमेव भगवानेव निवारणी
यमिति सूचयन्संबोधयति प्रभो इति क आचारोऽस्येति किमाचारः किं

यथेष्टचेष्टः किंवानियंत्रित इतिद्वीतीयः प्रश्नः कथंचकेनचप्र
कारेणतांस्त्रीनूगुणाननतिवर्तते अतिक्राम्यतीति गुणातीतो
पायः कः इतित्ततीयः प्रश्नः स्थितप्रज्ञस्यकाभाषा इत्यादिना
दृष्टमपिप्रजहाति यदा कामान्नितमादिनादतोनरमपिपुनः प्र
कांतरेणाबुभुत्समानः एवं तेनसवधार्यप्रकारांतरेणतस्यल
क्षणादिकंपंचभिः श्लोकैः श्रीभगवानुवाच यस्तावत्कैर्लिंगैर्यु
क्तो गुणातीतोभवतीतिप्रश्नस्योत्तरंम्पृणु २१ ॥

सदानंदीटीका ११

जीवन्नेवगुणानेतानतीत्यामृतमश्नुते इत्येतद्वचनंश्रुत्वापार्थोभ
गवतोहरेः १ गुणातीतस्यचिह्नानि तथाचारमहात्मनः समबु
भुत्समानः सन्गुणातीतत्वसाधने २ उवाचवचनंचारुप्रश्नपी
यूषपूरितं गुणानेतानतीतोयः सकैर्लिंगैर्युतः प्रभो ३ तानि
श्राव्यः सर्वैर्लिंगैस्तानिमेब्रूहिएक्लतः प्रभत्वात्त्वदुःखानिवार
णीयानिसर्वथा ४ श्रीमद्भगवतेवेतिसूचयन्नाहहेप्रभो किमा
चारोगुणातीतः स्यात्प्रश्नोयंद्वितीयकः ५ सकिंयथेष्टचेष्टः स्या
त्किंवाशास्त्रनियंत्रितः एतान्केनप्रकारेणगुणांस्त्रीननिवर्तते ६
कोगुणातीततोपायः प्रश्नोयंचतृतीयकः २१ ॥

नीलकंठीटीका १२

प्रकृतिनोमक्तिप्रकारेउक्तेऽथमुक्तलक्षणानिपृच्छन्नर्जुनउवाचकै
रिति कैर्लिंगैश्चिह्नैस्त्रीनगुणानेतानत्याख्यातान् अतीतोभवति
प्रभानहेप्रभो सचकिमाचारः कोस्याचारः कथंकेनचप्रकारे
णैतांस्त्रीनगुणानतिक्रम्यवर्तते ॥ २१ ॥

गुणातीतत्वंविमृषतोजिज्ञासुः अर्जुनउवाच आनंदीटीका १३

स्पष्टार्थं २१ ॥ ॥

रामकंठीटीका १४

80

कैर्लिंगैरभिव्यंजकैर्लक्षणैरेतान्त्रीन्गुणानतीतो भव
ति तेभ्यो विमुक्तः संपद्यते यश्च गुणातीतस्तस्य किमाचारः किं
तस्य चेष्टितमित्यर्थः केन च प्रकारेण तानतिवर्तते व्यतिक्रामति
गुणातीतत्वप्राप्तिहेतुः कोविधिरिति प्रश्नत्रयनिर्णयार्थमु
त्तरं भगवानुवाच २१ ॥

एवं गुणातीतत्वं प्राप्तस्य सिद्धस्य लक्षणं हृत्युपायं बुभुत्सया॥ अर्जुन उवाच

लाक्षिकी [illegible]नीटीका १५

हे प्रभो यथा योगं ययोगाद्दशाभेददाने समर्थ अयं गुणातीतः
कैर्लिंगैरुपलक्षितो भवति तथायं किमाचारः कआचारोस्य
नि कथं वर्तत इत्यर्थः कथं च केनोपायेनैतांस्त्रीन्गुणानति
क्रामतीति कथय २१ ॥

पंचोलीटीका

जीवन्नेव गुणानतीत्यामृतमश्नुत इति श्रुत्वा गुणातीतलक्ष
णस्य गुणात्ययोपायं च बुभुत्सयार्जुन आह कैर्लिंगैरिति पू
र्वार्द्धेन गुणातीतस्य लक्षणं पृच्छति उत्तरार्द्धेन गुणातीतस्य
साधनं पृच्छति हे प्रभो कैर्लिंगैश्चिन्हैः एतांस्त्रीन्गुणानःतीः
तो भवति किमाचारः केनाचारेण कथं केन प्रकारेण एतान्
गुणाननतिवर्तते गुणातीतत्वं प्राप्नोति २१

रमावीरसमिद्धोधिनी

गुणातीतस्य लक्षणमाचारं च गुणात्ययोपायं च बुभुत्सुरर्जु
न उवाच कैर्लिं॰ इति एतान्त्रीन्गुणानतीतो भवति स
कीदृशो लिंगैर्विशिष्टो भवति यैर्लिंगैः संस्तान्प्रकाशते तानि
मे ब्रूहीत्येकः प्रश्नः क आचारोस्येति किमाचारः कथं वर्तते
अयमर्थ इति द्वितीयः प्रश्नः कथं च केन प्रकारेणैतांस्त्रीन्गुणा
नतीत्य वर्तत इति तृतीयः प्रश्नः स्थितप्रज्ञस्य का भाषेत्यादिना
क्रमपि प्रजहाति यदा कामानित्यादिना दत्तोत्तरमपि पुनर्वि
शेषजिज्ञासया पृच्छतीति २१ ॥

मधुमाष्य

२१॥

भाषा अनुवाद

जीव यह गुण त्रय से अतिक्रांत कहे अलग होने से मुक्ति पावता है यह भगवान कृष्ण के मुख से श्रवण करि के गुणातीत मनुष्य के लक्षण औ उन मनुष्यो का आचरण औ गुणो के अतिक्रम की उपाय सम्यक् प्रकार से जानने की इच्छा करि के अर्जुन भगवान से कहते है कि हे प्रभो देह जो जीव सो किस प्रकार आपसे उत्पन्न लक्षण के द्वारा गुणातीत होय यह लक्षण पूछा और किमाचार कहे उसके आचरण कैसे होते अर्थात् किस प्रकार के व्यवहार मे वर्त्तमान रहता है और किस उपायसे इन गुणों को अतिक्रमण करि के स्थिर होय सो सब कृपा करि कहिये जो मेरी सन्देह जाय ॥ २१ ॥

दोहा

किन लछण इन तीन गुण लंघत हि प्रभु सोय क्या आचा
र कैसें रहें य तीन गुण लांघहि जोय २२॥

82

श्रीभगवानुवाच प्रकाशं च प्रवृत्तिं च मोहमे
व च पाण्डव न द्वेष्टि संप्रवृत्तानि न निवृत्तानि
कांक्षति २२ ॥

शांकरभाष्यटीका १

गुणातीतस्य लक्षणं गुणातीतत्वोपायश्चार्जुनेन पृष्टोस्मिन् श्लो
के प्रश्नद्वयार्थं प्रतिवचनं भगवान् यत्तावत् कैर्लिंगैर्युक्तो गुणा
तीतो भवति तच्छृणु प्रकाशमिति प्रकाशं च सत्वकार्यं प्रवृत्ति
श्च रजःकार्यं मोहमेव च तमःकार्यमित्येतानि न द्वेष्टि संप्रवृ
त्तानि सम्यग्विषयभावेनोद्भूतानि मम तामसः प्रत्ययो जातस्ते
नाहं मूढस्तथा राजसी प्रवृत्तिर्ममोत्पन्ना दुःखात्मिका तेनाहं
रजसा प्रवर्त्तितः प्रचलितः स्वरूपात् कष्टं मम वर्त्तते योयं म
त्स्वरूपावस्थानात् भ्रंशस्तथा सात्विको गुणः प्रकाशात्मा मां
विवेकित्वमापादयन् सुखेन च संजनयन् मां बध्नातीति तानि ।
द्वेष्टासम्यग्दर्शित्वेन तदेवं गुणातीतो न द्वेष्टि संप्रवृत्तानि यथा
च सात्विकादि पुरुषः सात्विकादिकार्याण्यात्मानं प्रति प्रका
श्य निवृत्तानि कांक्षति न तथा गुणातीतो निवृत्तानि कांक्षतीत्यर्थः
२२

आनंदगिरिटीका २

प्रश्नस्वरूपमनूद्य तदुत्तरं दर्शयति गुणातीतस्येति । पृष्टो भगवा
निति संबंधः किं वृत्तस्य द्विधा प्रयोगदर्शनात् प्रश्नद्वयार्थमित्यु
पलक्षणं प्रश्नत्रयार्थमिति द्रष्टव्यं उत्तरमवतार्यानंतरश्लोकता
त्पर्यमाह यत्तावदिति । तानि सम्यग्दर्शी न द्वेष्टि इत्युक्तमेव स्प
ष्टयितुं निषेध्यमसम्यग्दर्शिनो द्वेषं तेषु प्रकटयति ममेत्यादिना
सम्यग्दर्शिनः संप्रवृत्तेषु प्रकाशादिषु द्वेषाभावमुपसंहरति
तदेवमिति । न निवृत्तानि इत्यादि व्याचष्टे यथा चेति । तेषामनात्मी
यत्वे सम्यक् पश्यमानात्मानुकूलप्रतिकूलता आरोपणेन नोद्विजते

श्री॰ गी॰टी॰ चं

83

तेभ्यश्च न स्पृहतीत्यर्थः २२ ॥ ॥

स्वामिकृत टीका ३

स्थितप्रज्ञस्य का भाषेत्यादिना द्वितीयाध्याये पृष्टमपि द्ध्योत्तरमपि पु
नर्विशेषबुभुत्सया पृष्टं कैर्लिंगैरित्यादि प्रश्नत्रयं तत्राद्यस्य लक्षणादिकं
श्रीभगवानुवाच प्रकाशं चेत्यादिभिः तत्रैकेन लक्षणमाह प्रकाशं
चेति सर्वद्वारेषु देहेस्मिन्प्रकाश उपजायत इत्युक्तं सत्त्वकार्यं प्रवृत्तिं च
रजःकार्यं मोहं च तमसः कार्यमुपलक्षणमेतत् सत्त्वादीनां सर्वा ५
एव कार्याणि यथायथं संप्रवृत्तानि स्वतः प्राप्तानि संतिदुःखबुद्ध्या यो
न द्वेष्टि निवृत्तानि च संतिय सुखबुद्ध्या न कांक्षति गुणातीतः स उ
च्यते इति चतुर्थेनान्वयः २२ ॥

पिशाचभाष्यटीका ४

श्रीभगवानुवाच प्रकाशं च २२ ॥

रामानुजभाष्यटीका ५

श्रीभगवानुवाच प्रकाशमिति आत्मव्यतिरिक्तेषु वस्तुषु निष्टेषु
प्रवृत्तानि सत्त्वरजस्तमसां कार्याणि प्रकाशप्रवृत्तिमोहाख्यानि द्वेष्टि
तथा आत्मव्यतिरिक्तेषु इष्टेषु तान्येव निवृत्तानि न कांक्षति २२ ॥

अभिनवगुप्तकृतटीका ६ अथोत्तरं भगवानुवाच

प्रकाशं च २२ ॥

परमार्थप्रपा टीका ७

तत्रोत्तरं भगवानाह प्रकाशं चेति षड्भिः तत्र प्रथममेकेन गुणाती
तस्य लक्षणमाह प्रकाशं चेति सर्व[illegible]द्वारेषु दे
हेस्मिन्निति पूर्वोक्तं सत्त्वकार्यं प्रवृत्तिश्च रजःकार्यं मोहस्तमःकार्य
मित्युपलक्षणार्थमेतत् सत्त्वादीनां सर्वाण्यपि कार्याणि यथायथं सं
प्रवृत्तानि स्वतः प्राप्तानि संतिदुःखबुद्ध्या न द्वेष्टि निवृत्तानि संति च न
कांक्षति गुणातीतः स उच्यत इति चतुर्थेनान्वयः २२ ॥

वनमालीटीका ८

स्थितप्रज्ञस्येत्यादिना पृष्टमपि प्रजहातीत्यादिनोत्तरितमपि पुनः प्र

कारांतरेणतुबुभुत्समानःपृच्छतीत्यवधार्यप्रकारांतरेणतस्यलक्ष
णादिकमाह प्रकाशमितिपंचभिः प्रकाशंसत्वकार्यंप्रवृत्तिं
रजःकार्यंमोहंतमःकार्यं उपलक्षणमेतत् सर्वाणिगुणकार्या
णियथायथंसंप्रवृत्तानिस्वसामग्रीवशादुद्भूतानिसंतिदुःखस्व
रूपाण्यपिदुःखबुद्ध्यायोनद्वेष्टितथाविनाशसामग्रीवशान्निवृ
त्तानितानिसुखरूपाण्यपिसंतिसुखबुद्ध्यानकांक्षतिनवांछति
गुणानांगुणकार्याणांचानात्मत्वादनात्मधर्मत्वाच्च अंतःकरण
स्यप्रसन्नत्वादेरुत्कर्षीत्यात्मनिस्वाभाविकसंबंधाभावात् सुखदुः
खादीनामात्मनिसंबंधघटकस्याभिमानस्यात्मतत्वविदोनिवृ
त्तत्वादितिभावः एतादृशोरागद्वेषशून्योयःसगुणातीतउच्यतइ
तिचतुर्थश्लोकेनान्वयः इदंचस्वसंवेद्यलक्षणमतःकेनचन्नदीय
रागद्वेषाभावादिकमन्यस्यप्रत्यक्षमस्ति २२ ॥

अस्तमवैजयंतीटीका ४

यद्यपिस्थितप्रज्ञस्यकाभाषेत्यादिनेदंपृष्टंप्रजहातियदाकामा
नित्यादिनोत्तरितंचतथापिविशेषजिज्ञासयापुनःपृच्छतीतिविज्ञाय
विधांतरेणतस्यलक्षणादीन् श्रीभगवानुवाच पंचभिःतत्रैके
नतल्लक्षणंस्वसंवेद्यमाह प्रकाशंचेति हेपांडवप्रकाशंसत्वगुणका
र्यंप्रवृत्तिंरजोगुणकार्यंमोहं तमोगुणकार्यं उपलक्षणमेत
त्सर्वाण्यपिगुणकार्याणिसंप्रवृत्तानिउत्पादकसामग्रीवशात्सं
प्राप्तानिदुःखरूपाण्यपिदुःखबुद्ध्यायोनद्वेष्टिनिवृत्तानिविनाश
कसामग्रीवशाद्विनष्टानितानिसुखरूपाण्यपिसुखबुद्ध्यानकां
क्षतिएतादृशोरागद्वेषशून्यलक्षणवान्यःसगुणातीतउच्यतेइ
तिचतुर्थेनान्वयःस्वगतौद्वेषतदभावौरागतदभावौचपरैर्वेदि
तुंनार्हतितत्स्वयंवेद्यस्यलक्षणम् २२ ॥

मधुसूदनीटीका ४

सत्वकार्यंप्रकाशंप्रवृत्तिंचरजःकार्यंमोहंचतमःकार्यंउपलक्ष
णमेतत् सर्वाण्यपिगुणकार्याणियथायथंसंप्रवृत्तानिस्वसाम

श्री॰ गी॰ टी॰ चं

ग्रीवशादुद्भूतानि संति दुःखरूपाण्यपि दुःखबुद्ध्या यो न द्वेष्टि त
थाविनाशसामग्रीवशान्निवृत्तानि तानि सुखरूपाण्यपि संति सु
खबुद्ध्या न कांक्षति न कामयति स्वप्नवन्मिथ्यात्वनिश्चयात् एता
दृशो रागद्वेषशून्यो यः स गुणातीत उच्यते इति चतुर्थश्लोकगते
नान्वयः इदं च स्वात्मप्रत्यक्षलक्षणं स्वार्थमेव न परार्थं न हि स्वाश्रि
तौ रागतदभावौ द्वेषतदभावौ च परः प्रत्येतुमर्हति

२२ ॥

सदानंदीटीका १

स्थितप्रज्ञस्य कर्मौघ एतदंतं मयोत्तरं भूयोपि भक्तस्मानेयं प्रका
रांतरमर्जुनः १ एकत्वं तमवधार्याह हरिः पंचभिरुत्तरं यैर्लिंगैः
स्याद्गुणातीतस्तानि ते कथयाम्यहं २ प्रकाशः सत्वकार्यं च प्रवृ
त्तिं राजसीं तथा तमःकार्यं तथा मोहमेतत्सर्वोपलक्षणं सर्वा
णि गुणकार्याणि प्रवृत्तानि यथा यथं ३ उद्भूतानि स्वसामग्रीवशा
द् दुःखात्मकान्यपि न द्वेष्टि दुःखबुद्ध्या यः सम्यग्द्रष्टृत्वनिश्चया
न्निवृत्तानि तथा नाशसामग्रीवशात् स्वयं संत्यपि सुखरूपाणि
सुखबुद्ध्या न कांक्षति स्वप्नवद्दृष्टनष्टत्वनिश्चयाद्दीर्घशो बुधः ४
रागद्वेषाद्यनाक्रांतः स गुणातीत उच्यते इदं चिह्नं स्वसंवेद्यं स्वा
र्थमेवास्ति लक्षणं ५ न त्वमोमाश्रितो रागद्वेषौ वेत्ति न तत्त्वयं २२

नीलकंठीटीका २

तत्राद्यस्योत्तरमाह प्रकाशमिति प्रकाशप्रवृत्तिमोहाः सत्वरजस्तम
सां कार्याणि जाग्रदवस्थायां तानि सम्यक्प्रवृत्तानि सामान्येन दुः
खं तान्संप्रवृत्तान् न द्वेष्टि नापि समाध्यवस्थायां तानि निवृत्तानि
संति कांक्षति सोयं नित्यसमाधिस्थो ब्रह्मविद्वरिष्ठः यं प्रकृत्य श्रीभा
गवते स्मर्यते देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति इति य
त्र वासिष्ठे सप्तयोगभूमय उक्ताः ज्ञानभूमिः शुभेच्छाख्या प्रथमा सम
दाहृता विचारणा द्वितीया तु तृतीया तनुमानसा सत्वापत्तिश्चतुर्थी

स्यात्ततोः संसक्तिनामिका पदार्थाभावनी षष्ठी सप्तमी तुर्यगाख्येति
तत्र यथोक्तसाधनसंपन्नमुमुक्षु तासु प्रथमा श्रवणमननात्मविचार
त्मिका द्वितीया निदिध्यासनरूपा तृतीया एताः साधनभूमयः सत्वा
पत्तिर्ब्रह्मसाक्षात्काररूपा चतुर्थी फलभूता यस्यां योगी कृतार्थोपि जी
वन्मुक्तिसुखविशेषं कालेनानुभवति पराभ्यस्तिस्रो जीवन्मुक्तेरवांतरभेदाः
तत्रापि पंचम्यां भूमौ स्वयं स्थितः स्वयमेव व्युत्तिष्ठति षष्ठ्यां परप्रयत्ने
न सप्तम्यां तु न स्वतः परतो वा व्युत्तिष्ठति सोयं नित्यसमाधिस्थः प्रका
शमित्यनेन श्लोकेनोक्तः २२ ॥

आनंदीटीका १३

श्रोतारं श्रीभगवानुवाच एतद्गुणातीतलिंगमित्यर्थः [illegible] २२

[illegible] २१

रामकंठीटीका ४

स एवंविधः श्लोकचतुष्टयप्रतिपाद्यविशेषविशिष्टो गुणातीत उ
च्यते इति संबंधः को सौ य एतानि वस्तूनि संप्रवृत्तानि सम्यगभिव्य
क्तानि संति न द्वेष्टि समाधिविपर्ययत्वान्न द्वेष्टीति न भजते इत्यर्थः
तथा निवृत्तानि अलब्धवृत्तयश्चैव न भवंति तानि न प्रार्थयते इत्यर्थः
कानि तानीत्याह प्रकाशं सत्वगुणस्य विवृद्ध्याभिव्यक्तं ज्ञानादि
रूपं लिंगं [illegible] तथा प्रवृत्तिं रजोगुणस्य तथाविधं क्रिया
त्मकं लिंगम् तथा मोहं तमोगुणस्य तादृशमेवाज्ञानात्मकं लिं
गमित्येतेषु सत्वादिगुणवृद्धिचिह्नभूतेषु वस्तुषु प्रवृत्तिहेतुषु
वा नित्यनिर्विकारस्वरूपप्रतिष्ठत्वाद्यो रागद्वेषाभ्यां मनागपि न
तीं क्रियते स गुणातीत उच्यत इत्येतन्मया त्वं गुणातीतस्य किं लिंगम् एत
त्प्रोक्तं वक्ष्यमाणं च द्वितीये स्थिरप्रज्ञत्वलक्षणकथनप्रसंगेन
प्रतिपादितमिह व्याख्यानवर्जनीयम् ननु प्रवृत्तिमोहौ प्रवृत्तौ सं
तौ रजस्तमोवृद्धिलिंगभूतौ द्विष्टौ भवतां नाम योगिनः प्रकाश
स्तु सत्ववृद्धिलिंगभूतः प्रवृत्तः सकस्य द्विष्टो भवेत् येनोक्तं

श्री॰ गी॰ टी॰ च

85

प्रकाशंप्रवृत्तंयोनद्वेष्टिसगुणातीतइत्युच्यते इहाभ्यासयोगिने
रजस्तमोलिंगवत्सत्वलिंगमपिप्रकाशात्मकंप्रवृत्तंनिषिध्यत्वा
द्विष्टंभवति तथाचपातंजलेचितिशक्तिस्वरूपमुक्ता सत्वगुणा
त्मिकाचेयमतोविवेकविपरीतख्यातिरित्यनन्तस्याविरक्तंचित्त
तामपिख्यातिंनिरुणद्धीत्युक्तम् कर्मयोगिनस्तुगुणातीतदशा
यितृफलस्यविशेषायमुक्तः यत्प्रकाशमपिप्रवृत्तंनद्वेष्टिनचतस्य
निवृत्तिमभिकांक्षति तथाहिसतिद्वेषरागानुषंगाद्गुणातीतताना
घटते तेनविशुद्धस्वभावात्मज्ञानसंविदः प्रकाशादीनिप्रवृत्तानिनि
वृत्तानिवाहेयतयोपादेयतयावायस्यद्वेषरागौनोद्भावयतःसगुणा
तीतउच्यतेतदेतद्गुणातीतलिंगमित्यर्थः २२

त्नासिकी टीका १५

प्रकाशंसत्वकार्यम् प्रवृत्तिः रजःकार्यम् मोहस्तमःकार्यम् उ
पलक्षणंचैतत् सर्वाण्यपिगुणकार्याणियथायथंसंप्रवृत्तान्यभि
व्यक्तानिसन्ति दोषबुद्ध्यानद्वेष्टि निवृत्तानिविलीनानिगुणबुद्ध्या
योनकांक्षति सगुणातीतउच्यतइतिचतुर्थेनान्वयः २२

पंचोलीटीका

द्वितीयेस्थितप्रज्ञस्यकाभाषेत्यादिनापृष्टेप्रजहातियदेत्यादि
नादत्तोत्तरमपिपुनर्विशेषबुभुत्सयापृच्छतीतिज्ञात्वाप्रका-
रांतरेणतस्यलक्षणादिकमाहभगवान् प्रकाशमित्यादिसप्त
भिः तावत्कैर्लिंगैर्गुणातीतोभवतितस्योत्तरंप्रकाशंचेति हे-
पांडवप्रकाशंसत्वस्यकार्यंप्रवृत्तिंरजसःकार्यंमोहंतमसः
कार्यंएतानित्रीणिसत्वादिकार्याणिसंप्रवृत्तानिनद्वेष्टिनिवृ-
त्तानिअप्राप्तानिनकांक्षति २२

प्रकारांतरेण तल्लक्षणादिकं श्रीभगवानुवाच प्रकाशं चेति
प्रकाशं सत्त्वकार्यं प्रवृत्तिं रजःकार्यं मोहं तमःकार्यं उपलक्षण
मेतत्सर्वाणि गुणकार्याणि यथायथं संप्रवृत्तानि स्वयमेवो
पस्थितानि दुःखबुद्ध्या न द्वेष्टि निवृत्तानि सुखबुद्ध्या पुनर्न कां
क्षति न कामयते यो गुणातीतः स उच्यते इति वक्ष्यमाणश्लोकेना
न्वयः ॥२२॥

मधुभाष्य

॥२२॥

86

भाषा अनुवाद

स्थित प्रज्ञस्यका भाषा यह दूसरे अध्यायके चौविस पचीस श्लो
क आदि से यही बात अर्जुन ने पूछाभी था और उस का उत्तर
भी भगवान दे चुके हैं तो भी फेरि विशेष रूप से जानने की इ
च्छासे अर्जुन पूछते हैं यह विचार करिके भगवान दूसरे प्रका
रसे उन का लक्षण आदि इस श्लोकसे लेकर छः श्लोकसे क
हते हैं औ उन के बीच यह एक श्लोक के द्वारा उन के लक्षण
जनावते हैं कि सत्व आदि गुणोंका उपलक्ष करिके कहा जो
प्रकाश अर्थात् सर्व द्वारेषु देहेऽस्मिन् यह इस अध्याय के ए
कादश श्लोकसे कहा जो सतो गुण का कार्य और प्रवृत्ति जो
रजोगुण का कार्य तथा मोहादि जो तमो गुणका कार्य ये
समस्त कार्य यथाक्रमसे आप से प्रवृत्त होने पर उलव विचा
रि के जो पुरुष द्वेष हेत से औ निवृत्ति होने से सव जानि इच्छा
नकरै सोई गुणातीत मनुष्य है यह जानो। २२।

दोहा

प्रकाशादि औरु प्रवृतिजु मोहादि पांडवजोय आपहि द्वेषन
करतहै जातनकांक्षे सोय २२॥

87

[illegible]

[illegible]

[illegible]

उदासीनवदासीनो गुणैर्यो न विचाल्यते गुणा वर्तंत इत्येवं योवतिष्ठति नेंगते २३ ॥

शांकरभाष्यटीका १

एतत्त्वं पृष्टवान् लिंगं किं न हि स्वात्मप्रत्यक्षत्वादात्मविषयमेव एतत् लक्षणं न हि स्वात्मविषयं द्वेषं आकांक्षां वा परः पश्यति । अथेदानीं गुणातीतः किमाचार इति प्रश्नस्य प्रतिवचनमाह उदासीनेति । उदासीनवद्यथोदासीनो न कस्यचित् पक्षं भजते न तथायं गुणातीतत्वोपायमार्गेवस्थित आसीन आत्मविद्यागुणैर्यः समासीनः विचाल्यते विवेकदर्शनावस्थातः तदेतत् स्फुटीकरोति गुणाः कार्यकारणविषयाकारपरिणता अन्योन्यस्मिन् वर्तंत इति योवतिष्ठति छंदोभंगभयात् परस्मैपदप्रयोगः योनुतिष्ठतीति पाठांतरे नेंगते न चलति स्वरूपावस्थ एव भवतीत्यर्थः । २३ ।

आनंदगिरिकृतटीका २

स्वानुभवसिद्धं गुणातीतस्य लक्षणमुक्तमित्याह एतत्त्वेति । परप्रत्यक्षत्वाभावं प्रपंचयति नहीति । आश्रयो विषयः । केर्लिंगैरित्यादि प्रश्नं परिहृत्य द्वितीयं प्रश्नं परिहरति अथेति । दृष्टान्तं व्याचष्टे यथेति । उपेक्षकस्य पक्षपातत्वायोगादित्यर्थः आत्मविदात्मनः कौटस्थ्यज्ञानेनासीनो निवृत्तकर्तृत्वाभिमानो प्रयतमानो भवतीति दार्ष्टान्तिकमाह तथेति गुणातीतत्वोपायमार्गे ज्ञानमेव शब्दादिभिर्विषयैरस्य कूटस्थत्वज्ञानात् प्रच्यावनमाशंक्याह गुणैरिति उपनतानां विषयाणां रागद्वेषद्वारा प्रवर्तकत्वमित्येतत् प्रपंचयति तदेतदिति योवतिष्ठति स गुणातीत इत्युत्तरत्र संबंधः । अवपूर्वस्य तिष्ठतेरात्मनेपदे प्रयोक्तव्ये कथं परस्मैपदमित्याशंक्याह छंदोभंगेति पाठान्तरे तु वाधितानुवृत्तिमात्रमनुष्ठानं करणाकारपरिणतानां गुणानां विषयाकारपरिणतेषु तेषु प्रवृत्तिर्न ममेति पश्यन् अचलतया कूटस्थदृष्टिमात्मनो न जहातीत्याह नेंगत इति २३ ।

स्वामिकृतटीका ३

तदेवंस्वसंवेद्यंतस्यलक्षणमुक्त्वा परसंवेद्यंतस्यलक्षणंवक्तुंकिमाचार
इतिद्वितीयप्रश्नस्योत्तरमाह उदासीनवदितित्रिभिः उदासीनवत्सा
क्षितयाआसीनः स्थितः सन्गुणैर्गुणकार्यैः सुखदुःखादिभिर्योनवि
चाल्यतेस्वरूपान्नप्रच्याव्यते अपितुगुणाएवस्वकार्येषुवर्तंते एतैर्मम
संबंधएवनास्तीतिविवेकज्ञानेनयस्तूष्णीमेवावतिष्ठति स्थितोभवति
परस्मैपदमार्षंनेंगतेनचलति २२ [illegible]

पिशाचभाष्यटीका ४

उदासीनेति नेंगतेनचाल्यतेकार्यकारणसंघातविषयरूपपरिणतागु ए
णेषुवर्तंतइतियोवतिष्ठतियः प्रतिपद्यतेसनचलति २२ ॥

रामानुजभाष्यटीका ५

उदासीनेति उदासीनः गुणव्यतिरिक्तात्मावलोकनतृप्तोन्यत्र उदासी
नोगुणैर्द्वेषाकांक्षाद्वारेणयोनविचाल्यते गुणाः स्वेषुकार्येषुप्रकाशादि
षुवर्तंतइत्यनुसंधाययस्तूष्णीमवतिष्ठते नेंगतेनगुणकार्यानुगुणंचे
ष्टते २२

स्पष्टार्थं २२

अभिनवगुप्तटीका ६ (परमार्थप्रपाटी ७)

तदेवंस्वसंबंधस्यलक्षणमुक्त्वाकिमाचारइतिद्वितीयप्रश्नस्योत्तरमाह
उदासीनवदितित्रिभिः उदासीनवत्साक्षितयानर्[illegible]वदासीनः स्थि स्थ
तः गुणैर्गुणकार्यैःसुखदुःखादिभिर्योनविचाल्यते अपितुगुणाएव
स्वकार्येषुवर्तंतेएतैर्ममसंबंधोनास्तीतिविवेकेनयस्तूष्णीमवतिष्ठ
तीतिपरस्मैपदमार्षंनेंगतेनचलति २२ ॥

वनमालीटीका ८

लक्षणमुक्त्वाचारमाह उदासीवदितित्रिभिः यथोदासीनोद्वयोर्विवद
मानयोः कस्यचित्पक्षमभजमानोनरज्यतिनवाद्वेष्टितथायमात्मतत्ववि
त् रागद्वेषशून्यतयासीनोज्ञातभगवदपरोक्षोगुणैः सुखदुःखाद्याका
रपरिणतैर्योनविचाल्यते निष्ठातोनप्रच्याव्यते किंतुगुणाएवेतेईश्वर
प्रेरितादेहेंद्रियविषयाकारपरिणताः परस्परस्मिन्वर्ततेनाहमचिदानंद
घनस्वरूपप्रभोअंतविलक्षणः सदेकाकारः एतेनजडस्वरूपाविकारिण

ऽप्येवंनिश्चित्यात्मन्येवतिष्ठतिवतिष्ठतेनेंगतेनतद्रागादिप्रयुक्तः सन्
गुणाद्यनुसारेणचेष्टतेव्यापारंकरोति गुणातीतः सउच्यतइतितृती
येनान्वयः २३ ॥

ऊलसवैजयंतीटीका ९

एवंस्वसंवेद्यलक्षणस्यप्रथमप्रश्नस्योत्तरमुक्त्वेदानींकिमाचार
इतिद्वितीयप्रश्नस्योत्तरंपरसंवेद्यलक्षणमाह उदासीनेतित्रिभिः
उदासीनवदिति उदासीनउदासीनेर्यथोदासीनोविवदमानयोर्द्वयोः
कस्यचित्पक्षमभजमानोनरज्यतेनचद्वेष्टितथायमात्मविद्रागद्वेष
रहिततयासान्नुभावानंदैकरसः स्वस्वरूपएवस्थितः सन्गुणैःसु
खदुःखादिभावेनपरिणतैरनात्मभूतैर्योनविचाल्यतेस्वरूपान्नप्र
चाल्यतेकिंतुगुणाःसत्वादयःस्वकार्येषुप्रकाशप्रवृत्तिप्रमादादि
षुवर्त्ततेममतैःकदापिनसंबंधइत्येवंनिश्चित्ययस्तूष्णीमेवावतिष्ठ
तेनेंगतेगुणकार्यानुरूपेणनचेष्टतेगुणातीतस्सउच्यते इतितृ
तीयेनान्वयः २३ ॥

+ एवंलक्षणश्चक्राशुणातीतःकिमाचारइति द्वितीयप्रश्नस्यप्रतिवचनमाहत्रिभिः ॥

मधुसूदनीटीका १०

+ यथोदासीनोद्वयोर्विवदमानयोःकस्यचित्पक्षमभजमानोनरज्य
तिनवाद्वेष्टि तथा यमात्मविद्रागद्वेषशून्यतयास्वस्वरूपएवासीनो
गुणैःसुखदुःखाद्याकारपरिणतैर्योनविचाल्यतेनप्रच्याव्यते स्वरू
पावस्थानात् किंतुगुणाएवैतेदेहेंद्रियविषयाकारपरिणताःपर
स्परस्मिन्वर्त्ततेममत्वादिस्तस्यैवेतस्सर्वभासकस्यनकेनापिभास्य
धर्मेणसंबंधःस्वप्नवन्मायामात्रत्वाद्भास्यप्रपंचोजडःस्वयंज्योतिः
स्वभावस्तत्वंपरमार्थसत्योनिर्विकारद्वैतनमस्यच्छेत्येवंनिश्चित्य
यःस्वरूपएवनिश्चलोवतिष्ठते योनुतिष्ठतीति [illegible]पाठः तत्र
एवकार्यःनेंगतेनव्याप्रियतेऽतश्चलितः गुणातीतःसउच्यतइतितृ
तीयगतेनान्वयः २३ ॥

सदानंदीटीका ११

एवंतल्लक्षणंप्रोच्यतदाचारोधुनोच्यते यथाकश्चिदुदासीनोद्व
योर्विविदमानयोः अभजन्कस्यचित्पक्षंनवाद्वेष्टिनरज्यते तथाय

मात्मविद्यारागद्वेषशून्यतयात्मनि २ आसीनोनगुणैः दुःखसुखा
द्याकारतांगतैः स्वात्मावस्थानतोमोहस्वरूपाच्चाल्यतेणवपि ३
देहेंद्रियादिरूपेणगुणाः परिणताअमी परस्परस्मिन्वर्ततेममतेषां
नकेनचित् ४ आदित्यस्येवसर्वावभासकस्यगुणैर्नवा दोषणैर्वा
स्तिसंबंधः खपुष्पवत्कल्पितेनच ५ स्वयंज्योतिःस्वभावोहंनिर्विकारो
च्युतोमलः प्रपंचोयंजडोमिथ्याभास्यः स्वात्मप्रपंचवत् ६ यइत्थ
वंविनिश्चित्यस्वस्वरूपेवतिष्ठते नतच्चाल्यते किंचिद्गुणातीतः
सउच्यते २३ ॥

नीलकंठीटीका १२

अथषष्ठ्यापदार्थाभावभूमिंगतोब्रह्मविदरीयानुच्यते उदासीनव
दिति योयंसमाधौउदासीनइवास्तेव्युत्थानेकिमपिप्रयोजनमपश्य
न् इदंममकर्तव्यमस्तीतिवासनाशून्यत्वात् यश्चास्तेएववनतुपरप्र
यत्नमंतरेणकदाचिदपिगुणैर्विचाल्यते परेणव्युत्थापितोपिगु
णानपश्यन्गुणावर्ततइत्येवज्ञात्वायोवतिष्ठतिस्वव्यपववर्ततेन
नगुणकृतैर्दृष्टानिष्टस्पर्शैः इंगतेचलति अयमर्थः यथाकश्चिद्दं
जानोरसनांमौख्यात्स्वयंशाकादिरसंनवेदति परेणज्ञापितोपि
कंचिद्रसविशेषमनुपलभ्यापिनत्वोदासीनएवास्ते कटिस्थवविशेषद
र्शनस्यतिरोधानान्ननत्कृतंसुखंदुःखंवापश्यतितद्वदयंज्ञेयः २३

आनंदटीका १३

किमाचारइत्याह॥
उदासीनवत् नष्टस्यइवासीनः स्थितःस्थितः योगुणैः प्रहृष्टैर्वानि
हृष्टैर्वानविचाल्यतेविकारंनप्राप्यतेयः गुणावर्ततइत्येवज्ञः अयं
प्रकाशादिर्गुणानामेवस्वभावोममतुनकिंचिदेभिरितिजानं
स्तिष्ठतिस्वात्मन्येवस्थितिंभजतेनेंगतेएतेषांप्रहृष्टैर्वानिहृ
ष्टैर्वानचेष्टते इतिगुणातीतस्याचारः २३ ॥

रामकंठीटीका १४

तस्यलिंगांतरमाह उदासीनवदासीनइत्यादि योगुणैः प्रहृष्टै
र्निहृष्टैर्वानविचाल्यतेस्वरूपात्प्रच्यावतेसगुणातीतइतिस्व

पः अतो न विचाल्यते इति हेतुगर्भं विशेषणमाह उदासीनवदासी
न इति यः परस्य सुखदुःखेषु वर्तमानेनेनाभिभूतचित्ता
त्वस्यानिर्विकारस्तटस्थ एव पश्यति स उदासीन इत्युच्यते तेनत
त्वं स एव प्रकाशादिप्रवृत्तिनिवृत्त्योः परकीययोरिव निर्विकार
एवासीनः स्वरूपविश्रान्तो न एव ये गुणा वर्तन्ते प्रवृत्तिमनुभव
न्तीति एतावत्तिज्ञो वोदासीनस्तिष्ठति स्वस्थितिं भजते ः न एवनेंगते
न स्वरूपाच्चलति स गुणातीत उच्यते तदस्य लिंगमित्यर्थः एते
नैकैर्लिंगैर्गुणातीतो भवतीत्याशयेनोत्तरमाक्रमम् २३ ॥

लासिकी [illegible]टीका १५

तथा गुणकार्यैः सुखादिभिः प्रवृत्तैर्निवृत्तैर्वा यो न विचाल्यते स्वस्वरूपा
न्न प्रच्याव्यते यत उदासीनवत्तटस्थवत्साक्षितयासीनः स्वरूप
विश्रान्तः औदासीन्यमेवाह गुणा वर्तन्त एव स्वप्रवृत्तिं भजन्त एवे
ति योऽवतिष्ठति स्वस्वभावे सुस्थिरः अत एव नेङ्गते स्वरूपान्नचल
ति एभिर्लिंगैः स्वसंवेद्यैरुपलक्षितो यः स गुणातीत उच्यते
[illegible] २३ ॥

पंचोलीटीका

तस्य लक्षणमुक्त्वा किमाचार इति द्वितीयप्रश्नस्योत्तरमाह उदा
सीन इति यः संन्यासी उदासीनवत् यथोदासीनः कस्यचित्प
क्षं न भजते तद्वदासीनः गुणातीतत्वोपायमार्गेऽवस्थितो गु
णैः न विचाल्यते गुणा देहेन्द्रियविषयाद्याकारपरिणताः अ
न्योन्यस्मिन् प्रवर्तन्ते न तु निर्विकार आत्मेति इति योऽवतिष्ठते सो
नेङ्गते न चलति २३

रणवीरसमिद्धोधिनी ॥

किमाचार इति द्वितीयप्रश्नस्योत्तरमाह उदासीनेति यथोदा

सीनोविवदमानयोर्द्वयोः कस्यचित्पक्षमभजमानो नरज्यते
नवाद्वेष्टि तथायोरागद्वेषराहित्येन स्वस्वरूप एवासीनो गुणै
र्गुणकार्यैः सुखदुःखादिभिर्यो न विचाल्यते स्वरूपान्नच्यवते
अपितुगुणा एव स्वकार्येषुवर्तन्ते एतैर्ममसंबंधो नास्तीति
विवेकज्ञानेनयो वस्तुतस्तूष्णीमेवावतिष्ठते नेंगते न चलती
ति २३॥

मधुभाष्य

२३॥

भाषा अनुवाद

उक्त रूप अनायास बोधसे गम्य जो गुणातीत के लक्षण सो कहि गुणातीत का आचरण कैसा है इस दूसरे प्रश्न का उत्तर तीन श्लोक से कहते हैं कि उदासीन के समान साक्षी रूप स्थित हो के सत्व आदिगुण के कार्य सुख दुख आदिसे जो मनुष्य अविचलित है अर्थात् अपने द्रष्टा स्वरूप से च्युत न होय वल सत्वादि गुण अपने अपने काम से वर्तमान है इन से हमसे कुछ भी संबंध नहीं है ऐसे विवेक ज्ञानसे जो पुरुष चुपचाप मौन होय स्थित रहे औ इस वातसे विचलित नहोय सो गुणातीत है। २३॥

दोहा

उदासीन ज्यों रहत है गुणसें चलहि न जाय गुणहि वर्ते
इद मति चलें न स्थित होय सोय २३॥

समदुःखसुखः स्वस्थः समलोष्टाश्मकां
चनः तुल्यप्रियाप्रियोधीरस्तुल्यनिंदात्म
संस्तुतिः २४ ॥

शांकरभाष्यटीका १

किंच समदुःखेति। समदुःखसुखः समे दुःखसुखे यस्य
स समदुःखसुखः स्वस्थः स्वात्मनि स्थितः प्रसन्नः अविक्रियः
समलोष्टाश्मकांचनः लोष्टंच अश्म च कांचनंच समानि यस्य
स समलोष्टाश्मकांचनः तुल्यप्रियाप्रियः प्रियंचाप्रियंच प्रिया
प्रिये समे यस्य सोयं तुल्यप्रियाप्रियोधीरोधीमान् तुल्यनिंदात्म
संस्तुतिः निंदाच आत्मसंस्तुतिश्च तुल्ये निंदात्मसंस्तुती यस्य
यतेः स तुल्यनिंदात्मसंस्तुतिः। २४ ॥

आनंदगिरिकृतटीका २

गुणातीतस्य लिंगान्तरमाह किंचेति। तयोः समत्वं रागद्वेषानु
त्पादकतया स्वकीयत्वाभिमाना[भावा]स्य दत्वं प्रसन्नत्वंस्वास्थ्याद
प्रच्युतिरविक्रियत्वं विदुदृष्ट्या प्रियाप्रिययोरसंभवेपि लोकदृ
ष्टिमाश्रित्याह प्रियंचेति। प्रियाप्रियग्रहणेन गृहीतानां कांच
नादीनां ब्राह्मणपरिव्राजकवत् पृथक्ग्रहणं निंदादोषोक्तिरा
त्मनो गुणकीर्तनं। २४।

स्वामिकृतटीका ३

अपिच समदुःखेति समेसुखदुःखेयस्ययतः स्वस्थः स्वरूपएव
स्थितः अतएवसमानिलोष्टाश्मकांचनानियस्य तुल्येप्रियाप्रिये
सुखदुःखहेतुभूते यस्य धीरोधीमान् तुल्येनिंदाचआत्मसंस्तुति
श्चयस्यसः २४ ॥

पिशाचभाष्यटीका ४

स्वस्मिन्नात्मनितिष्ठतीतिस्वस्थः धीरःधीमान् २४ ॥ ॥

रामानुजभाष्यटीका ५ ॥

श्री॰ गी॰टी॰ चं

९२

समइति मानापमानयोरिति समेदुःखसुखयोः समचित्तः स्वस्थः स्वस्थितस्वात्मैकप्रियत्वेन तद्व्यतिरिक्तपुत्रजन्ममरणादिसुखदुःखयोः समचित्त इत्यर्थः ततएव समलोष्टाश्मकांचनः ततएवचतुल्यप्रियाप्रियः तुल्यप्रियाप्रियविषयः धीरः प्रकृत्यात्मविवेककुशलः ततएवचतुल्यनिंदात्मसंस्तुतिः आत्मनि मनुष्यत्वाद्यभिमानकृतगुणागुणसंस्तुतिनिंदयोः स्वासंबंधेन तुल्यचित्तः ॥ २४

अभिनवगुप्तकृतटीका ६

स्पष्टोर्थः २४ ॥ ॥

परमार्थप्रपाटीका ७

अपिच मानापमानयोस्तुल्यइति सर्वोनदृष्टांतदृष्टान्तानांतं सानुय [illegible] समदुःखसुखेति समेसुखदुःखे यस्य यतः स्वस्थः स्वरूपएवस्थितः समानि लोष्टकांचनानि यस्य शेषं स्पष्टं २४ ॥

वनमालीटीका ८

समेदुःखसुखे द्वेषरागशून्यतया यस्य समदुःखसुखः कस्मादेवं यतः स्वस्थः स्वीयपरमानंदरूपे अपरोक्षीकृते भगवति स्थितः भगवत्प्रसादेनाविर्भूतपरमानंदस्वस्वरूपे वा स्थितः अतएव समानि हेयोपादेयभावरहितानि लोष्टाश्मकांचनानि यस्य तथा लोष्टा स्तत्विंदुः अतएव तुल्ये प्रियाप्रिये सुखदुःखसाधने यस्य हितसाधनत्वाहितसाधनत्वबुद्धिविषयत्वाभावेनोपेक्षणीयत्वात् धीरो धीमान् धृतिमान्वा अतएव तुल्ये निंदात्मसंस्तुती दोषकीर्तनगुणकी॰सगुण र्तने यस्य स तीत उच्यत इति द्वितीयेनान्वयः २४

जसमवैजयंतीटीका ९ ॥

किंच समदुःखसुख इति यतो यमात्मवित्स्वस्थः स्वस्मिन्नेव स्वरूपे स्थितो ऽतएव समदुःखसुखः समे अनात्मधर्मत्वात्तुल्ये दुःखसुखे यस्य सः स्वात्मैकप्रियत्वेन तद्व्यतिरिक्तपुत्रादिजन्ममरणादिरूपयोरिष्टानिष्टलाभहानिरूपयोर्वा दुःखसुखयोः समचित्त इत्यर्थः अतएव समलोष्टाश्मकांचनः समानि हेयोपादेयभावरहिता

॰यो

तिलोष्टाश्मकांचनानि यस्य स तथा लोष्टाश्मकांचनः तुल्यप्रियाप्रियः
तुल्ये प्रियाप्रिये सुखदुःखसाधने अनेवस्तुनी यस्य स तथा धीरः प्र
कृतिपुरुषविवेककुशलः अत एव तुल्यनिंदात्मसंस्तुतिः तुल्ये
निंदात्मसंस्तुती यस्य स तथा आत्मनि मनुष्यत्वाद्यभिमानकृतयो
र्गुणनगुणयोस्तुतिनिंदयोः स्वात्मसंबंधानुसंधानेन तुल्यचित्त इत्य
र्थः य ईदृशो गुणातीतस्स उच्यते इति द्वितीयेनान्वयः २४ ॥

मधुसूदनीटीका ९

समदुःखसुखः रागद्वेषशून्यतयानात्मधर्मतयाऽनन्तनयाच यस्य स स
मदुःखसुखः कस्मादेवं यस्मात्स्वस्थः स्वस्मिन्नात्मन्येव स्थितः द्वैतदर्श
नशून्यत्वात् अत एव समानि हेयोपादेयभावरहितानि लोष्टाश्मकां
चनानि यस्य स लोष्टः पांसुपिंडः अत एव च तुल्ये प्रियाप्रिये सु
खदुःखसाधने यस्य हितसाधनत्वाहितसाधनत्वबुद्धिविषयत्वाभा
वेनोपेक्षणीयत्वात् धीरः धीमान् धृतिमान्वा अत एव तुल्ये निंदात्म
संस्तुती दोषकीर्तनगुणकीर्तने यस्य स गुणातीत उच्यत इति द्वितीय
गतेनान्वयः २४ ॥

सदानंदीटीका ११

समदुःखसुखः यस्यानात्मधर्मतयान्ते द्वैतदर्शनशून्यत्वात्स्वस्मिन्ने
व स्थितोयतः १ हेयादेयत्वशून्यानि लोष्टाश्मादीनि यस्य सः तुल्य
प्रियाप्रिये यस्य साधुने सुखदुःखयोः २ नवेक्षणीयभावेन हिताहि
क५ तविकल्पनाः यस्य धस्याग्रतो सौ स्याद्धीमान्धैर्ययुतोऽथवाः ३ अत एवा
त्मनस्तुल्ये निंदा सम्यक्स्तुती उभे यस्य दोषगुणादीनां सम्यग्बोधेन
बाधनात् ईदृशो ब्रह्मविद्धीरो गुणातीतः स उच्यते २४ ॥

नीलकंठीटीका १२ ॥

अथ पंचम्यां भूमावसंसक्तिनामिकायां स्थितो ब्रह्मविद्वर उच्यते समेति स
मार्धौ समदुःखसुखस्य स समदुःखसुखः स्वस्थः स्वे नैव स्वेच्छयैव तिष्ठती
ति स्वस्थः यदा तु न समाधाय विक्रांतदा स्वयमेव व्युत्तिष्ठतीति भावः सोपि
व्युत्थानावस्थायां समलोष्टाश्मकांचनो विरक्त इत्यर्थः तुल्यप्रियाप्रियः
तुल्यनिंदात्मसंस्तुतिश्च प्रियाप्रिययोर्निंदास्तुत्योश्च प्राप्तौ तुल्यो हर्षवि
षादशून्यः अत्र हेतुः धीर [illegible]

श्री॰ गी॰ टी॰ चं

93

इति यथाकश्चित्कुरत्नीभमहारवेदनाभोपिनव्याकुलतितिधैर्यात्वेदनांवा नुभवति नत्वदयंहर्षविषादावनुभवत्रपिधैर्यान्नचलति पूर्वस्यतुजा नायामपिवेदनायांहर्षाद्युदयएवनास्ति तत्पूर्वस्यतुवेदनैवनास्ती तिभेदः एतेनश्लोकत्रयेणसर्वेषांजीवन्मुक्तानांसमाधौलिंगानितत्स्व वेद्यानिआचारापरसंवेद्यानिलिंगान्युक्तानि ॥ २४ ॥

आनंदीटीका १३

अग्रिमश्लोक साहार्थं उक्ता २४ श्लोक ॥ ॥

रामकंठीटीका १४

किमाचारइत्यस्योत्तरमाह समदुःखेत्यादि सुखदुःखस्वभइतिसत्व रजस्तमोहन्नयउक्ताः समासविशेषेणनिरूप्यमाणत्वात्तुल्यासैय स्यसतथोक्तः नसुखेप्रीयतेनदुःखंद्वेष्टिनस्वप्रेमद्यतीत्येवंविधस्त स्यसमाचारः तत्त्यामित्रारिपक्षयोरित्येनदंतमनयादिशाकिमा चारइत्यस्योत्तरमेतत् २४ ॥

लासिकी ...टीका १५

१ अथपरमंवेद्यलक्षणरूपमाचारमाह ॥

१ समेत्रविशेषेणवेद्येदुःखसुखेयस्य यतःस्वस्थःस्वरूपस्थितः त थासमलोष्टाश्मकांचनः समानिहेयोपादेयबुद्धिशून्यानिलोष्टादी नियस्य तुल्यप्रियाप्रियेसुखदुःखहेतुभूतेयस्यसः हर्षविषाद रहितत्वात् ननुकिंजडभूतएवनेत्याह धीरोधीमान्कुशलः २४ ॥

पंचोलीटीका

समेति समदुःखसुखः समेदुःखसुखेयस्यसः स्वआत्मनिस्थि तः तत्प्रकृतौस्वस्थः समलोष्टाश्मकांचनः समानितुल्यानिलोष्टा श्मकांच[illegible]नानियस्यसः तुल्यप्रियाप्रियः तुल्येप्रियाप्रियेयस्य सधीरः धीमान्तुल्येआत्मनिंदास्तुतिर्यस्यसः २४

रणवीरसमिद्धोधिनी

समेति रागद्वेषशून्यतया समेतुल्येदुःखसुखेयस्य ससमदुःख सुखोयतःस्वस्थः स्वस्मिन्स्थितःस्वरूपएवावस्थितः समानिहेयोपा

देयवद्धितानि लोष्टाश्मकांचनानि अतएव तुल्यो प्रियाप्रियौ सु
खदुःखसाधने यस्य सोतएव तुल्यनिंदात्मसंस्तुतिस्तुल्ये निंदा
त्मसंस्तुती दोषगुणकीर्तने यस्य स गुणातीत उच्यते २४

मधुभाष्य

२४॥

94

भाषा अनुवाद

और जो मनुष्य सुख दुख से समान और माटी पाथर सोना आदि भी जिस के निकट समान हैं और सुख दुख के हेतु स्वरूप प्रिय अप्रिय विषय मे जिस की बुद्धि तुल्य है और धीर धीमान जो हैं तथा अपनी स्तुति औ निन्दा मे भी तुल्य बुद्धि हैं। २४ ॥

दोहा

समदुख है स्वस्थ है समरज स्वर्ण पषान तुल्य प्रिय अप्रिय धीर जो निंदस्तुति समान २४॥

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः
सर्वारंभपरित्यागी गुणातीतः स उच्यते २५

शांकरभाष्यटीका १

किंच मानापमानयोरिति । मानापमानयोस्तुल्यः समो निर्विकारः
तुल्यो मित्रारिपक्षयोः यद्यप्युदासीना भवंति केचित् स्वाभिप्राये
ण तथापि पराभिप्रायेण मित्रारिपक्षयोरिव भवंतीति अयं तु
ल्यो मित्रारिपक्षयोरित्याह सर्वारंभपरित्यागी दृष्टादृष्टार्थानि कर्माण्या
रभ्यंते इत्यारंभाः सर्वानारंभान् परित्यक्तुं शीलं यस्येति सर्वारंभ
परित्यागी देहधारणमात्रनिमित्तव्यतिरेकेण सर्वकर्मपरित्या
गीत्यर्थः गुणातीतः स उच्यते २५ ।

आनंदगिरिकृतटीका २

इतश्च गुणातीतः शक्यो ज्ञातुमित्याह किंचेति । मानः सत्कारस्तिर
स्कारोपमानः परदृष्ट्या यौ सखि शत्रू तयोः पक्षयोर्निर्विशेषो न
कस्यचित् पक्षे तिष्ठतीत्याह तुल्य इति विद्वेषो मित्रादिबुद्ध्यभावा
त्तुल्यो मित्रारिपक्षयोरित्ययुक्तमित्याशंक्याह यद्यपीति । सर्वकर्म
त्यागे देहधारणमपि निमित्ताभावान्न स्यादित्याशंक्याह देहेति
उक्तविशेषणो गुणातीतो ज्ञातव्य इत्याह गुणेति । २५ ॥

स्वामिकृतटीका ३

अपिच मानापमानयोरिति मानेवापमाने च तुल्यः मित्रपक्षे रिपुपक्षे
च तुल्यः सर्वान् दृष्टादृष्टार्थान् आरंभान् उद्यमान् परित्यक्तुं शीलं य
स्य स एवंभूतावारयुक्तो गुणातीत उच्यते २५ ॥

पैशाचभाष्यटीका ४

किंच मानापमानयोरिति देहेंद्रियविषयाकारपरिणतानः तीतो तिक्रां
तः तेषु निस्पृहः २५ ॥

रामानुजभाष्यटीका ५

प्रयुक्तमानापमानयोस्तत्त्वप्रयुक्तमित्रारिपक्षयोरपि तत्त्वसंबंधाभावा
देव तुल्यचित्तः तथा देहित्वप्रयुक्तसर्वारंभपरित्यागी य एवंभूतः स

गुणातीतउच्यते[२०] २५ ॥

अभिनवगुप्तकृतटीका ६

यद्यपिप्रकाशादिषुसर्वेषुधर्मेषुवर्ततेतथापियोगिनस्तेषुप्रकाशा
दिषुनरज्यते नद्वेषंवंतोभवंति अपितुकेवलंपिंडधर्मतयैतेस्थितान
मांक्षोभयितुमलमितिमत्वानातुगुणातीताभवंति अतएवाह यः
अहंतोनिर्विवेकास्तिष्ठतिसएवतु समग्ज्ञानात्‌ तथाहिवेगतेनस्व
रूपाच्यवते अवचोपायः सर्वेषामारंभाणांशारीरारंभकेंद्रियादिस्व
भावप्रयत्नवर्तनेनतत्फलंकिंचिदहमभिसंदधइतिस्थिरबुद्धिः
२५

परमार्थप्रपा टीका ७

अपिच मानापमानयोस्तुल्यइति सर्वान्‌दृष्टादृष्टानामारंभान्‌
प्रमानपित्यक्तशीलंयस्यतथाविधोगुणातीतउच्यते २५ ॥

वनमालीटीका ८

मानः सत्कारोपमानोसत्कारः आदरानादरौतयोस्तुल्योहर्षविषाद
शून्यः निंदास्तुतीशाह्यत्रपेमानापमानौतशाह्यविनापिकापमानोद्या
पारविशेषाविति भेदः तुल्योमित्रारिपक्षयोः मित्रपक्षेस्यवारिपक्ष
स्यापिद्वेषाविषयः मोक्षानुपयुक्तसर्वारंभान्‌त्यक्तुंशीलमस्यससर्वा
रंभपरित्यागी उदासीनवदासीनइत्यायुक्तानिलक्षणानिसाधकेन
यत्नादनुष्ठेयानिजीवन्मुक्तस्यायत्नसिद्धानिलक्षणत्वेनतिष्ठंती
तिविवेकः २५ ॥

उत्तमवैजयंतीटीका ९

किंच मानापमानयोरितिमानआदरापरपर्यायः सत्कारः अपमा
नोऽनादरापरपर्यायस्तिरस्कारस्तयोस्तुल्योहर्षविषादरहितः अत
एवतुल्योमित्रारिपक्षयोः मित्रपक्षस्यवारिपक्षस्यापिद्वेषाविषयः स्व
संबंधाभावादेवतुल्यचित्तः तयोरनुग्रहनिग्रहशून्यइत्यर्थः सर्वारं
भपरित्यागी आरभ्यतइत्यारंभाः कर्माणिसर्वाणितान्‌परित्यक्तुंशीलं
यस्यसतथादेहनिर्वाह मात्रवस्तुग्राहीत्यर्थः ईदृशोयस्मात्‌गुणा
तीतउच्यतेतस्मात्‌उपपत्तिवावहूकइत्यर्थः २५ ॥

मधुसूदनीटीका १०

मानः सत्कारश्चादरापरपर्यायः अपमानस्तिरस्कारोऽनादरः अप
रपर्यायः तयोस्तुल्यः हर्षविषादशून्यः निंदास्तुती शत्रुरूपे मानाप
मानौ तत्र शत्रुमित्रेरेणापि कायमनोव्यापारविशेषाविनिभेदः अत्र
पकारवकारयोः पाठविकल्पोऽर्थः स एव तुल्यो मित्रारिपक्षयोः
मित्रपक्षस्येवारिपक्षस्यापि द्वेषाविषयः स्वयं तयोरनुग्रहनिग्रह
शून्य इति वा सर्वारंभपरित्यागी आरभ्यंत इति आरंभाः कर्माणि
तान्सर्वान्परित्यक्तुंशीलं यस्य स तथा देहयात्रामात्रव्यतिरेकेण सर्व
कर्मपरित्यागीत्यर्थः उदासीनवदासीन इत्याद्युक्तप्रकारावोगु
णातीतः स उच्यते यदुक्तमुपत्तकत्वादितद्वियोदयात्सर्वं यत्नसा
ध्यंविद्याधिकारिणा साधनत्वेनानुष्ठेयमनुत्पन्नायां जीवन्मुक्तस्य
गुणातीतस्योक्तं धर्मजातमयत्नसिद्धं लक्षणत्वेन तिष्ठतीत्यर्थः ।
[illegible]
[illegible] २५ ॥

सदानंदीटीका ११

मानः सत्कार इत्युक्तः आदरापरनामकः अपमानस्तिरस्कारोना
द[illegible]रपरसंज्ञकः १ तयोर्हर्षविषादाभ्यामसंस्पृष्टतया समः निं
दास्तुती तच्छत्रुकस्वरूपे परिकीर्तिते २ शत्रुंविनापि व्यापारवि
शेषः कायचित्तयोः मानापमानाविस्पष्टा विनिर्भेदस्तयोर्द्वयोः
तुल्यो द्वेषघनाक्रांतो यस्तु मित्रारिपक्षयोः आरंभाः सर्वकर्माणि
त्यक्तुंशीलं च यस्य सः ४ देहयात्रार्थमेवास्य कर्माभासो न चापरं
यथोक्ताचारसंपन्नो गुणातीतः स उच्यते ५ यावदप्रयत्नसाध्यस्या
द्गुणातीतत्वसाधनं तावन्मुमुक्षुणा नित्यमनुष्ठेयमिहादरात्
उत्पन्नायां तु विद्यायां जीवन्मुक्तस्य सम्मते अयत्नसिद्धं तस्योक्तं
गुणातीतत्वलक्षणं २५ ॥

नीलकंठीटीका १२

अप्यचतन्ववर्ण्यो भूमौ सत्वापत्तिसंज्ञायां स्थितस्य योगिनः समाधिस
त्वाभावेन स्वसंवेद्यलिंगाभावात्तत्वनिश्चयेन द्वैतस्य बाधालिंगमा

श्री॰ गी॰ टी॰ चं

97

चारस्त्वपरसंवेद्यएवतदाह मानेति यथाहिपरीतकः कूटकार्षाप
णस्यलाभेविनाशेवाहर्षविषादशून्योनचतल्लाभार्थंयत्नमारभते
नफलस्तुताभ्योवाध्यतेनतल्लाभार्थंयत्नंचारभते एवंविद्वान्देहे
मरुमरीचिकाकल्पेसमानंपश्यन्नतत्रमानापमानयोर्वामित्रारिपक्ष
योर्वातुल्यएवनतत्परलाभायपरिहारायवायत्नमारभते अतो
गुणातीतइत्युच्यते सर्वत्रपदार्थःस्पष्टः २५

आनंदीटीका १३

प्रियंमनोज्ञंअप्रियममनोज्ञकम् मानःपूजावमानःपरिभवःआ
रभ्यंतइत्यारंभायज्ञादिकर्माणितेषांफलत्यागी [illegible]
[illegible] २५ ॥

रामकंठीटीका १४

कथंचैतान्गुणानतिवर्ततेइत्यस्योत्तरमाह सर्वेत्यादि सर्वेषामा
रंभाणांयज्ञतपोदानादिक्रियाविशेषाणामुद्यमानांनिरंशय ति
निजानंदनिर्भरनिर्भयस्वात्मोपासाप्रवणत्वात्फलस्यस्वर्गादि
भोगप्राप्तिलक्षणस्यत्यागीनिरभिसंधानत्वाद्वर्जयिताज्ञाननि
ष्ठेनफलाभिसंधिशून्यतया शास्त्रोक्तस्वकर्मानुष्ठानलक्षणो
विधिर्गुणातीतत्वप्राप्तिहेतुरित्यर्थः २५ ॥

लासिकी [illegible]टीका १५

तथा मानापमानयोर्मित्रारिपक्षयोश्चतुल्यः सर्वानारंभान्कर्माणि
परित्यक्तुंशीलंयस्यसः एवंभूताचारयुक्तोगुणातीतउच्यते
[illegible] ॥२५॥

पंचोलीटीका

मानापमानयोरिति यः मानापमानयोः समो निर्विकारः मि
त्रारिपक्षयोस्तुल्यः समः सर्वारंभपरित्यागदृष्टादृष्टार्थका
र्मारंभपरित्यागी सगुणातीतउच्यते २५

मानापमानेति मानेतथावमानेचतुल्योमित्रपक्षेरिपक्षेचतु
ल्यः सर्वारंभपरित्यागीसर्वान्दृष्टार्थानारंभान्धर्मान्परित्यक्तं
शीलंयस्य सएवंभूतावायुक्तोगुणातीतउच्यतेइति २५ (कथ
मेतान्गुणानतिवर्ततेइत्यस्यप्रश्नस्योत्तरमाह मां चेति चकारे
णावधारणार्थः मामेवश्रीपरमेश्वरमव्यभिचारेणैकांतभक्ति)

२५ ॥

मधुभाष्य

२५ ॥

98

भाषा अनुवाद

और जो मनुष्य मान अपमान मे एकभाव और मित्र शत्रु प
क्ष मे समबुद्धि तथा जो दृष्ट अदृष्ट संपूर्ण अर्थके उद्यमको
त्याग करने मे समर्थ है ऐसे आचरणोंसे युक्त पुरुषको गु
णातीत कहते हैं यह जानो ।२५॥

दोहा

समदै मान अपमान मे तुल्य मित्र अरिपक्ष सर्वारंभपरित्या
गी सोगुणातीत कहा सदा २५॥

मां च योऽव्यभिचारेण भक्तियोगेन सेवते स गु
णान्समतीत्यैतान्ब्रह्मभूयाय कल्पते २६

शांकरभाष्यटीका १ न

उदासीनवदित्यादि गुणातीतः स उच्यते इत्यन्तमुक्तं यावद्यत्न
साध्यं तावत् संन्यासिनानुष्ठेयं गुणातीतत्वसाधनं मुमुक्षोः स्थिरी
भूतं तु स्वसंवेद्यं सद्गुणातीतस्य यतेर्लक्षणं भवति अधुना कथं च ति
व त्रीन् गुणानतिवर्तत इति प्रश्नस्य प्रतिवचनमाह मां चेति। मां च
ईश्वरं नारायणं सर्वभूतहृदयाश्रितं यो यतिः कर्मी वा अव्यभिचारे
ण कदाचित् यो व्यभिचरति न भक्तियोगः भजनं भक्तिः सैव यो
गस्तेन विवेकज्ञानात्मकेन भक्तियोगेन ज्ञानसमन्वयेन सेवते स
गुणान् समतीत्य एतान् यथोक्तान् ब्रह्मभूयाय भवनं भूयः ब्रह्म
भूयाय ब्रह्मभवनाय मोक्षाय कल्पते समर्थो भवतीत्यर्थः २६

आनंदगिरिकृतटीका २

यत्नसापेक्षत्वादि तद्विशेषात् पूर्वं यत्नसाध्यं विद्याधिकारि
णा ज्ञानसाधनत्वेनानुष्ठेयमयत्नसाध्यं तु विद्यायां जीवन्मुक्तस्यानुध
र्मजातं स्थिरीभूतं स्वानुभवसिद्धं लक्षणत्वेन निर्दिष्टमित्युक्ते धर्मजा
ते विभागं दर्शयति उदासीनवदित्यादिना। प्रश्नद्वयमेवं परिहृत्य
तृतीयं प्रश्नं परिहरति अधुनेति। मद्भक्तस्य संसारविषयत्वं व्याव
र्तयति ईश्वरमिति। तत्रैव नारायणशब्दान्मूर्तिभेदो व्यावर्त्यते। तस्य
ताटस्थ्यं व्यवच्छिनत्ति सर्वेति। सत्त्वासत्त्वाधिकारिभेदेन विकल्पः
भक्तियोगस्य याहच्छिकत्वं व्यवच्छेत्तुमव्यभिचारेणेत्युक्तं तद्व्याच
ष्टे नेति। भजनं परमप्रेमरूपं सेव्यतेऽनेनेति योगः तेन सेवते
पराक् चित्ततां विना सदानुसन्दधातीत्यर्थः स भगवदनुग्रहहेतु
ग्धीसम्य नसम्यग्ज्ञो विद्वान् जीवन्नेवेत्यर्थः।२६॥

स्वामिकृतटीका ३

कथं चैतान् गुणानतिवर्तत इत्यस्य प्रश्नस्योत्तरमाह मां चेति चश
ब्दावधारणार्थः मामेव परमेश्वरं श्रीनारायणमव्यभिचारेणैकान्तेन भ न

श्री· गी·टी· चं

क्तियोगेनयः सेवते सएतान्गुणान्समतीत्यैतान्सम्यक्प्रतिक्रम्यब्रह्मभू
यायब्रह्मभावायकल्पतेयोग्योभवति २६ ॥

पिशाचभाष्यटीका ४

मांचेति भक्तिरेवयोगोभक्तियोगः ब्रह्मभावायकल्पतेसमर्थोभवति २६

+ तदेवंभूतगुणात्ययेप्रधानहेतुमाह ॥

रामानुजभाष्यटीका ५

+ मांचेति नायंगुणेभ्यः कर्त्तारमित्यादिनोक्तेनप्रकृत्यात्म विवेकानुसं
धानमात्रेणगुणात्ययः प्राप्यते तस्यानादिकालप्रवृत्तविपरीतवास
नावाध्यत्वसंभवात् मांसत्यसंकल्पपरमकारुणिकमाश्रितवात्सल्य
जलधिमव्यभिचारेणैकांत्यविशिष्टेनभक्तियोगेनयः सेवते सएता
न्सत्वादीन्गुणान्दुरत्ययानतिवर्त्यब्रह्मभूयायब्रह्मत्वायकल्पतेब्रह्मभाव
योग्योभवतियथावस्थितमात्मानममृतमव्ययंप्राप्नोतीत्यर्थः २६

अभिनवगुप्तकृतटीका ६

अनेनमूलभूतमुपायमुपदिशतिमांचेति चशब्दोवधारणेयोमा
मेवसेवते अनेनफलादिसाकांक्षोमासेगतेवनाश्रयतिफलंप्रधान
तयेतिनिरस्तः अतएवनास्याव्यभिचारिणीभक्तिः फलंप्रतिव्यसा
वास्थावानितियस्तुफलंकिंचिदप्यनभिलष्यन्किमेतदलीकमनु
तिष्ठसीतिपर्यनुयुज्यमानोपिनिरंतरंभगवद्भक्तिमाविष्कुर्वाणोनक्कर
णतयाकंठकिमेतोमवान्वेपमानतनुर्विस्फारितनयनयुगलपरि
वर्तमानसलिलसंपातस्तूष्णींभावेनैवोत्तरंप्रयच्छति सएवाव्यभि
चारिणाभगवतोमहेशस्याग्रशक्त्याभक्त्यापवित्रीकृतोनान्यइतिसे
यं [illegible]
॥

परमार्थप्रपाटीटीका ७

गं^ कथंचैतान्गुणानतिवर्तते इत्यस्यप्रश्नस्योत्तरमाह मामिति मामी
श्वरमव्यभिचारेणैकांतभक्तियोगेनयः सेवतेसएवैतान्गुणान्सम्य
क्प्रकारेणतीत्वाब्रह्मभूयायब्रह्मभावायकल्पतेयोग्योभवति २६ ॥ यं^

वनमालीटीका ८

गुणातिक्रमोपायमाह मामिति मामेवेश्वरंसर्वभूतांतर्यामिणं जगद्गु

दयादिकर्त्तारं वासुदेवमव्यभिचारेणानन्यायसहस्रेणाप्यप्रतिव
द्धेन सर्वोत्तमत्वधीपूर्वकाविच्छिन्नप्रेमप्रवाहरूपेण भक्तियोगेन से
वते स मद्भक्तः एतान् प्रागुक्तान् गुणान् समतीत्य सम्यगतिक्रम्य
निरस्य ब्रह्मभूयायाविर्भूतब्रह्मरूपत्वाय पूर्णानंदस्वरूपमोक्षा
य कल्पते योग्यो भवति सर्वदा भगवतोऽनंतगुणालयस्य भक्तव
त्सलस्य सर्वेश्वरस्य श्रीवासुदेवस्य भक्तिरेव गुणातिक्रमोपाय इति
भावः २६ ॥

अस्यैव जयंतीटीका

अथेदानीं कथं चैतांस्त्रीन् गुणानतिवर्त्तते इति तृतीयप्रश्नस्योत्तरं व
क्तुं नान्यं गुणेभ्यः कर्त्तारमित्यादिनोक्तं न प्रकृत्यात्मविवेकानुसंधा
नमात्रेणैव पुरुषो गुणात्ययो न भवति किं तु दैवी ह्येषा गुणमयी म
म माया दुरत्यया मामेव ये प्रपद्यंते इत्यादिना गुणात्ययस्य तत्पूर्वका
द्वैश्वर्यभगवत्प्राप्तेश्च भगवत्प्रपत्त्येकोपायतया प्रतिपादितत्वा
त् तदेकांतभगवत्प्रपत्त्येकोपायेनैव गुणात्ययस्तत्पूर्वकब्रह्मभा
वश्च भवतीत्याह मां च योऽव्यभिचारेणेति चशब्दोऽवधारणे मामेव
सर्वेश्वरं सर्वकारणकारणं सर्वनियंतारमनंतगुणशक्तिजगद्भि
न्नाभिन्नस्वरूपं पार्थसारथिं कृष्णमेव अव्यभिचारिणैकांतिकेन भ
क्तियोगेन यो गुणात्ययेच्छुः सेवते श्रयति स एतानतिदुरत्ययानपि
गुणानतीत्यातिक्रम्य ब्रह्मभूयाय ब्रह्मत्वाय कल्पते ब्रह्मभावयो
ग्यो भवति आत्मयाथात्म्यस्वरूपं प्राप्नोतीत्यर्थः जीवे ब्रह्मशब्दप्र
योगस्तु प्रागेवोक्तः यत्तु ब्रह्मभूयायेत्यनेन मद्रूपतां स यातीति पा
र्थसारथिनोपदिष्टमिति व्याचष्टे तन्निरवधानमेव तेनैवेदं ज्ञानमु
पाश्रित्य मम साधर्म्यमागताः इत्यादिना मोक्षेपि स्वरूपभेदस्याभिहि
तत्वात् निरंजनः परमं साम्यमुपैतीत्यादिश्रुतिष्वपि च तस्य दृष्टत्वा
त् अणुत्वविभुत्वादिनित्यधर्मकृतत्वेन नित्यत्वाच्च तद्भेदस्य ब्रह्मै
व सन् ब्रह्माप्येतीति श्रुतेनानब्रह्मसदृशः सन् ब्रह्माप्येति प्राप्नोति अ
न्यथा ब्रह्मभावो न ब्रह्माप्ययो न संगच्छते तेन स्वाङ्काण्ठ्यप्रवत्साधी
यानित्यलं विस्तरेण २६ ॥ ॥

+अधुनाकथमेतान्गुणाननिवर्ततेइतितृतीयप्रश्नस्यप्रतिवचनमाह ॥

श्री॰
गी॰ टी॰
चं

101

मधुसूदनीटीका ९

+चशब्दार्थः मामेवेश्वरंनारायणंसर्वभूतानांतर्यामिनंमाययाक्षेत्रज्ञतामाग तंपरमानंदघनंभगवंतंवासुदेवमव्यभिचारेणपरप्रेमलक्षणेनभ क्तियोगेनद्वादशाध्यायोक्तेनयःसेवतेसदाचिंतयतिसमुमुक्षुःए तान्प्रागुक्तान्गुणान्समतीत्यसम्यगतिक्रम्यप्रत्यगभेददर्शनेनबाधि त्वाब्रह्मभूयायब्रह्मभवनायमोक्षायकल्पतेसमर्थोभवति सर्व दाभगवच्चिंतनमेवगुणातीतत्वोपायइत्यर्थः [illegible] २६

सदानंदीटीका ११

कथंगुणानतिक्रामेदित्यस्योत्तरमुच्यते मांपरमेश्वरंसर्वभूतानां हृदयेस्थितं १ भगवंतंपरानंदघनंनारायणंविभुं नित्यमव्यभिचा रेणपरप्रेमैकलक्षणं २ हृद्येनभक्तियोगेनयश्चिंतयतिसर्वदा समुमुक्षुर्गुणानेतान्मत्प्रसादात्प्रनतधीः ३ अद्वैतदर्शनेनैवबा धित्वात्मनिकल्पितान् ब्रह्मभूयायमोक्षायसमर्थोभवतिस्वयं भगवच्चिंतनंनित्यंगुणातीतत्वसाधनं मुच्यतेतस्मात्सदाधीमां श्चिंतयेत्कृष्णमीश्वरं भ्रमावर्तागारंमदज्वरभयभारभ्रमपदंप्रसा रंसंसारंजनिमृतिघनाधारमदर्थिं गुणानामाकारंगहनगतिमु त्तर्तुमधुनापराभक्तिंकृष्णेश्रयतकृतिनोमोक्षजननीम् २६ ॥

नीलकंठीटीका १२

अथकथंत्रीन्गुणानतिवर्ततइत्यस्योत्तरंविविलनसाधनभूतांस्तुति स्थभूमिप्रुत्तीर्णानन्तमानसामाद मांचेति यश्चसाधकोमांप्र त्यगात्मानं चकारस्त्वर्थेपूर्वभूमिस्थापेक्षयास्यवैलक्षण्यंद्योतय ति अव्यभिचारेणान्यमनरानंतरितेनभक्तियोगेनमयिभगवतितैल धारावदविच्छिन्नवृत्तिप्रवाहिमनःप्रणिधानरूपेणयोगेनसेव तेध्यायति सएवंसम्यग्वशीकृतचित्तएतान्गुणान्समतीत्यध्या नपरिपाकांतेसत्वमपिबाधित्वाब्रह्मभूयायब्रह्मभावायकल्पते योग्योभवति भवोभावइतिभवतेर्भावेकाप् ॥२६॥

आनंदटीका १२

एतद्वयनोपाय
माह— अव्यभिचारेणपरमेश्वरंत्यक्तान्यसंबंधादेशान्यफलकामनयायज

नंव्यभिचारस्तस्मैतेनमदेकालम्बनेनभक्तियोगेनमांसेवतेसब्रह्मी
य१ भावायमत्सायुज्यंकल्पतेसमर्थोभवति २६ ॥

रामकंटीटीका १४

नेपरंविधिमाह यश्च यथोक्तस्वरूपंमामव्यभिचारेणमद्व्यतिरिक्त
विषयान्तरालम्बनव्यभिचाररहितेनभक्तियोगेनप्राक्प्रतिपादित
चतुष्प्रकारेणभक्तिरूपेणसमाधिनासेवते आर्तत्वादितानित्यपर्य
तावस्यासमुचितविधिपूर्वमुपास्ते सपरांकाष्ठांप्राप्तःसन्नेतान्य
थोक्तान्गुणानतीत्यातिक्रम्यब्रह्मभूयायब्रह्मभावायकल्पते ।
यथोक्तस्वरूपंब्रह्मसंपद्यतेइति इदानीमुपायान्तरमुत्तराहैतम
हामोहसागरादुत्तीर्णोभवतीत्यर्थः यतोयथोक्तक्रमेणप्रत्यभि
ज्ञाताद्वयचिन्मात्रस्वरूपपरब्रह्मणोमयिपरमात्मनिस्वविश्रान्त
संविदोयोगिनोनन्यगुणरूपंकिंचिद्व्यतिरिक्तंपदार्थान्तरमवशिष्य
ते यस्माद्यथोक्तंतात्त्विकंमत्स्वरूपमेवाचिन्त्यमन्मायामहिम्नैवे
दंतयापरमःप्रमाणंयथाप्रकृत्याव्यभावस्वरूपतामापत्स्यते त
थैवतात्त्विकामद्धर्माधर्मीत्वपरामृश्यमानाःसत्वादिगुणव्यपदे
शभाजोभवंति तथाच प्रकाशोनाममद्धर्मोव्यतिरिक्तप्रकाश्य
नैपेक्षनिस्पन्दितचिदात्मकज्योतीरूपःसव्यतिरिक्तपरिमितप्र
काश्यनिष्टतयातत्स्वरूपानुविधायित्वात्परिमितत्वमिवापन्नः
सत्वगुणव्यपदेशंलभते एवंस्वरूपानुभवमात्रलक्षणाक्रिंसापि य४
मद्धर्मःसव्यतिरिक्तपरिमितप्रकाश्यनिष्टतयारजोगुणव्यपदे
शंलभते तथादेशकालाद्यनवच्छिन्नमहिम्निस्वाभाविकीनिरा
पास्थितिः सैवभिन्नाश्रयनिष्टतयानियमात्मकतमोगुणव्यपदे
शंलभते एवंपरामर्शवैचित्र्याज्ञावनामात्रव्यापारोमायाशक्तिः
प्रकृतिगुणादिभावविकल्पात्मकमत्यद्भुतमिदंत्रैलोक्यालेख्य
मुल्लिखंतीसर्वदेहिनोमोहयति सैवयदाभक्तिरूपेणविज्रम्भमा
णयाविद्याशक्त्यातिरस्कृताभवतितदापारमार्थिकंब्रह्मैवैकंत

त्वमवशिष्यते ततउक्तं योभक्तियोगेनमांसेवतेसब्रह्मभूयायक॰
ल्पतेइति २६ ॥

लाक्षिकी [illegible]टीका १५

+कथंचैतान्गुणाननिवर्तते इत्यस्योत्तरमाह॥

+चोवधारणे मामेवमच्युतंवासुदेवमहंतमीश्वरमेवयोयो
गी अव्यभिचारेणनिष्कामेनभक्तियोगेनोक्तरूपेणयासायो
गेनसेवतेभ्यस्यति सएतान्उक्तलक्षणांस्त्रीन्गुणान्समती
त्यसम्यगतिक्रम्य ब्रह्मभूयायब्रह्मभावायकल्पतेसमर्थोभ
वति [illegible] २६ ॥

102

पैचोलीटीका

अधुनाकथंत्रीन्गुणानतिवर्ततेइतिप्रश्नस्यप्रतिवचनमा॰
ह मांचेति चपुनः योयतिः कर्मीवामामीश्वरं सर्वभूतहृ॰
दिस्थितंभक्तियोगेनभजनंभक्तिः सएवयोगस्तेनभक्तियो॰
गेनविवेकविज्ञानरूपेणअव्यभिचारेणानन्यविषयेणसेव॰
तेसएतान्गुणान्समतीत्यब्रह्मभूयायब्रह्मभावायमोक्षाय
कल्पतेसमर्थोभवति २६

रणवीरसमिद्धोधिनी॥

कथमेतान्गुणानतिवर्ततेइत्यस्यप्रश्नस्योत्तरमाह मांचेति
चकारोऽत्रावधारणार्थः मामेवश्रीपरमेश्वरमव्यभिचारेणैकां
तभक्तियोगेनस्वधर्मपालनरूपेणयः सेवते सएतान्गुणान्स
मतीत्यसम्यगतिक्रम्यब्रह्मभूयायब्रह्मभावायकल्पतेयोग्यो
भवतीत्यर्थः २६॥

मधुभाष्य

२६॥

भाषा अनुवाद

किस प्रकार सत्वादि गुणों को अतिक्रम करि के वर्तमान रहैं
इस प्रश्न का उत्तर करते हैं कि परमेश्वर स्वरूप हमारी ही से
वा अव्यभिचारिणी एकान्तिक भक्ति के द्वारा जो मनुष्य कर
ता है सोई मनुष्य गुणत्रय को अच्छी तरह से अतिक्रम करि
के मुक्ति प्राप्ति के योग्य होता है ।२६।

दोहा ॥

सो सेवत अव्यभिचार सें भक्ति योग सें जोय सो इन गुणको
लंघके ब्रह्म परापत होय २६ ॥

103

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च शा
श्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च २७
इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे गुणत्रयविभा
गो नाम चतुर्दशोऽध्यायः १४ ॥

शांकरभाष्यटीका १

उच्यत इत्युच्यते ब्रह्मणः परमात्मनः हि यस्मात् प्रतिष्ठाहं प्र
तितिष्ठत्यस्मिन्निति प्रतिष्ठाहं प्रत्यगात्मा कीदृशस्य ब्रह्मणः अमृ
तस्याविनाशिनः अव्ययस्याविकारिणः शाश्वतस्य च नित्यस्य धर्म
स्य ज्ञानयोगधर्मप्राप्यस्य सुखस्यानंदरूपस्यैकांतिकस्याव्यभिचा
रिणः अमृतादिस्वभावस्य परमानंदरूपस्य परमात्मनः प्रत्यगा
त्मा प्रतिष्ठा सम्यक् ज्ञानेन परमात्मतया निश्चीयते इति तदेतद्ब्रह्म
भूयाय कल्पते उक्तं यया चेश्वरशक्त्या भक्तानुग्रहादिप्रयोजनाय
ब्रह्म प्रतिष्ठते प्रवर्तते सा शक्तिः ब्रह्मैवाहं शक्तिशक्तिमतोरनन्यत्वा
दित्यभिप्रायः अथवा ब्रह्मशब्दवाच्यत्वात् सविकल्पकं ब्रह्म तस्य ब्र
ह्मणो निर्विकल्पकोऽहमेव नान्यः प्रतिष्ठाश्रयः किंविशिष्टस्यामरण
धर्मकस्याव्ययस्य व्ययरहितस्य किंच शाश्वतस्य च नित्यस्य धर्मस्य
ज्ञाननिष्ठालक्षणस्य सुखस्य तज्जनितस्यैकांतिकनियतस्य च प्रतिष्ठा
हमिति वर्तते २७ इति चतुर्दशोऽध्यायः १४ ॥

आनंदगिरिटीका २

+ २ पूर्वाभ्यामपौनरुक्त्यं। प्रतिषिद्धार्थस्य धर्मशब्दस्य ब्रह्मण्यनुपपत्तिमा
शंक्याह ज्ञानेनेति। अर्थेंद्रियसंबंधोत्थं सुखं व्यावर्तयितुमैकांति
कस्येत्युक्तं। अक्षरार्थमुक्त्वा वाक्यार्थमाह अमृतादीति। प्रतिष्ठा
यस्मादिति पूर्वेण संबंधः तस्मात् प्रत्यगात्मा परमात्मतया निश्ची

१ विद्वान् ब्रह्मैवेत्यत्र हेतुं पृच्छति कुत इति तत्रोत्तरमाह उच्यत इति ब्रह्मशब्दस्य सति बाधके मुख्यार्थग्रहण
मभिप्रेत्याह परमात्मन इति तं प्रति प्रत्यगात्मनो यत् प्रतिष्ठात्वं तदुपपादयति प्रतितिष्ठतीति यद्ब्रह्म
प्रत्यगात्मनि प्रतितिष्ठतीति तत्किं विशेषणमित्यपेक्षायामुक्तममृतस्येत्यादि तत्रामृतशब्देनाव्य
यशब्दस्य पुनरुक्तिं परिहरति अविकारिण इति नित्यत्वमपक्षयराहित्यं तेन + १

यते सम्यक्ज्ञानेनेति योजना अस्य श्लोकस्य पूर्वश्लोकेनैकवाक्यता
माह तदेतदिति। विवक्षितं वाक्यार्थं प्रपंचयति ययेति। अशक्तिः
ब्रह्मैवेति। कथं सामानाधिकरण्यं तत्राह शक्तीति। व्याख्यानांतर
माह अथवेति। विशेषणानि पूर्ववद्योजनीयानि नेतव्यानि तदनेना
ध्यायेन क्षेत्रक्षेत्रज्ञसंयोगस्य संसारकारणत्वं पंचप्रश्ननिरूपणद्वारे
ण च सम्यग्ज्ञानस्य सकलसंसारनिवर्तकत्वमित्येतत् उपपादयता
मुमुक्षो यत्नसाध्यं गुणैरचाल्यत्वादि मुक्तस्यायत्नसिद्धं लक्षणमिति
निर्धारितः। २७। इति आनंदगिरिकृतटीकायां चतुर्दशोऽध्यायः १४

स्वामिकृतटीका १

तत्र हेतुमाह ब्रह्मण इति हि यस्मात् ब्रह्मणोऽहं प्रतिष्ठा प्रतिमा घ
नीभूतं ब्रह्मैवाहं यथा घनीभूतः प्रकाश एव सूर्यमंडलं तद्वदेवेत्य
र्थः तथाव्ययस्य नित्यस्यामृतस्य मोक्षस्य च नित्यमुक्तत्वात् तथा त
त्साधनस्य शाश्वतस्य च धर्मस्य शुद्धसत्वात्मकत्वात् तथैकांति
कस्याखंडितस्य सुखस्य च प्रतिष्ठाहं परमानंदैकरूपत्वात् अतो म
द्भक्तो मद्भावस्यावश्यंभावित्वात् गुणानेवोक्तं ब्रह्मभूयाय कल्प
त इति २७ कृपयाधीनगुणासंगप्रसंजितभवांबुधिं स्वं वनतरतिम
मुकुंदस्य भाणि चतुर्दशे॥ इति श्रीभगवद्गीतासुबोधिन्यां टीका
यां चतुर्दशोऽध्यायः १४॥

पिशाचभाष्यटीका १

मत इति चेत् ब्रह्मणः परमात्मनः हि यस्मात् प्रतिष्ठा प्रतिष्ठितेनाहमि
त्येवंत्वाभिमुखमनेनेति प्रतिष्ठा अहमीश्वरः अमृतस्य अव्ययस्य
अविनाशिनः शाश्वतस्य नित्यस्य धर्मस्य मोक्षसाधनस्य सुखस्य
ब्रह्मानंदस्य च ऐकांतिकस्य अव्यभिचारिणः कस्मात् मामव्यभि
चारेण भक्तियोगेन यः सेवते सः त्रीन् गुणान् समतीत्य ब्रह्मभूयाय
कल्पते समर्थो भवति २७ इति पैशाचभाष्ये चतुर्दशोऽध्यायः १४

रामानुजभाष्यटीका १

ब्रह्मणो हीति हि शब्दो हेतौ यस्मादहमव्यभिचारिभक्तियोगेन से

विशेमृतस्याव्ययस्य ब्रह्मणः प्रतिष्ठा तथा शाश्वतस्य धर्मस्य अ
तिशयितनिःश्रेयसस्य ऐकान्तिकस्य सुखस्य वासुदेवः सर्वमित्यादि
निर्दिष्टस्य ज्ञानिनः प्राप्यस्य सुखस्येत्यर्थः यद्यपि शाश्वतधर्मश
ब्दः साधकवचनः तथापि पूर्वोक्तनया साध्यरूपत्वेन तत्साहचर्या
द्यमपि साध्यलक्षकः एतदुक्तं भवति सर्वं देवी ह्येषा गुणमयी
मम माया दुरत्यया मामेव ये प्रपद्यन्ते इत्यारभ्य गुणात्ययस्य तत्स
र्वकादैश्वर्यभगवन्मय एकोपाय तया प्रतिपादितत्वात् तदे
कान्तभगवत्समेकोपायो गुणात्ययस्तत्सर्वकं ब्रह्मभावश्चेति २७ + ब्रह्ममेव ब्रह्मणः प्रतिष्ठाम यि सेव मानेब्रह्म भवति अन्यथा जडरूपत या ब्रह्म सेवमाने [redacted] मोक्ष मपि सोऽश्नुमादविशिष्टमेव स्था पयेत् ॥
इति रामानन्दभाष्ये चतुर्दशः १४ ॥

अभिनवगुप्तकृतटीका ६

+ संग्रहोऽत्र लसद्भक्तिरसावेशाद्धीनाहङ्कारविभ्रमः स्थितेऽपि गुणसं
मर्दे गुणातीतसमो यतिः २७ इति भगवद्गीतार्थसंग्रहे चतुर्दशः १४

परमार्थप्रपाटीका ७

अथ मनुष्यावेशात्तादृशेन मृहानां तेष्वरत्वसंदेहनिरासार्थमाह
ब्रह्मणो हि चित्सविदानंदमात्ररूपस्य ब्रह्मण अहं प्रतिष्ठा प्रति
माघनीभावः यथा घनीभूतं तेज एव सूर्याकारं भवति यथा वा घ
नीभूतं पयो मलयकर्पूराकारो भवति तद्वदित्यर्थः किंभूत
स्य ब्रह्मणः अव्ययस्य नित्यस्य अनंतस्य मोक्षस्य नित्यमुक्तत्वात्
तथा तत्साधनस्य शाश्वतस्यानश्वरफलदस्य धर्मस्य शुद्धसत्त्वा
त्मकत्वात् तथा ऐकान्तिकस्याखंडस्य सुखस्य च प्रतिष्ठाहं परमा
त्मानंदरूपत्वात् अतो मत्सेविनो मद्भावस्य सर्वस्य भावित्वाद्युक्त
मुक्तं ब्रह्मभूयायकल्पत इति ॥ तदुक्तमध्यात्ममीमांसायां
मे कृत्स्नाकारेण साक्षादिह हरिविनयेतेस्तत्र संस्तः परात्मा ज्योति
बिम्बप्रकाशं ब्रजति दिनकराकारतां यद्वदग्नेः खिंगाद्वेः खव तृ॰
क्रेर्जनं तनविकृते दर्शयद्बिम्बरूपं तेनेत्वास्यानुभूतिप्रदमप
निषदां हार्दमर्थं ब्रवीमीति २७ अध्यायतात्पर्यं ॥
एकोपादानकत्वमनन्तविधमभूद्धैगुणोविम्बमेतेवर्भंतता

श्री॰
गी॰टी॰
चं॰

105

नजंतून्वचमदनुवर्तंस्तोषलोभप्रमोहैः स्वीकुर्वन्नुरुद्रसत्वंजय
तितदिनरोयः समामेतिसत्वप्रोक्तः सम्यक्चतुर्भिः समधिक
दशमेसौगुणातीतयोगः ॥ इतिश्रीमद्देवज्ञपंडितसूर्यविर
चितायांभगवद्गीताटीकायांपरमार्थप्रपायांगुणातीतयो
गोनामचतुर्दशोध्यायः १४ ॥

वनमालीटीका ।

ननुमद्भक्तायांतिमामित्यादिनात्वद्भक्तानांतत्प्राप्तिरेवोक्ताक
थमिदानींत्वद्भक्तानांब्रह्मप्राप्तिस्[illegible]मेदाशंकामपाकु
रोतिब्रह्मणइतिब्रह्मणः पूर्णगुणस्यप्रतिष्ठापर्याप्तिरहमे
वनतमद्भिन्नंब्रह्मास्मिनोमद्भक्तोमांब्रह्मप्राप्नुवंतीतियुक्तमेव
यथाम्रतस्याम्रतत्वस्यमोक्षस्यचाव्ययस्यसर्वथानष्टस्यच
प्रतिष्ठाहमेवमत्यैवमोक्षःपर्यवसितोमत्प्राप्तिरेवमोक्षइत्य
र्थः तथाशाश्वतस्यनित्यमोक्षफलकस्यधर्मस्य सर्वेनमत्त
थीसर्वकाविछिन्नप्रेमप्रवाहरूपभक्तिनिष्ठालक्षणस्यप्राप्ति
रहमेवसधर्मोमत्यैवपर्यवसितोनमद्भिन्नंकिंचित्साधनंकिंत्वह
मेवेत्यर्थः तथैकांतिकस्यसुखस्यचपर्याप्तिरहमेवपरमानंद
रूपत्वात्तन्मद्भिन्नमुत्कृष्टंकिंचित्सुखमस्तीत्यर्थः जीवसुखा
नामल्परूपसुखापेक्षयापकृष्टत्वात् अतोयुक्तमेवोक्तंमद्भ
क्तोब्रह्मभूयायकल्पतइति महाशस्तुयोमामव्यभिचारेण
भक्तियोगेनसेवतेसब्रह्मभूयायकल्पते तासांब्रह्मसहयो
नितित्यादिनाप्रागुक्ताचित्प्रकृतिर्लक्ष्मीस्तद्ब्रह्मपदेनाव्यतेत्र
ह्मत्वरूपंब्रह्मभूयंतत्सैवब्रह्मभूयायलक्ष्मीवत्ममप्रियोभवती
त्यर्थः ननुत्वद्भक्तानांलक्ष्मीतुल्यताकथंलक्ष्म्युपासकानामे
वलक्ष्मीतुल्यतापेक्षातेत्वद्भक्तानांतुत्वत्तुल्यतानत्राह ब्रह्मणइति
ब्रह्मणोलक्ष्म्याअहंप्रतिष्ठाश्रयः सामदाश्रितामद्विनाभूता
नांप्राप्तोमामेवप्राप्तः ततस्तत्प्राप्तेरपितुल्यतामामेवेतिभावः
शेषंप्राग्वदेवेतिव्याचक्षते यत्तुब्रह्मणस्तत्पदवाच्यस्योपाधिक

स्यजगदुदयादिहेतोः प्रतिष्ठापारमार्थिकं निर्विकल्पसच्चिदात्मकनि
रुपाधिकं तत्पदलक्ष्यमहं निर्विकल्पको वासुदेवः प्रतितिष्ठत्यत्रेति
प्रतिष्ठा कल्पितरूपरहितमकल्पितमनेनोपायामां निरुपाधिकं ब्रह्मसे
वनेन ब्रह्मभूयाय कल्पत इत्याह तदनितत्त्वं षष्ठ्युक्तस्यैव वा
सुदेवपदार्थत्वात् सदनंतगुणालयो विश्वोदयादिकर्त्ता सर्वनि
यामकः सर्वाधारो चिंत्यानंतानंतशक्तिः पार्थसारथ्यधृततास्वरजप्र
नोदोस्मच्छब्देन कृपया स्वस्वरूपं स्वग्राहकतयाप्युपदिशति प
रं ब्रह्म परं धाम इत्यादिवक्ता पार्थस्तज्जानात्येव तत् माहात्म्यमथवास्या
नंशकेव भगवता निराकृता श्रुदेमहत्वाविभूत्यात्वे परं ब्रह्मण एव
र्तते मैत्रेय भगवच्छब्दः सर्वकारणकारणे संभर्त्तेति तथा भर्ता
भकारोर्थद्वयान्वितः नेतागमयिता स्रष्टा गकारार्थस्तथा मुने
ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव ष
ण्णां भग इतींगना वसंति यत्र भूतात्मन्यखिलान्यखिलात्मनि स
र्वभूतेष्वशेषेषु वकारार्थस्ततोव्ययः एवमेष महाशब्दो भगवा
निति सत्तम परंब्रह्मभूतस्य वासुदेवस्य नान्यत इति श्रीवैष्णवे वा
सुदेवशब्दस्य परमैश्वर्यवाचकत्वमुक्तं त्वन्मते तत्समच्छब्दस्य चिद
चित्संवलितपरत्वाच्च तत्पदवाच्यौपाधिकस्यार्थस्य लाक्षणिकवा
येः भानेलक्षणावृत्त्यभाने लक्ष्यार्थस्य निर्विकल्पकत्वासिद्धेः
इति गीतायां चतुर्दशः १४ ॥

अथ समवैजयंतीटीका ९

एवं प्रकृतिपुरुषस्वरूपयाथात्म्यज्ञानपूर्वकेन मद्भक्तियोगेन गु
णातीतस्य ब्रह्मशब्दितस्य स्वस्वरूपावाप्तिलक्षणामुक्तिरुक्ता अथेदा
नीं समस्तः कथं तिष्ठेदित्यपेक्षायामध्यायमुपसंहरन् पार्थसारथि
राह ब्रह्मणो हीनि हीनि निश्रेयेन ब्रह्मणः प्रकृतिविप्रकृतात्मस्वरू २
प ज्ञानगर्भिकयामद्भक्त्या निरस्तसमस्तसत्त्वादिगुणावर्णादावि
र्भूत नित्यज्ञानानंदस्वरूपस्यामृतस्य जन्मादिषड्विकारशून्यस्याव्य
यस्य नित्यैकरसस्य [illegible] पुरुषस्याव्यभिचारिभक्तियोगेन से

श्री· गी·टी·

वितं स्वभावतोऽपास्तसमस्तदोषोऽनंतगुणशक्तिकोऽतिसूक्ष्मः
सर्वेश्वरोऽहं प्रतिष्ठा प्रतिष्ठीयतेऽत्रेति निरुक्तेः परमाश्रयोऽतिप्रियो
भवामि स च मद्भक्तोऽनन्ययापरया भक्त्या मामेवानुभवन्नवतिष्ठति
त्रिगुणमपि मद्विश्लेषं न सहते न पुनरावर्तते यद्गत्वा न निवर्तंते मुक्ता
106
नां परमा गतिरित्यादिस्मृतिभ्यः ननु यावत्संसारान्मुक्तिर्न स्यात्ता
वत्त्वद्भक्तिं करोति चेत्करोतु यदि तु मुक्तो भवेत्तर्हि त्वद्भक्तेस्त्वत्समाश्र
यणस्य च किं प्रयोजनं निःफलत्वादित्यपेक्षायां महत्फलमस्तीति भावे
नाह शाश्वतस्येत्यादि शाश्वतस्य निरतिशयसाम्यातिशयषडैश्वर्य
शालिनस्य धर्मस्यैकांतिकस्य मदसाधारणस्य वासुदेवः सर्वमित्या
दिनिर्दिष्टस्य ज्ञानिप्राप्यस्य विचित्रलीलारसस्य सुखस्य चाहमेव प्रति
ष्ठेत्यर्थः निर्विघ्नानंदरूपमद्विभूतिमल्लीलारसानुभवप्रयोजना
य मामेव समाश्रयतीत्येवं श्रुतिरप्याह रसो वै सः रसं ह्येवायं लब्ध्वा
नंदी भवतीति २७ चतुर्दशे गुणैर्युक्तो जीवो बद्धो भवेद्ध्रुवं मद्
मु भक्त्यैव मुक्तः स्यादिति किंचिद्यस्य तं भजे १ इति श्रीनियमानंदवंशावतं
सकलदासस्यांतेवासिना गिरिधारिदासेन विरचितायां भगवद्गी
तार्थकुसुमवैजयंत्यां चतुर्दशोऽध्यायः १४ ॥

मधुसूदनीटीका ९

अत्र हेतुमाह — ब्रह्मणस्तत्पदवाच्यस्य सोपाधिकस्य जगदुत्पत्तिस्थितिलयहेतोः
प्रतिष्ठा पारमार्थिकं निर्विकल्पकसच्चिदानंदात्मकं निरुपाधिकं
तत्पदलक्ष्यमहं निर्विकल्पको वासुदेवः प्रतितिष्ठत्यत्रेति प्रतिष्ठाक
ल्पितरूपरहितमकल्पितं रूपं अतो यो मामनुपाधिकं ब्रह्म सेव
ते स ब्रह्मभूयाय कल्पते इति युक्तमेव कीदृशस्य ब्रह्मणः प्रति
ष्ठाहमित्याकांक्षायां विशेषणानि अमृतस्य विनाशरहितस्याव्य
यस्य विपरिणामरहितस्य च शाश्वतस्यापक्षयरहितस्य च धर्म
ज्ञाननिष्ठालक्षणधर्मप्राप्यस्य सुखस्य परमानंदरूपस्य सुखस्य
विषयेंद्रियसंयोगजत्वं वारयति ऐकांतिकस्याव्यभिचारिणः स
र्वस्मिन्काले देशे च विद्यमानस्यैकांतिकस्य सुखरूपस्येत्यर्थः ॥ १

प्रतारूपस्य ब्रह्मणो यस्मादहं वास्तवस्वरूपं तस्मान्मद्भक्तः संसा
रान्मुच्यत इति भावः तथा चोक्तं ब्रह्मणा भगवंतं श्रीकृष्णं प्रति
एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योतिरनंत आद्यः नि
त्योऽक्षरोऽजस्रसुखो निरंजनः पूर्णोऽद्वयो मुक्त उपाधितोऽमृत इति
अत्र सर्वोपाधिशून्यस्यात्मनो ब्रह्मत्वमित्यर्थः शुकेनापि स्तुत्यंतरे
णोक्तं सर्वेषामेव वस्तूनां भावार्थो भवति स्थितः तस्यापि भग
वान्कृष्णः किमतद्वस्तु रूप्यतामिति सर्वेषामेव कार्यवस्तूनां भा
वार्थः सत्तारूपः परमार्थो भवति कार्याकारेण जायमाने सोपा
धिके ब्रह्मणि स्थितः कारणसत्तातिरिक्ताया कार्यसत्ताया अन
भ्युपगमात् तस्यापि भगवतः कारणस्य सोपाधिकस्य ब्रह्मणो
भावार्थः सत्तारूपोऽर्थो भगवान् कृष्णः सोपाधिकस्य निरुपाधि
के कल्पितत्वात् कल्पितस्य चाधिष्ठानानतिरेकाद्भगवतः कृष्ण
स्य च सर्वकल्पनाधिष्ठानत्वेन परमार्थसत्यनिरुपाधिब्रह्मरूपत्वा
त् अतः किमतद्वस्तु तस्माच्छ्रीकृष्णादन्यद्वस्तु पारमार्थिकं किं नि
रूप्यतां तदेवैकं पारमार्थिकं नान्यत्किमपीत्यर्थः तदेतदिहाप्युक्तं
ब्रह्मणो हि प्रतिष्ठाहमिति अथवा त्वद्भक्तस्त्वद्भावमाप्नोतु नाम
कथं तु ब्रह्मभूयाय कल्पते ब्रह्मणः सकाशात्त्वतोऽन्यत्वादित्याशं
क्याह ब्रह्मणो हीति ब्रह्मणः परमात्मनः प्रतिष्ठा पर्याप्तिरहमे
व न त्वमद्भिन्नं ब्रह्मेत्यर्थः तथामृतस्यामृतत्वस्य मोक्षस्य चाव्य
यस्य सर्वथानुच्छेद्यस्य च प्रतिष्ठाहमेव मय्येव मोक्षः पर्यवसितो
मत्प्राप्तिरेव मोक्ष इत्यर्थः तथा शाश्वतस्य नित्यस्य मोक्षफलस्य
धर्मस्य ज्ञाननिष्ठालक्षणस्य च पर्याप्तिरहमेव ज्ञाननिष्ठालक्षणो ध
र्मो मय्येव पर्यवसितो न तेन मद्भिन्नं किंचित्प्राप्यमित्यर्थः तथा
ऐकांतिकस्य सुखस्य च पर्याप्तिरहमेव परमानंदरूपत्वात् न मद्भिन्नं
किंचित्सुखं प्राप्यमस्तीत्यर्थः तस्माद्युक्तमेवोक्तं मद्भक्तो ब्रह्मभूया
य कल्पत इति पराकृतनमद्बंधं परं ब्रह्म नराकृति सौंदर्यसारसर्वस्व

श्री॰ गी॰ टी॰ १०

वंदेनंदात्मजं मह: २७ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्री
विश्वेश्वरसरस्वतीश्रीपादशिष्यश्रीमधुसूदनसरस्वतीविरचितायां
श्रीभगवद्गीतागूढार्थदीपिकायांप्रकृतिगुणत्रयविभागयोगो
नामचतुर्दशोऽध्याय: १४ ॥

सदानंदीटीका १४

ननुभक्तिरैकांतिकेनगुणातीतत्वसाधनं कुतएतदपेक्षायांहेतुमाह
जगत्पति: १ ब्रह्मण:सविकल्पस्यसर्वशक्तेर्महेशितु: एतेनसद्
वाच्यस्यजगद्धेतुरहंघन: २ प्रतिष्ठावास्तवंतत्त्वंनिर्विकल्पकमद्वयं चि
दानंदघनंसत्यंनिरुपाधिकमद्वयं ३ अहंतत्पदलक्ष्यश्रीवासुदेव:
स्वयंप्रभु: अतोमांसेवतेय: सब्रह्मभूयायकल्पते ४ ब्रह्मण:की
दृशस्याहंप्रतिष्ठातच्छृणुस्फुटं नाशशून्यस्यसत्यस्यकूटस्थस्यचि
दात्मन: ५ नित्यस्यतत्त्वविज्ञाननिष्ठाप्राप्यस्यवस्तुन: परमानंदरू
पस्यसर्वदाव्यभिचारिण: ६ ईदृशस्यस्वरूपंमांचिंतयत्पारमार्थि
कं संसारान्मुच्यतेधीरोमद्भक्तोमय्यवस्थित: ७ यद्वातद्भावमाप्नोत
तद्भक्तस्तत्परायण: ब्रह्मत्वयोग्य: सकथंब्रह्मतांयातान्वेतिचेत् ८
पर्याप्तिरहमेवास्मिब्रह्मण: परमात्मन: नमद्भिन्नंपरंब्रह्मसम्य
क्प्राप्यत्वमात्मना तथाऽमृतस्यमोक्षस्यनिर्छेद्यस्यचसर्वथा प्रतिष्ठा
हमस्म्येवमोक्षोमत्प्राप्तिरेवहि ९ नित्यमोक्षफलस्यास्यधर्मस्या
प्यहमेवच पर्याप्तिर्ज्ञाननिष्ठाख्योधर्मोमय्येवतिष्ठति ११ नतेनकिं
चिन्मद्भिन्नंसाध्यंधर्मेणैवसुखं सुखस्यैकांतिकस्यापिपर्याप्तिर
हमेवच १२ परमानंदरूपत्वान्मद्भिन्नंसुखंक्वचित् किंचित्साध्यंय
तोमत्त: पृथक्दु:खंचबाधितं १३ तस्माद्युक्तियुतंप्रोक्तंमद्भक्तोम
त्परायण: ब्रह्मभूयायमोक्षायसमर्थोभवतीतिच १४ तस्मान्मु
मुक्षुभिर्धीरै:प्रेमभक्त्याहमीश्वर: यदाश्रितस्तदैवैतेगुणातीत
त्वभागिन: १५ सत्त्वादीनांगुणानांजनिमृतिगहनेदुस्तरेस्मिन्भवा
ब्धौकार्याकारेणनित्यंपरिणतवपुषांपातहेतुत्वमस्या नेभ्योमो

दं स्वबोधात्स्वपदरूपयिपालनलक्षणादि प्रदर्शयन्सी यंतिष्ठां जगौ योविम
लमतिमन्तानो मितं कृष्णमीडे ॥ १६ ॥ इति भावप्रकाशे श्रीसदानंदवि
दात्कृते गुणातीतत्वनिष्ठायं शक्तियात्तश्चतुर्दशः ॥ १४ ॥

नीलकंठीटीका २७

विषयप्रदर्शनद्वारा विचारणाख्यां द्वितीयां भूमिमाह ब्रह्मणो हीति
ब्रह्मणो वेदस्य प्रतिष्ठा तात्पर्येण पर्यवसानस्थानमहमेव अमृतस्य क
र्मब्रह्मणो भयदर्शनद्वारा अमृतसाधनस्य अव्ययस्य अनादित्वादनंतत्वाच्चा
पौरुषेयत्वेनाप्रामाण्यशंकाकलंकशून्यस्य अतः प्रमाणभूतस्यास्य अथः
प्रनेनोपक्रमोपसंहारादिपर्यालोचनया वेदाविरुद्धतर्कोपकरणया ह्य
स्य वेदस्य तात्पर्यं मद्दर्शन एव नान्यत्र निर्णीतव्यमिति विचारणाख्या द्वि
तीया भूमिरुक्ता हेतुफलोपदर्शनमुखेन शुभेच्छाख्यां प्रथमां भूमिमा
ह शाश्वतस्येति काम्यधर्मवत्फलदानेन नाशाभावात् भगवदर्पितो
नित्यो धर्मः शाश्वतः विविदिषादिपरंपरया मोक्षाख्यशाश्वतफलहे
तुत्वात् शाश्वतस्य च धर्मस्य प्रतिष्ठा परमप्राप्यं फलमहमेव तथा
स्या ऐकांतिकं विषयसंगजन्यसुखं अभिभाव्य स्वरूपभूतं मोक्षसुखं त
स्यापि प्रतिष्ठा पराकाष्ठा अहमेव एवं निष्कामधर्मेण विशुद्धचित्त
स्यैकांतिकसुखेच्छा भवतीयं शुभेच्छाख्या प्रथमा भूमिः अत्र परां प
रां भूमिमारोढुमशक्तस्य पूर्वां पूर्वां भूमिरुपदिश्यते यथाध्यानेना
त्मनि पश्यंतीत्यत्र तनिदिध्यासनाशक्तस्य सांख्यनाम्ना विचारस्तत्राप्य
शक्तस्य कर्मयोग उपदिश्यते तद्वत् २७ ॥ इति श्रीभीष्मपर्वणि
नैलकंठीये भारतभावदीपे चतुर्दशोऽध्यायः १४ ॥

आनंदीटीका २७

हि यस्मादव्ययस्यामृतस्य जन्मादिविकाररहितस्य ब्रह्मणः प्रतिष्ठा
हं ईदृशो ब्रह्मप्राप्त्यर्थी मय्येव प्रतिष्ठितः शाश्वतस्य शाश्वतपद
प्राप्तिहेतोर्धर्मस्य विहितकर्मानुष्ठानरूपस्याहमेव प्रतिष्ठा तज्ज

श्री· नितांतदुःखाधिष्ठानतापैकांतिकस्य सांसारिकदुःखैरमिश्रितस्य सुख
गी·टी· दुःखयोर्यंताभावे परमानंदस्य मोक्षस्य दातेति सिद्धम् २७ इति
चं श्रीआनंदटीकायां भगवद्गीतायां चतुर्दशोऽध्यायः १४ ॥

रामकंठीटीका १४

108 अथ हेतुमाह यस्माद्ब्रह्मणो यथोक्तस्य च परस्य तत्त्वस्याहं प्रतिष्ठा
मपि तदव्यभिचारितया तत्त्वस्वरूपानुविधायि प्रतिष्ठितं यतः दे
हतदेहादिभावेनावस्थितं ब्रह्मैव यद्यप्युक्तं तथापि तदवच्छिन्नव
३९ स्तुनिष्ठतया तत्स्वरूपानुविधायि सर्वत्र प्रतिष्ठितं कीदृशस्य ब्रह्मणो
ऽहं प्रतिष्ठा अमृतस्याव्ययस्य च नव्ययोपहत्य लक्षणो विकारस्तेन रहि
तस्यात एवामृतस्य नित्यसद्भावस्य न केवलं ब्रह्मणोऽहं प्रतिष्ठा यावत्त
दुर्मस्य शाश्वतिकस्य चित्प्रकाशात्मनोऽहं प्रतिष्ठा न परं न व्यतिरि
क्तकारणः सहजआनंदयैकांतिकं सुखं तस्याहं प्रतिष्ठा किमुक्तं
भवति प्रकाशानंदात्मतत्त्वरूपं यत्परं ब्रह्म सोऽहं भक्तिलक्षणेनैव
केनोपायेन प्राप्य इत्योम् यत्तु क्लेशद्रुपसीसतामप्रमलिनैः सत्त्वा
दिभी रूपकैर्दीगितं भजते जनो व्यवहरन्संसारदीर्घोपलो सिद्धेवा
स्परसे चतुर्दशमहाध्यायाभिधेयाम्मतिनीतास्ते परमार्थतां दद
२९ तु वोऽक्षीलक्षणादद्वयाम् २७ इति श्रीमद्राजानकरामविरचिते
वाक्यार्थान्वयमात्रे सर्वतोभद्रनाम्नि गीताविवरणे चतुर्दशो
ऽध्यायः १४ ॥

लातिकी [illegible]टीका १५

अथ हेतुमाह — अहमीश्वरो ब्रह्मणः प्रतिष्ठाश्रयः अन्यथा तस्य निरंजनत
याम्नत्वप्राप्यत्वात् अनभिव्यक्तेः उक्तं च न सत्तासदुच्यत इति गी
अनो व्ययस्य नाशरहितस्यामृतस्य मोक्षस्य चाहमेवेश्वरः प्र
तिष्ठा धाम तथा शाश्वतस्य नित्यस्य च धर्मस्य हन्ताविमर्शरू
पस्याहमेवेश्वरः प्रतिष्ठास्थानम् तथैकांतिकस्याव्यभिचा ८ स्या

तिणः सहजस्यानंदस्य चाहमेव प्रतिष्ठा न च पुरुषः कूटस्थ इति
शिवं पुंप्रकृत्योर्विवेकस्य योवोचत्समथ्यवर्तिनीम् सिद्धभूमिं
गुणोहेशेतं वन्दे सिद्धमच्युतम् २७ इति श्रीभगवद्गीताटी
कायां वासव्याख्यायां गुणत्रयनिर्देशो नाम चतुर्दशोध्यायः
१४ ॥

पंचोलीटीका

भगवति अव्यभिचारिभक्तियोगेन ब्रह्मभावाय शमोहे तु
माह ब्रह्मणोहि हि यस्माद्ब्रह्मणः परमात्मनः प्रतिष्ठाभ
क्ताद्युग्रहादिप्रयोजनाय याईश्वरशक्तिब्रह्म प्रतितिष्ठते वर्त-
ते सा शक्तिप्रतिष्ठा अहं अथवा ब्रह्मणः ब्रह्मशब्दवाच्यस्य स
गुणब्रह्मणः प्रपंचरूपस्य प्रतिष्ठा आश्रयः निर्गुणं सर्वोपा-
धिरहितं परब्रह्माहं किलक्षणस्य ब्रह्मणः अमृतस्य अमरण
धर्मस्य अव्ययस्य व्ययरहितस्य च अन्यत् शाश्वतस्य नित्यस्य
धर्मस्य ज्ञाननिष्ठालक्षणस्य च पुनः शाश्वतधर्मजनितस्य
सुखस्यैकांतिकस्य एकांतनियतस्य अहं प्रतिष्ठा आश्रयः २७

भगवीरसमिद्बोधिनी

अमर्देतुमाह ब्रह्मणः इति हि यस्मादहं ब्रह्मणो जगदुत्पत्ति
स्थितिलयहेतोः प्रतिष्ठा प्रतिमा घनीभूतं ब्रह्मैवाहं यथा घनी
भूतः प्रकाश एव सूर्यमंडलं तद्वदित्यर्थः तथाव्ययस्य नित्य
स्यामृतस्य मोक्षस्य च तथा तत्साधनस्य शाश्वतस्य च धर्म-
स्य स्ववर्णाश्रमोचितस्य च तथैकांतिकस्य निरतिशयस्य सु-
खस्य प्रतिष्ठाहमतः स्ववर्णाश्रमाद्यरूपस्तुतिरस्तु इति धर्मा
चरणेन मां सेवतः पुरुषस्य मद्भावस्यावश्यंभावित्वाद्ब्रह्मभूया
य कल्पत इति पूर्वश्लोके उक्तं युक्तमेवेति प्राकृतगुणासंपर्का
नमः मायानमोह्वेषागोभूत्वास्वधर्ममात्याहीरघोन्महवनाय

109

श्रेवेतिफलितमिति २८॥ इतिश्रीरत्नावीरमसिद्धा
चिन्त्यांगीताव्याख्यायांचतुर्दशोध्यायः १४॥

मधुभाष्य

२७॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीम
द्गीताभाष्ये चतुर्दशोध्यायः १४॥

भाषा अनुवाद

अब पूर्वोक्त भगवद्भक्त के मोक्ष प्राप्ति के विषय मे हेतु कहते हैं कि जिस हेतु ब्रह्मकी प्रतिष्ठा जो प्रतिमा सो मै हूं अर्थात् घनीभूत प्रकाशमात्र जैसे सूर्यमण्डल तद्रूप हम घनीभूत ब्रह्महै और नित्यमुक्त अव्यय के और अमृत जो मुक्ति तिसके भी प्रतिमा हमहैं और शुद्ध सत्व मुक्ति के साधनस्वरूप सनातन धर्म्म के भी प्रतिमा मूर्त्ति हम हैं और परमानंद सुख के भी मूर्त्ति हमै जानो इस से मेरेसेवक जनको मद्भाव रूप ब्रह्मत्व प्राप्ति की अवश्य संभावना है जिस के आश्रय हेतु से असत जो सत के समान प्रतीयमान यह संसार तिससे हमारे भक्त अनायास ही तरते हैं यही चौद हें अध्याय मे भगवान ने कहाहै २७ इति जगन्नाथ सुकुलविरचित मनभावनी भाषा टीकायां चतुर्दशोऽध्यायः । १४ ॥

दोहा ॥

मेहि ब्रह्मप्रतिष्ठहे अमृत अव्ययजोय रूपहि शाश्वतधर्म
को सुखएकांतहि कोय २७ ॥